

# शिक्षाधारा
# Shikshadhara

वार्षिकी शिक्षाशास्त्रविभागीय शोधपत्रिका

Shiksha Shastra Departmental Annual Magazine

अधीक्षक
प्रो. ए. पी. सच्चिदानन्दः
प्राचार्य

प्रधानसम्पादकः
डॉ. चन्द्रकान्तः
विभागाध्यक्षः

सम्पादकः
डॉ. गणेश ति. पण्डितः
सहायकाचार्यः

Accredited with 'A' Grade by NAAC
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः,
भारतशासनमानवसंसाधनविकास-मन्त्रालयाधीनम्)
राजीवगान्धीरपरिसरः, शृङ्गेरी, कर्णाटकम् - ५७७१३९

२०१६ - २०१७

# शिक्षाधारा

# Shikshadhara

(Annual Magazine of Department of Shiksha Shastri)

२०१६-२०१७

**अधिक्षकः**
आचार्यः ए.पी.सच्चिदानन्दः
प्राचार्यः

**प्रधानसम्पादकः**
डॉ० चन्द्रकान्तः
विभागाध्यक्षः

**सम्पादकः**
डॉ० गणेश ति. पण्डितः, सहायकाचार्यः

**सम्पादनसमितिः**
डॉ० रामचन्द्रुलबालाजी, सहायकाचार्यः
डॉ० हरिप्रसाद के, सहायकाचार्यः
डॉ० वेङ्कटरमणभट्टः, सहायकाचार्यः
डॉ० नारायण वैद्य, अतिथिप्राध्यापकः
डॉ० अरविन्दकुमारसोमदत्तः, अतिथिप्राध्यापकः

**शिक्षाशास्त्रविभागः**
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी - कर्णाटकम्

पत्रिका शिक्षाधारा Shikshdhara
(Annual Magazine of Department of Shiksha Shastri)

प्रकाशक: राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:)
राजीवगान्धीपरिसर:, शृङ्गेरी - कर्णाटकम्

© सर्वाधिकार: शृङ्गेरीस्थ - राष्ट्रियसंस्कृतसंस्थानम् राजीवगान्धीपरिसर:

प्रकाशनवर्षम् २०१६ - २०१७

प्रतय: १००

मुद्रक: मान्यताप्रकाशनम्
प्रकाशक मुद्रकश्च:
६०-सी, मायाकुञ्जम्, मायापुरी,
नवदेहली-११००६४ (भारतम्)
विपत्रसङ्केत: manyataprakashan@gmail.com
जङ्गमवाणी 9999889290, 9811014522

All rights are reserved for the Department and
Writers are responsible for their respective articles.

प्रो. ए. पी. सच्चिदानन्दः
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः,
शृङ्गेरी – कर्णाटकम्

Prof. A. P. Sachidananda
Principal,
Rashtriya Sanskrit Sansthan
(Deemed University)
Rajiv Gandhi Campus, Sringeri
KARNATAKA - 577 139

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितः (Accredited by NAAC with 'A' Grade)



# शुभाशंसा

विदितवेदितव्यानां महर्षीणां तपोबलेन सकलजीविनां कल्याणाय श्रेयोमार्गः वेदविहितः शास्त्रमुखेन सम्प्राप्तः। तेषां वेदशास्त्राणां पारम्परिकमध्ययनं संरक्षितुं, तद्विषयकं ज्ञानं संवर्धयितुं च राष्ट्रियसंस्कृतसंस्थानं सर्वदा यत्नशीलं वर्वर्ति। एतत्सङ्कल्पानुरोधेन शिक्षाविभागस्य अध्यापकानां छात्राणाम् च लेखान् समाकलय्य शिक्षाविभागस्य प्राध्यापकाः मिलित्वा "**शिक्षाधारा**" नाम्नीं पत्रिकां सम्पादयितुं समुत्सुकाः सन्तीति मोमुदीति नश्चेतः। शिक्षाशास्त्रे प्रकाश्यमानेयं पत्रिका सर्वेषां शिक्षाशास्त्रे कृतश्रमाणां बुधजनानां जिज्ञासुच्छात्राणां च बहूपकाराय भवतीति महान्मे विश्वासः। सन्दर्भेऽस्मिन् कृतश्रमाणां सर्वेषां वागधिष्ठात्री शारदाम्बा मङ्गलमातनोतु इति भगवतीं तां विद्याधिदेवतां प्रार्थये। एतादृशस्वाध्याययज्ञे सन्ततं प्रोत्साहितवद्भ्यः कुलपतिवर्येभ्यः प्रो. परमेश्वरनारायणशास्त्रिवर्येभ्यः कुलसचिवेभ्यः प्रो. एस्. सुब्रह्मण्यशर्ममहोदयेभ्यः सादरं प्रणामान्निवेदयामः। शुभावसरेऽस्मिन् परमकरुणामूर्तिनां श्रीमज्जगद्गुरूणां श्रीश्रीश्रीभारतीतीर्थमहासन्निधानानां तत्करकमलसञ्जातानां श्रीविधुशेखर–भारतीमहासन्निधानानाञ्च अनुग्रहेण परिसरीयाणां सर्वेषां श्रेयांसि भूयासुरिति आशासे।

बुधजनविधेयः

प्रो.ए.पि.सच्चिदानन्दः

# प्रवहतु सततं शिक्षाधारा

"ज्ञानं तृतीयं मनुजस्य नेत्रं समस्ततत्त्वार्थविलोकिदक्षम्" इति अभियुक्त्यनुसारम् चक्षुष्मानपि मानवः ज्ञानं विना अन्ध एव इत्यर्थः अभिव्यज्यते। यथा पदार्थप्रत्यक्षं प्रति चक्षु–स्संयोगस्य कारणत्वे सत्यपि प्रकाशं विना पदार्थप्रत्यक्षं न जायते तथैव बुद्धोऽपि मानवः ज्ञानं विना अन्ध एव जायत इत्यत्र नास्ति संशयः। तादृशप्रकाशरूपस्य ज्ञानस्यार्जनं निष्कारणं सर्वैः कर्तव्यमस्ति लोके। अपि च अर्जितज्ञानाभिज्ञानम् अभिव्यक्तिं विना न जायते। तादृशा–भिव्यक्त्यर्थं मार्गद्वयं लोकप्रसिद्धं विद्यते। एकः मार्गः मौखिकः, द्वितीयः मार्गः लौकिकः। द्वितीयेन लौकिकात्मकमार्गेणाभिव्यक्तं ज्ञानं लोकोपकारकं, चिरकाललभ्यञ्च जायते इत्यत्र न कस्यापि विप्रतिपत्तिः। एतच्चिन्तां मनसि निधाय राजीवगान्धीपरिसरस्य शिक्षाविभागेन प्रतिवर्षमिवास्मिन् वर्षेऽपि प्रकाश्यमाना विभागीयाध्यापकानां छात्राध्यापकानां च विशेषज्ञान–भूयिष्ठाभिव्यक्तित्त्वं लेखबद्धां कर्तुमवसरं प्रकल्पयति विभागीया शिक्षाधारा नाम्नी पत्रिका।

अस्यां पत्रिकायां भाषाबन्धं विना लेखाः प्रकाश्यन्ते। वत्सरेऽस्मिन् अस्याः निर्माणदायित्त्वं सहायकाध्यापकेभ्यः डा. गणेश ति. पण्डितवर्येभ्यः, अतिथिप्राध्यापकेभ्यः डा. नारायणवैद्यवर्येभ्यश्च प्रादायि। ताभ्यामुभाभ्यां महता प्रयासेन महत्या श्रद्धया च कार्यमिदं समपाद्यत। अतः तयोः विभागपक्षतः कार्तज्ञ्ययकुसुमानि समर्पयन् अभिनन्दनानि समर्पयामि। श्रीजगदम्बायाः शारदाम्बायाः अनन्तश्रीविभूषितानां जगदुरूणां च असीमानुकम्पया एव एतादृशं महत् कार्यं निर्विघ्नेन सम्पन्नं भवतीत्यतः जगदम्बायाः जगद्गुरूणां च चरणकमलयोर्नतिततिसहस्रं निवेदयामि।

हेमलम्बिसंवत्सरः चैत्रपूर्णिमाकुजवासरः
११/०४/२०१७

इत्थं सज्जनविधेयः

डा. चन्द्रकान्तः
विभागाध्यक्षः

# सम्पादकीयम्

अथ मानवः शुभेन कर्मणा सौख्यं विन्दति इति तु लोकप्रसिद्धमेव। तत्र शिक्षा तु शुभकर्माचरणाय अशुभकर्मपरित्यागाय च अस्मान् प्रचोदयति। किं कर्म शुभं किञ्चाशुभमिति बोधः उपदेशानुभवशिक्षणप्रशिक्षणादिभिरुपायैः जायते। एतदर्थं कश्चन अवसरः किञ्चन स्थानं केचन उपायज्ञा अपेक्ष्यन्ते। एतान्येव संसाधनानि इति कथ्यते। मानवीयभौतिकसंसाधनानां सुचारुरूपेण सङ्घटनं नियोजनं च प्रशिक्षणकेन्द्राणाम् आद्यं कर्तव्यं वर्तते। प्रशिक्षणकेन्द्रेषु प्रविष्टाः बालाः मानवीयभौतिकसंसाधनानां सदुपयोगकरणकौशलान्यधिगच्छन्ति। शुभाशुभयोः उचितानुचितयोः हिताहितयोः निर्णयाय प्रत्येकमपि बालाय प्रशिक्षणकेन्द्रेषु मुक्तावसरः परिकल्प्यते। प्रशिक्षणकेन्द्रस्थः बालः स्वानुभवबलेन कालक्रमेण च एतत्सर्वम् अधिगम्य सुनागरिकः भविष्यति। किञ्च सुनागरिकनिर्माणकलामधिगच्छत्यपि। एतत्कर्यसम्पादनाय शिक्षकशिक्षाकेन्द्राणि तन्नाम प्रशिक्षणकेन्द्राणि प्रत्येकमपि सर्वकारेण प्रतिष्ठाप्यन्ते। एतादृशानि केन्द्राणि नवदेहलीस्थ–राष्ट्रियसंस्कृतसंस्थानेनापि आबहोः कालात् प्रागेव आभारतं प्रतिष्ठापितानि सन्ति। संस्थानस्य मार्गदर्शने प्रतिदिनं प्रवर्धमानेषु केन्द्रेषु अथवा परिसरेषु राजीवगान्धीपरिसरोऽपि अन्यतमः। अस्य परिसरस्य शिक्षाविभागः स्वीयैः विशिष्टैः क्रियाकलापैः सुप्रसिद्धोऽस्ति। विशिष्य अस्मिन् वर्षे राष्ट्रियाध्यापकप्रशिक्षणपरिषदः संसूचनानुगुणं नूतनः द्विवर्षीयः शिक्षाशास्त्रीयः पाठ्यक्रमः साङ्गोपाङ्गं पूर्णतां गतः। द्विवर्षीयं पाठ्यक्रममधीत्य परिसरात् प्रथमः गणः निर्गच्छन् अस्त्यधुना। अत एव अस्मिन् वर्षे विभागीयपत्रिकायां "शिक्षाधारा" नामिकायां प्रथमद्वितीय–वर्षीयाणां शिक्षाशास्त्रिणां विविधाः लेखाः संभूय प्रकटिताः सन्ति। न केवलं छात्राध्यापकानाम् अपि तु प्रशिक्षकाणामपि विविधैः लेखैः शिक्षाधारेऽयं शोभतेतराम्। अस्याः पत्रिकायाः सकाले लोकार्पणाय प्रतिपदं मार्गदर्शनं कृतवन्तः परिसरप्राचार्याः आचार्याः ए. पि. सच्चिदानन्दवर्याः

विभागाध्यक्षाः डा. चन्द्रकान्तवर्याः अन्ये वरिष्ठाचार्याश्च। एतान सर्वान् सश्रद्धं स्मरामि। पत्रिकापुटविन्यासकर्मणि सहकृतवद्भ्यः गणकविभागाध्यापकेभ्यः श्री के.वि. शशिधरवर्येभ्योऽपि सन्दर्भेऽस्मिन् धन्यवादाः समर्प्यन्ते। उट्टङ्कणकर्मणि सहकृतवद्भ्यः विभागीयेभ्यः चरणराज–मोहितजोशिवेङ्कटेशराघवेन्द्रबालचन्द्रसुदर्शनप्रभृतिभ्यः छात्राध्यापकेभ्यः अपि सन्दर्भेऽस्मिन् साधुवादाः वितीर्यन्ते। विशिष्य उभयजगद्गुरूणां शारदाम्बायाश्च असीमानुग्रहविशेषैरेव इयं शिक्षाधारा प्रतिवर्षं विलसतितमाम् इति शिवम्।

हेमलम्बिसंवत्सरः चैत्रपूर्णिमा कुजवासरः
11–04–2017

इत्थम्
डा. गणेश ति.पण्डितः

# शिक्षाविभागः



Dr. Chandrakant
Head of the Department



Dr. Ramachandrula Balaji
Asst. Professor



Dr. Hariprasad K
Asst. Professor



Dr. Ganesh T. Pandit
Asst. Professor



Dr. Venkataraman Bhat
Asst. Professor



Dr. Narayana Vaidya
Guest Teacher



Dr. Aravinda K Somadutt
Guest Teacher

# कार्यालयीयाः सदस्याः



**श्रीमती सीतालक्ष्मीः**
अनुभागाधिकारिणी



**श्री एस्. के. महापात्रः**
कार्यालयसहायकः



**श्री गुरुराजभट्टः**
यू. डि. सि.



**श्री एस्. आर्. चन्द्रशेखरः**
एल्. डि. सि.



**श्रीमती मञ्जुळा**
एल्. डि. सि.



**श्रीमती सौम्या**
डि. ई. ओ.



**श्री दिनेशः**
एम्. टि. एस्.



**श्री शिवण्णः**
एम्. टि. एस्.



**श्री एम्. रफीकः**
एम्. टि. एस्.



**श्रीमती जयम्मा**
स्वच्छताकर्मचारिणी



**श्रीमती तिम्मम्मा**
स्वच्छताकर्मचारिणी



**श्रीमती सावित्री**
छात्रावासनिरीक्षिका



**श्री उमेशः**
छात्रावाससहायकः



**श्रीमती अन्नपूर्णा**
स्वच्छताकर्मचारिणी



**श्रीमती पार्वती**
स्वच्छताकर्मचारिणी



**श्रीमती पद्मा**
स्वच्छताकर्मचारिणी



**श्रीमती सुन्दरी**
स्वच्छताकर्मचारिणी



**श्री एम्. बि. शङ्कर्**
रक्षणकर्मचारी



**श्री वासुपूजारी**
रक्षणकर्मचारी



**श्री सदाशिवः**
रक्षणकर्मचारी



**श्री के. चन्द्रप्पः**
रक्षणकर्मचारी



**श्री एम्. के. राजुः**
रक्षणकर्मचारी



**श्री सि. रविः**
रक्षणकर्मचारी

# EDITORIAL BOARD



Prof. A.P. Sachidananda
Principal



Dr. Chandrakant
Chief Editor



Dr. Ganesh T. Pandit
Editor

## PUPIL TEACHERS' EDITORIAL BOARD



कन्हैयकुमारयादवः
शिक्षाशास्त्रिद्वितीयवर्षम्



पूर्णा डि. एस्.
शिक्षाशास्त्रिद्वितीयवर्षम्



राघवेन्द्रदानगेरि
शिक्षाशास्त्रिप्रथमवर्षम्



मेघश्रीः एन्.
शिक्षाशास्त्रिप्रथमवर्षम्

# विषयानुक्रमणिका


| | |
|---|---|
| 1. बौद्धदर्शने शैक्षिकतत्त्वानि | डा. रा. बालाजी |
| 2. अभिक्रमितानुदेशनसामग्रीणां निर्माणम् | डा. हरिप्रसाद के |
| 3. ह्यूरिष्टिक् विधिः | डा. अरविन्द कु. सोमदत्त |
| 4. सा विद्या या विमुक्तये | राजेश भट्ट |
| 5. अनुबन्धचतुष्टयनिरूपणम् | सुजाता नाएक |
| 6. मूल्यशिक्षा | कन्हैया कुमार यादव |
| 7. मनोविज्ञानस्य अर्थः अङ्गानि च | सूरज कुमार |
| 8. शरीरमाद्यं खलु धर्मसाधनम् | पृथिराज सरकार |
| 9. विश्वशान्तये भारतीयसंस्कृतवाङ्मयस्य योगदानम् | अभिषेक परगाई |
| 10. अधिगमे भाषायाः केन्द्रीकरणम् | सस्मिता परिडा |
| 11. आदर्शशिक्षकः | पुष्पलता बेहेरा |
| 12. मूल्यसम्प्रत्ययः | प्रवीणदेवशर्मा |
| 13. श्रीमद्भगवद्गीतायां राजयोगः | संजय दत्त भट्ट |
| 14. गीतानुसारं शिक्षायाः उद्देश्यनि | ब्रम्हानन्दप्रधान |
| 15. हुसैन महोदयानुसारम् अध्यापकः | कार्तिक साहु |
| 16. भारतीयसंस्कृतिः | कमलिनी प्रधान |
| 17. सूक्ष्मशिक्षणम् | शुभस्मिता साहु |
| 18. भारतीयानां भाषाविज्ञाने योगदानम् | शुभश्री भूया |
| 19. शिक्षायां सांख्यिकी | तपस्विनी साहु |
| 20. शिक्षाक्षेत्रे शिक्षकस्य महत्त्वम् | वरुण कुमार महान्ति |
| 21. शिक्षणे प्रश्नकरणविधेः प्रामुख्यम् | ओमप्रकाश पण्डा |
| 22. अभिवृद्धिविकासयोः सिद्धान्तः | दीपक सरकार |
| 23. पाठयोजना | शिवं कुमार शुक्ल |
| 24. शैक्षिकसङ्घटनम् | भुवनेश नौडियाल |
| 25. प्रजातन्त्रार्थं शिक्षायाः आवश्यकता | स्वर्णलता मुदुलि |
| 26. अनुशासनम् | रश्मिता बेहेरा |
| 27. महर्षिदयानन्दस्य शैक्षिकविचाराः | मोहित जोशी |
| 28. प्रतिभावन्तः बालाः तेषां शिक्षा च | विप्लवराय |
| 29. आदर्शजीवनार्थं दश आधारस्तम्भाः | सुमन्त पधान |
| 30. व्यक्तित्वम् | दीपक रातूडी |

| | |
|---|---|
| 31. शिक्षा | भीमशङ्करसायिराम |
| 32. भाषणकौशलविकासस्य उपायाः | पूर्णा डि.एस्. |
| 33. वैदिककाले मानवाधिकारशिक्षा | संजिता गान्धी |
| 34. मनोविज्ञानस्य सम्प्रत्ययः | सजीव चन्द्र राय |
| 35. मूल्याधारितशिक्षा | शुभश्री महान्ति |
| 36. मूल्यानि | रञ्जिता साहु |
| 37. संस्कृतपाठ्यक्रमः | प्राचीपरमिता थाटोई |
| 38. शिक्षायां व्यावसायिकीकरणस्य महत्वम् | ईप्सिता दीक्षित |
| 39. भाषाधिगम तथा शिक्षण सिद्धान्त | सुशील लोहनी |
| 40. विश्व को एक सूत्रमे पिरोने वाली आदर्श शिक्षा पद्धति | रजत सुयाल |
| 41. भाषा सीखने के साधन | शुभम हातगीणे |
| 42. नैतिक शिक्षा का महत्व एवं उपयोगिता | अमूल्या भोई |
| 43. वर्णव्यवस्था में शिक्षा की उपादेयता | वासुदेव |
| 44. Student life | Dhruva bhat |
| 45. Why sanskrit is a cultural language of india | Ashwin bhat |
| 46. Discipline | Vinay -M- Bhat |
| 47. Education system in india | Ganesh subray bhat |
| 48. Principles of child development | Parshwanath jain |
| 49. याज्ञ्यवल्क्यस्मृतौ शिक्षा | विपिनकुमार डिमरी |
| 50. शिक्षकः | शेष कलेट |
| 51. राष्ट्र और विद्यार्थी | पुष्पलता तन्ति |
| 52. मार्गदर्शकः | तेजराज पधान |
| 53. शिक्षायाः अभिकरणानि | निरञ्जन बिस्वाल |
| 54. शैक्षिकप्रविधिः | प्रियदर्शिनी पण्डा |
| 55. गान्धीमहोदयस्य मतानुसारं शिक्षादर्शनम् | स्मरणिका साहु |
| 56. शिक्षादर्शनम् | सागरिका पट्टनायक |
| 57. समाजे शिक्षायाः भूमिका | प्रमिल कुजूर |
| 58. मातृभाषा में शिक्षा | तुषार रञ्जन प्रधान |
| 59. भारतीयसंस्कृतिः | मोनालिसा साहु |
| 60. भाषाध्ययनस्य चत्वारि कौशलानि | स्वर्णमन्दार |
| 61. व्यक्तित्वम् | तोताराम |
| 62. भारतीयशिक्षापद्धतौ परिवर्तनस्यावश्यकता | जयश्री बारिक |
| 63. बौद्धशिक्षायाः स्वरूपम् | यज्ञदत्त स्वाईन |
| 64. बुद्धिः | रेखाराणि पात्रा |
| 65. शिक्षायां शिक्षकस्य स्थानम् | समीर मेहेर |
| 66. स्वामिविवेकानन्दस्य शैक्षिक योगदानम् | खुशिराम काटा |

| | |
|---|---|
| 67. शिक्षायाः स्वरूपम् | संजीव प्रधान |
| 68. भाषा | भुवनेश्वरदास |
| 69. शिक्षामनोविज्ञानस्य आवश्यकता प्रयोजनञ्च | प्रशान्त |
| 70. Genesis of modern science in Sanskrit | Sudarshan Bhat |
| 71. Technology In Education | Raghavendra Danageri |
| 72. स्वामिविवेकानन्दस्य शैक्षिकविचाराः | गणपति भट्ट |
| 73. अभिवृद्धिः विकासश्च | रूपेश महान्त |
| 74. बालस्य पुरतः परिसरः | रामकृष्ण गांवकर |
| 75. ಗುರಿ – ಗುರು | ರಮೇಶ ಬಸಪ್ಪ ಚಿತ್ತಾಪುರ |
| 76. ಮಾತೃಭಾಷಾ ಶಿಕ್ಷಣದ ಮಹತ್ವ | ಅಕ್ಷಯ ಭಟ್ಟ |
| 77. मनोविज्ञानम् | अजीत सिंह |
| 78. शिक्षायाः महत्त्वम् | समीर रञ्जन प्रधान |
| 79. बौद्धानां काले शिक्षणम् | बालचन्द्रभट्ट |
| 80. अध्यापकाभिभावकसमावेशः | प्रदीपकुमार साहु |
| 81. Women Education in india Today | Malavika Natha |
| 82. आधुनिकी शिक्षापद्धतिः गुणदोषविमर्षश्च | कविता जि भट्ट |
| 83. Elements of Psychilogy | Meghashri N |
| 84. भाषायाः विकासक्रमः | वेङ्कटेश जि |
| 85. ಜಗದಗಲದ ಸಂಸ್ಕೃತ | ರಘುವೀರ ಶೆಟ್ಟಿ |
| 86. संस्कृतस्य महत्त्वम् | मधुस्मिता त्रिपाठी |
| 87. आधुनिकयुगे संस्कृतशिक्षा | प्रज्ञाराणी शतपति |
| 88. अभिप्रेरणम् | विनोद कुमार जैन |
| 89. शिक्षणसूत्राणि | प्रद्युत वर्मन् |
| 90. संस्कृतशिक्षणस्य उद्देश्यनि | शैलजा नन्दिनीजेना |
| 91. संस्कृतस्य महत्त्वम् | गुणराम साहु |
| 92. Importance of Travelling in Education | Prajnan Rani sahu |
| 93. शिक्षायाम् आदर्शवादः | संतोष कुमार साहु |
| 94. शिक्षामनोविज्ञानस्य परिचयः | देवव्रत पाणिग्राही |
| 95. भाषायाः आयामाः कौशलानि च | सिद्धार्थनैथानि |
| 96. शिक्षाप्रविधिश्च | भूपेन्द्र सिंह |
| ❋ छात्राणां परिचयः | |
| ❋ N.C.T.E. Order | |

# बौद्धदर्शने शैक्षिकतत्त्वानि

**डा. रामचन्द्रुलबालाजी**
सहायकप्राध्यापकः

बौद्धदर्शनं नैतिकजीवनस्य दर्शनम्। भगवान् बुद्धः मनुष्यजीवनोन्नत्यै सहायताभावात् तत्त्वमीमांसायाः विवेचने समययापनमनुपयोगि भवतीति अवगतवान्। बौद्धचिन्तनानुसारं येषां विषायाणां समाधानाय पर्याप्तं प्रमाणं नैव लभ्यते तेषां समाधानाय चेष्टा व्यर्था। बुद्धः प्राचीनकाले विद्यमानानां अनेकदार्शनिकसिद्धान्तानां युक्तिहीनतां निराधारतां च प्रतिपादितवान्। यतो हि तेन मुक्तिमार्गः नैव मिलति।

**शिक्षायाः उद्देश्यानि**

बौद्धदर्शनानुसारं जीवने विद्यमानदुःखानां दूरीकरणमेव शिक्षायाः उद्देश्यं भवति। तेषां दर्शने चत्वारि सत्यानि वर्तन्ते। यथा– जीवनं दुःखपरिपूर्णं भवति। दुःखानां कारणमस्ति। दुःखानां नाशः सम्भवति। दुःखनाशाय उपायः वर्तत इति। वेदान्ततुल्यं बौद्धदर्शनेऽपि दुःखानां कारणमस्माकमज्ञानं इति मन्यते। यदा अज्ञानस्य अपाकरणं भवति तदा दुःखानामन्तः भवति। अतः मानवस्य दुःखकारणीभूतात् अज्ञानात् विमुक्तीकरणं शिक्षायाः लक्ष्यं वर्तते।

बौद्धमते यदा जन्मजरामरणकारणीभूतं नाम रूपात्मकशरीरम् (Body mind organism) नश्यति, तदा सम्पूर्णदुःखस्य नाशः भवति। यावत् शरीरं भवति तावत् येन केनापि प्रकारेण दुःखं भवति। यत्सुखं सांसारिकं भवति, तदपि क्षणिकमेव भवति। तदन्ते पुनः दुःखं भवत्येव।

बौद्धदर्शनस्य एतादृशनिराशावादिदृष्टिकोणाधारेण व्यवहारिकशिक्षायाः उद्देश्यस्य निर्धारणं साक्षात् न सम्भवति। यतो हि बौद्धशिक्षाप्रणाल्यां उद्देश्येन साकं तत्त्वचिन्तनस्य साक्षात् सम्बन्धः न दर्शितः।

भगवता बुद्धेन सज्जीवनार्थम् अष्टाङ्गमार्गः प्रदर्शितः। स एव मार्गः शिक्षायाः विशिष्टो–द्देश्यारूपेण योजयितुं शक्यते।

**सम्यक् दृष्टिः** (समा दिट्ठि)

अविद्याकारणात् अस्य जगतः, एवमात्मनः सम्बन्धे च मिथ्यादृष्टिः उत्पना भवति। अविद्या–कारणादेव वयमनित्येषु दुःखदायिक्षणिकसततपरिवर्तनशीलेषु अनात्मवस्तुषु, नित्यं सुखदायी स्थायी आत्मरूपमिति अङ्गीक्रियते। ज्ञानप्राप्तिफलस्वरुपेण शिक्षितव्यक्तिः वस्तूनां यथार्थस्वरूपं जानाति। इयं सम्यक् दृष्टिः भवति। शिक्षायाः प्रथमं कार्यं शिक्षार्थिने सम्यग्दृष्टिप्रदानम्।

**सत्सङ्कल्पः** (सम्मा संकल्प)

केवलज्ञानप्राप्तिमात्रेण तदनुसारजीवनपद्धतेः निश्चयपर्यन्तं दुःखानामन्तः नैव भवति। अन्येषु द्वेषत्यागः, सांसारिकविषयेषु विरागः, हिंसात्यागः इत्यादीनां निश्चयः आवश्यकः। अयमेव सङ्कल्पो भवति। शिक्षायाः द्वितीयोद्देश्यं वर्तते छात्रेभ्यः सत्संकल्पस्वीकारे साहाय्यप्रदानमिति।

**उत्तमवाणी** (सम्मा वाचा)

तृतीयं लक्षणम् अस्य वाणी नियमिता स्यात्। शिक्षितव्यक्तिः अन्यान् न निन्दति, अप्रियरूपेण मिथ्यावाण्या न व्यवहारति, नैव जल्पति, एतादृशसंयमितवाण्याः व्यवहार एव सम्यक् वाक् इत्युच्यते।

**उत्तमं कर्म** (सम्मा कम्मान्त)

शिक्षितमनुष्यस्य कार्यं, संयमितं शुभं च स्यात्। सत्संकल्पवाणी सम्यक्कर्मकरणे सहायिका भवति। अहिंसा, सत्यम्, अस्तेयम्, इन्द्रियसंयमादयः "सम्यक् कर्म" इति मन्यन्ते।

**उत्तमा जीविका** ( सम्मा आजीव )

शिक्षितमनुष्यजीवने व्यवहारे च एतादृशप्रकारेण परिवर्तनं वाञ्छितं भवति यत् सः शुद्धोपायेन स्वपरिवारपालनं पोषणं च कुर्यात्। जीवने धर्मोचितमार्गानामनुसारणम्, अनुचितोपायानां परित्यागश्च शिक्षितमनुष्यस्य लक्षणं भवति। शुद्धोपायैः आत्मानः आजीविकोपार्जनकरणरूपशिक्षणदानं शिक्षायाः प्रमुखोद्देश्यं भवति।

**युक्तव्यायामः** (सम्मा वायाम)

सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यक्वाणी, सम्यक् कर्म एवं सम्यक् आजीविका इति गुणानां विकासात्परमपि ततः पूर्वं विद्यमानकुसंस्काराणां कारणात् सन्मार्गात् विचलितः भवेत् । एवं मनसि पुनः दुष्टविचाराः उत्पद्येरन्। अतः शिक्षितव्यक्तिः पूर्वोक्तसम्यग्दृष्टप्रभृतीन् सर्वान् विषयान् निरन्तरमभ्यस्येत्।

१) तेन पूर्वं विद्यमानदुष्टभावानाः सम्पूर्णतया विनिष्टाः स्युः।

२) पुनः नूतनदुष्टविचाराः मनसि न प्रविष्टाः भवेयुः।

३) मनः शून्येन न भवितव्यम्, अतः सदा समीचीनविचारैः परिपूर्णं स्यात्।

**उत्तमस्मृतिः** (सम्मा सति)

शिक्षितव्यक्तिः अधीतविषयान् वारं वारं स्मरणं कुर्यात्। तेन अज्ञानान्धकारो नश्यति।

**उत्तमः समाधिः** (सम्मा समाधि)

उपर्युक्तसप्तगुणाः यस्य पुरुषस्य जीवने अथवा चरित्रे अङ्गानि भवन्ति, सह पुरुषः सम्यक् समाधिप्रवेशयोग्यतां प्राप्नोति। सम्यक् समाधिः निर्वाणप्राप्तये प्रथमावस्था भवति। कालान्तरे बौद्धशिक्षाप्रणाल्यां जैनव्यावहारिकोद्देश्यानां स्थानं प्राप्तं वर्तते। तान्युद्देश्यानि अधुनातनशिक्षायाः उद्देश्यानीति वक्तुं शक्यन्ते।

### १) नैतिकजीवनम्

भगवान् बुद्धः नैतिकजीवनं शिक्षायाः एकं प्रमुखं लक्ष्यमिति मनुते। उपदेशैः साकं मठे विहारेषु च वातावरणं छात्रचरित्रनिर्माणसहायकमासीत्। आचार्यस्य मुख्यकार्यं शिष्याणां नैतिकजीवनस्य विकासः आसीत्। चरित्रनिर्माणार्थमावश्यकनियमानां निर्धारणमपि क्रियते स्म।

### २) व्यक्तित्वस्य विकासः

आत्मनिर्भरता, आत्मसंयमः, आत्मविश्वासः, विवेकादिगुणानां विकासः, शिक्षायाः द्वितीयं प्रमुखं लक्ष्यमासीत्।

### ३) संस्कृतेः संरक्षणम्

बुद्धोपदेशान् एवं भारतीयसांस्कृतिकाव्यवहारं विद्यार्थिनां हस्तान्तरीतकरणं एकं लक्ष्यमासीत्। भिक्षवः स्वयम् अधीत्य जीवने परिपालनं कृत्वा अन्येभ्यो शिक्षां दास्यान्ति । एवं संस्कृतेः सरंक्षणं भवति।

### ४) सर्वाङ्गीणविकासः

बौद्धशिक्षाप्राणाल्यां शरीरिकव्यायामः, मानसिकशिक्षा, नैतिकजीवनमित्यादि विभिन्नप्रकारककविकासानामुपरि ध्यानमासीत्।

**छात्रस्वरूपम्**

बौद्धदर्शनस्य "मध्यमप्रतिपदा" (Middle path) सिद्धान्तानुसारं छात्रस्य अतीतस्थित्यानुसारं तस्य भाविस्थितिः भवति। छात्रस्य वर्तमानमस्तित्वं तस्य पूर्वजन्मकर्म तथा बाल्यावस्थायाः संस्काराणामुपरि आधारितो भवति। यत्किमपि अकस्मात् नैव भवति। अध्यापनकार्ये छात्रजीवनविषयकः एतादृशदृष्टिकोणः अत्यन्तमावश्यकं भवति। अध्यापनात्पूर्वं छात्रस्य स्थितेः ज्ञानमध्यापकस्य अत्यन्तम् आवश्यकं भवति। तत् ज्ञानं विभिन्नक्षेत्रेषु अथवा विभिन्नछात्रेषु निहितां एकतामवगामयति। छात्रेषु विद्यामानभिन्नतायाः कारणमपि प्रस्तुतीकरोति। बालकस्य वर्तमानस्वरूपं पूर्वसंस्काराणां परिणामः भवति। सर्वेषां छात्राणाम् अतीतः कालः एकरूपेण न भवति। अतः तेषु विभिन्नता स्वाभाविकी भवति। प्रत्येकं छात्रस्य अध्ययनक्षमताऽपि एकरूपेण न भवति, अतः प्रत्येकं छात्रस्तरानुरूपम् अध्ययनाध्यापनक्रियायाः संयोजनम् अध्यापकस्य कर्तव्यं भवति। इत्थम् अध्यापकः बालकं समीचीनव्यक्तिरूपेण, नागरिकरूपेण च कर्तुं शक्नोति। अतः बौद्धदर्शनस्य सिद्धान्तानुसारं भाविविकासक्षमता वर्तमानास्तित्वस्योपरि आधारिता भवति। वर्तमानमानाद् भिन्नं किमपि सिध्यति। किमपि कार्यं विना कारणं न भवति। भाविकार्यस्य बीजं वर्तमानकारणे अवलोकयितुं शक्नुमः। अयं "कारणकार्यनियम" एव बौद्धदर्शने "प्रतीत्यसमुत्पादनियमः" इति कथ्यते" पूर्वोक्तकथनेन एवं न मन्तव्यम्, बौद्धदर्शानानुसारं छात्रस्य गतिः पूर्वनिर्धारिता एव भवति, अध्यापकः स्वेच्छया किमपि कर्तुं न शक्नोतीति। बौद्धदर्शने कारणकार्यसम्बन्धेन साकं एवमपि प्रतिपादितं दृश्यते छात्रस्य भविष्यत् सम्यक् संकल्पस्योपरि अपि निर्भरो भवतीति। अस्मिन् दर्शने विश्वस्य अध्यापकः छात्रस्य भविष्यं लक्ष्यं वा निर्धारयितुम् शक्नोति। छात्रस्य क्षमतानुरूपं पाठ्यक्रमस्य व्यवस्थामपि कर्तुं शक्नोति। एवं छात्रस्य कृते भाविजीवनं, दिशानिर्धारणं, मार्गदर्शनं च करोति। बौद्धदर्शने जातिभेदाः न गणिताः, तथा सर्वेषां मनुष्याणां कृते शिक्षां सुलभां कर्तुमिच्छन्ति। शिक्षा प्रत्येकं मानवस्याधिकारः वर्तते। निर्वाणं प्रत्येकं मनुष्यस्य लक्षम् अस्ति। अतः निर्वाणप्राप्तये मार्गप्रदर्शनाय समेषां शिक्षा सुलभा भवति।

**शिक्षकः**

अस्मिन् दर्शने शिक्षकैः अवश्यम् चत्वारि आर्यसत्यानि ज्ञातव्यानि वर्तन्ते। एवम् स्वयं जीवने बुद्धेन प्रतिपादिताष्टङ्गमार्गानुरूपप्रवर्तकोऽपि भवेत्। जैनदर्शनवत् बौद्धदर्शनेऽपि द्विप्रकारकशिक्षककल्पना वर्तते। आचार्यः उपाध्यायः च इति। आचार्यः छात्रानुशासनाधिकारी भवति। उपाध्यायः अध्यायनाध्यापनस्याधिकारी भवति। बौद्धदर्शने शिक्षायाः स्थानं महत्त्वमूर्णं वर्तते। बौद्धशिक्षाप्राणाल्याम् आधुनिकसंस्थागत (Institutionalized) शिक्षायाः स्वरूपं दृग्गोचरं भवति। यत्र एकाचार्याधीने नैके उपाध्यायाः, एवं प्रत्येकोपाध्यायस्य समीपे छात्राणामेकः अल्पः समूहः भवति स्म। अध्यापकेषु स्नेहपूर्णपारस्परिकसम्बन्धान् स्थापयितुं आचार्यः शास्त्रसम्मतानां केषाञ्चन नियमानां निर्धारणं करोति। एवम् उपाध्यायस्य कार्यम् अध्ययनमध्यापनं च भवति।

आचार्यस्य कार्यं न केवलं छात्रेषु अनुशाससम्पादनम्, किन्तु उत्तरदायिनां शिक्षकाणां मध्येऽपि अनुशासनस्थापनम्।

**पाठ्यक्रमः**

बौद्धदर्शनानुसारं जगत्परिवर्तनशीलं भवति। मनुष्योऽपि परिवर्तनशीलः भवति। संसारे किमपि स्थिररूपेण न तिष्ठति। आत्मापि स्थायी नास्ति। सर्वं क्षणिकं परिवर्तनशीलं च वर्तते। बौद्धदर्शने मूलवादः, दुःखवादः, दुःखात् मुक्तिं प्राप्तुम् उपायान्वेषणं च। पूर्वोक्तचिन्तनानुसारं बौद्धशिक्षादर्शने पाठ्यक्रमः एवं स्यात्।

१) चतुर्णाम् आर्यसत्यानां पूर्णपरिपाकज्ञानम्। जगति मनुष्यस्थानम्, जगतः कार्यव्यापारः, जगतः परिवर्तनीयता, क्षणिकता, कार्यकारणसम्बन्धः इत्यादिविषयेषु गहनाध्ययनम्। अन्यदर्शनैः अस्माकं बौद्धदर्शनस्य तुलना, एवं बौद्धसिद्धान्तानां प्रतिपादनम्।

२) समीचीनरुपेण च आजीविकोपार्जनकौशलम्।

३) बौद्धसाहित्यस्य अध्ययनम्।

४) भगवतः बुद्धस्य अन्येषाञ्च जीवनचरित्राणामध्ययनम्। अनन्तरकाले बौद्धशिक्षाप्रणाल्यां प्राठ्यक्रमः विस्तृतो जातः। बौद्धविहारेषु मठेषु च पञ्चधा विद्यानामध्ययनम् अध्यापनम् प्रावर्तत।

५) शब्दविद्या – अत्र शब्दनिर्माणं, व्युत्पत्तिः, व्याकरणाज्ञानञ्च भवति।

६) शिल्पासनविद्या – अस्मिन् विभिन्नप्रकारकलाः उद्योगाश्च भवन्ति।

७) चिकित्साविद्या – अस्याम् औषधविज्ञानं, शरीरविज्ञानम् इत्यादिविषयाणां समावेशः वर्तते।

८) हेतुविद्या – अस्यां तर्कशास्त्राध्ययनं भवति।

६) अध्यात्मविद्या – अत्र बौद्धदर्शनेन साकम् अन्येषां दर्शनानां तुलनात्मकमध्ययनं दृश्यते। एतदतिरिक्ततया मठेषु विहारेषु च व्यायामः क्रीडा इत्यादिषु विषयेष्वपि अवधानमदुः। स्वस्थपुरुषः एव कार्यं प्रभवति अतः स्वास्थ्यसम्पादनार्थमेते विषयाः प्रबोधिताः।

**शिक्षणविधिः**

बौद्धविहारेषु शिक्षाप्रदानाय त्रयाणां प्रमुखविधीनाम् उल्लेखः उपलभ्यते।

**व्याख्यानम्**

व्याख्यानं युगपदेव नैकशिष्याणां कृते क्रियते। व्याख्याता स्वविषये निष्णातः स्यात्। अस्मिन् विधौ शिक्षाप्रक्रिया एकमङ्गं भवति। अध्यापकः विषयं पूर्णरूपेण प्रस्तौति। परन्तु छात्रः स्वस्य क्षमतानुसारं गृह्णाति। अध्यापकेन अल्पसमूहस्य शिक्षा दीयते। अस्मिन् विद्यौ अध्यापकः ५–६ छात्रेभ्यः युगपदेव शिक्षां ददाति। अद्यापनीयवस्तु प्रथमतया स्वयमध्यापकः वाचनं करोति। छात्राः शृण्वन्ति। अनन्तरं छात्रः अनुवाचनं करोति। अध्यापकः अशुद्धिसंशोधनेन साकं पुनः पुनः वाचयित्वा अभ्यासं कारयति। अधीतविषयवस्तुनः, अथवा सूत्रबद्धज्ञानस्य, अध्यापकः व्याख्यां करोति। छात्रः मध्ये मध्ये शङ्कामुपस्थापयति। अध्यापकः छात्रशङ्काः निवारयति। इयं प्रक्रिया छात्राणां स्पष्टावगमनपर्यन्तं प्रवर्तते।

**चर्चा**

जटिलदार्शनिकसिद्धान्तानां, अधीतविषयवस्तुनः च परस्परचर्चा भवति। सामूहिकाध्ययनविधीनां

विवेचनं च लभ्यते। ते क्रमेण –
१) सूत्राणां पुनः पुनः वाचनेन कण्ठस्थीकरणम्।
२) तथ्यानां स्मरणम् सञ्चयनञ्च।
३) अधीतविषयवस्तुनः पौनःपुन्येन मननम्।
४) मननात् आत्मसाक्षात्कृतविषयवस्तुनः धारणम्। पूर्वोक्तरीत्या ज्ञानस्य फलस्वरूपेण दुःखानां निवारणं, तेन 'आनन्दप्राप्तिः'। अस्याः अवस्थायाः विवरणं "सम्मासमाधि" मध्ये अन्तर्गतं भवति। सम्मासमाधौ चतस्रः अवस्थाः भवन्ति। प्रथमावस्थायां शान्तचित्तेन आर्यसत्यानामुपरि तर्कवितर्कः विमर्शनं च भवति। शुद्धविचारेण साधकः अपूर्वशान्तेः आनन्दस्य च अनुभवं प्राप्नोति। इयं शुद्धतः वैचारिकशान्तिः भवति। द्वितीयावस्थायां सन्देहनिवृत्तिकारणात् आर्यसत्येषु श्रद्धा एधते। तर्कवितर्कयोः आवश्यकता अत्र न भवति। इयं प्रगाढचिन्तनस्य, चित्तस्थिरतायाश्च स्थितिः भवति। अस्यामवस्थायां ज्ञानं तेन साकं शान्तेश्च आगमनं भवति। तृतीयावस्थायां चित्तम् आनन्दस्य शान्तेश्च भावं दूरीकृत्य उपेक्षाभावस्य आनयने प्रयत्नो विधीयते। अस्मिन् प्रयत्ने चित्तस्य साम्यावस्था अनया साकं दैहिकसुखभावोऽपि सम्भावति। चतुर्थावस्थायां चित्तस्य साम्यावस्था। दैहिकसुखात् ध्यानात् लब्धानन्दादपि च साधकः विरक्तः भवति। चित्तवृत्तीनां निरोधः भवति। अस्यामवस्थायां पूर्णशान्तिः, पूर्णविरागः, पूर्णनिरोधः च भवति। इयं पूर्णप्रज्ञायाः अवस्था।

**बौद्धशिक्षायाः मूल्यानि**

सम्पूर्णबौद्धशिक्षाप्रणाली बौद्धदर्शनस्य मध्यमा–प्रतिपदा– सिद्धान्तः परिलक्षितः भवति। बौद्धदर्शने जीवनस्य यस्य कस्यापि एकान्तिकमूल्यस्योपरि आग्रहप्रदर्शनं न दृश्यते। जैनमतसदृशं पूर्णविरगस्योपरि आग्रहोऽपि न भवति, चार्वाकदर्शनवत् केवलसांसारिकसुखमेव सर्वस्वमिति भावनापि नास्ति।

**१) आध्यात्मिकव्यावहारिकविषययोर्मध्ये मध्यममार्गः**

बौद्धशिक्षापाठोक्रमस्य अवलोकनेन अयं विषयः स्पष्टः भवति, यत् बौद्धदर्शने, एकत्र बौद्धधर्मशिक्षायामाग्रहः वर्तते चेदपि अन्यत्र व्यावहारिकज्जीवनस्य शिक्षायामुपेक्षा नैव कृता। अतः एकत्रनिर्वाणासाधनीभूतध्यानचिन्तन मननादीनाम् आवश्यकता प्रदर्शिता। अन्यत्र आजीविकार्जनाय शिक्षायामपि बलमदात्।

**२) नैतिकमूल्यम्**

बौद्धदर्शने प्रस्तावितमनुष्यव्यक्तित्वस्य विश्लेषणद्वारा एतत् स्पष्टं भवति यत्, मनुष्यविकासे नैतिककारणकार्यसिद्धान्तः भागं वहति। अस दर्शन्सस्याधारेण अस्माकं संकल्पः अस्मान् निश्चयरूपेण नैतिकान् करोति। बौद्धःदर्शने प्रतिपादितद्वादशनिदानानां (जन्म–मरणस्य कारण–सिद्धान्तः) अनुसारेण सर्वसृष्टिः अस्माकं संकल्पस्य परिणाम एव भवति। अतः यदि वयं सत्संकल्पं कुर्मः तदा निश्चितरुपेण नैतिकाः भवेम।

**३) शरीरिकमूल्यम्**

यद्यपि आकाङ्क्षानां त्यागः, तथा इन्द्रियाणां निग्रहः नैतिकजीवनाय आवश्यकं भवति। तथापि शरीरिकस्वास्थस्य उपेक्षा नैवोचिता। शरीरस्य स्वास्थ्यं नितरामावश्यकम्। अन्यथा विवेकदीपस्य

प्राज्वलनं नैव कर्तुं शक्यते, तथा  मनसः अपि स्वच्छता, दृढता अपि न भवति।

**४) आर्थिकमूल्यम्**

बौद्धदर्शने सांसारिकसुखानां त्यागार्थम् उपदेशः कृतः। एवम् उचितविधिद्वारा अजीविकार्जनेऽपि उपदेशः कृतः। विहारेषु यद्यपि यः कोऽपि भिक्षुः सम्पत्तिं स्थापतितुं न शक्नोति। परन्तु संघस्य सम्पत्तिस्थापने अधिकारः वर्तते। एवं आर्थिकमूल्यस्तोपेक्षाम् अकृत्वा, तथागतः अस्यापि मध्यममर्गे अवलम्बनार्थं उपदेशमदात्।

**४) सामजिकमूल्यम्**

अन्यभारतीयदर्शनानाम् आग्रहः वैयाक्तिकोन्नतेः, तथा वैयक्तिकविकासस्योपरि अस्ति। अतः अध्यापनप्रणाल्यपि वैयक्तिकी कृता। बौद्धशिक्षाप्रणाल्याम् अत्यल्पसमूहेषु शिक्षाप्रादानप्रक्रिया आरब्धा दृश्यते। एतेषु समूहेषु  शान्तिस्थापनार्थं, समन्वयार्थं च अनुशासननियमानां निर्माणं कृतम्। एवं प्रकारेण सामाजिकनियमानां पालनेऽपि  आग्रहः स्थापितः।

बौद्धदर्शनानुसारं मनुष्यः यत्किमपि कार्यं करोतु, तत्र नैतिकज्जीवनस्य पालनमावश्यकम्। समाजहिताय आत्मार्पणं कृत्वा मनुष्यः सुखं, शान्तिं, आनन्दं च प्राप्तुं शक्नोति। तृष्णा, आकाङ्क्षा–दिस्वार्थप्रवृत्तयः दुःखमात्रकारणानि भवन्ति।

सम्पूर्णबौद्धशिक्षाप्रणाली भगवतः बुद्धस्य मध्यमप्रतिपदा परिलक्षिता भवति।

# अभिक्रमितानुदेशनसामग्रीणां निर्माणम्

**डा. हरिप्रसाद के**

सहायकप्राध्यापकः

अभिक्रमितानुदेशनस्य स्वरूपज्ञानात्परं एतत्तु स्पष्टं भवति यत् अभिक्रमितानुदेशनसामग्री–निर्माणम् सरलं नास्ति इति। यतो हि पारम्परिकपाठेषु अनुभूयमानानां काठिन्यानां दूरीकरणपुरःसरं अध्यापकस्य साहाय्येन विना एव छात्रः स्वयमेव अधीत्य यथा विषयं अवगच्छेत् तथा पाठाः लेखनीयाः। अधीतस्य विषयस्य दार्ढ्यं, जामीताजाड्यादिकं अननुभवन् छात्रः सोत्साहं प्रेरणां प्राप्नुवन् यथा सम्पादयेत् तथा अभ्यासक्रमः संयोजनीयः। मनोवैज्ञानिकक्रमेण पाठ्यांशं विभाज्य "सरलात् कठिनं प्रति" इत्यादिशिक्षणसूत्राणि आश्रित्य सोपानानि/पदानि निर्मातव्यानि सन्ति। अतः एतादृशस्य जटिलकार्यस्य सम्पादनक्रमः कः इति अवलोकयामः।

1. अभिक्रमितानुदेशनसिद्धता (Preparation of the Programme)
2. अभिक्रमितानुदेशनसामग्रीलेखनम् (Writing of the Programme)
3. मूल्याङ्कनस्तरः (Testing or Evaluation)

**अभिक्रमितानुदेशनसिद्धता** (Preparation of the programme)

1. विषयचयनम् (Sellection of Topic)
2. अध्येतुः विषये पूर्वधारणानां निश्चयः (writing assumptions about Learner)

3. व्यावहारिकोद्देश्यानां निश्चयः (Determination of objectives in behaviour terms)
4. अध्येतुः आरम्भिकव्यवहारस्य अभिज्ञानम् (Writing the Entry behaviour of the Learner)
5. अध्येयविषयस्य विशिष्टप्रारूपनिश्चयः (Developing specific Outlines of Content)
6. परीक्षणप्रश्नानांसिद्धता (Preparing a Criterion Test)

**अभिक्रमितानुदेशनसामग्रीलेखनम्** (Writing of the Programme)

1. सोपानानां/पदानां(Frames) संरचना

अभिक्रमितानुदेशनस्य सोपानानां रचनावसरे प्रतिसोपानम् इमे अंशाः अवश्यं भवेयुः यत्– शिक्षणपदम् (Teaching Frames), अभ्यासपदम् (Practice Frames.), परीक्षणपदम् (Testing Frame.), छात्राणां कृते निर्देशानात्मक–उपबोधनम् (Guide to Student Responses) चेति। एतानि पदानि अवान्तरपदानि इत्यपि उच्यन्ते। शिक्षणपदे सरलात् कठिनं प्रति इत्यादि शिक्षणसूत्राण्याश्रित्य समुचितसकालिकपुनर्बलनेन सह विषयस्य प्रस्तुतिः भवति। विषयस्य लाघवं, भाषायाः सारल्यं, शैल्याः आकर्षकत्वं च छात्रस्य अध्ययनार्थं प्रेरणां उत्पाद्य शिक्षणपदस्य साफल्यं साधयति। अभ्यासपदम् आश्रित्य छात्रः शिक्षणपदे ज्ञाते विषये दाढर्य्यं प्राप्नोति। परीक्षणपदे छात्रः स्वाधीतविषयं आश्रित्य आत्ममूल्याङ्कनं कर्तुं अवसरं प्रप्नोति। शिक्षणपदे अधीते विषये, अभ्यासपदे दाढर्य्यं सम्पाद्य, परीक्षणापदे च आत्ममूल्याङ्कनं कृत्वा छात्रः निर्दिष्टविषये सामर्थ्यं स्वयमेव आसादयति। ततः परं अग्रिमपदे छात्रस्य कृते अग्रिमाध्ययनार्थं सन्देहनिवृत्यर्थं वा समुचितनिर्देशाः दीयन्ते। इत्थं अभिक्रमितानुदेशनसामग्रीनिर्माणे छात्रस्य विकासानुकूलतया अवधानं दीयते चेत् सामग्रयाः प्रयोजनं स्वाध्यायाध्येतृभिः प्राप्यते।

**2. पदानां पौर्वापर्यसम्पादनम्** (Sequencing of Frames)

अभिक्रमितसामग्रीनिर्माणवेलायां पदानां पौर्वापर्यनिश्चयोऽपि अत्यन्तं प्राधान्यम् आवहति। परस्परं सम्बद्धानि पदानि उत्तरोत्तरविकासानुकूलतया सम्पादनीयानि। पदानां परस्परं सम्बद्धता भवति चेदेव पठकानां पठने प्रवृत्तिर्जायते। अन्यथा मनस्तेषां अध्ययनात् निवर्तते। अध्यापकाख्यं बाह्यं प्रेरकतत्वं अत्र न भवति इति हेतोः पिपठिषूणां इच्छायाः/अभिरुचेः संरक्षणार्थं महानुद्यमः कर्तव्यो भवति। तत्र कश्चन मार्गः पदानां पौर्वापर्यक्रमसम्पादनम् इति। अयं मार्गः छात्राणां अध्ययने उत्पद्यमानां असम्बद्धतां निवार्य अध्ययनप्रवाहस्य संरक्षणं करोति।

3. अभिक्रमस्य सम्पादनम् (Editing of the Programmes)

सामग्रीलेखने अन्तिमचरणं इदमस्ति यत् अभिक्रमस्य सम्पादनम् इति। आहत्य समग्र्याः अन्तिमस्वरूपदानं अत्र भवति। विषयभाषाप्रतिपादनसाधनादिषु सञ्जातानां दोषाणां निर्मूलनपुरस्सरम् अन्तिमस्वरूपदानार्थं अत्र उद्यमः क्रियते।

**मूल्याङ्कनस्तरः** (Testing or Evaluation)

निर्मितसामग्र्याः परीक्षणं तु बहुधा क्रियते। सामग्री उपयोगार्थं अर्हा वा न वेति विभिन्नाः विद्वांसः परीक्षेरन्। एवं च सक्षात् छात्राः तस्य उपयोगं कृत्वा प्रतिक्रियां दद्युः। तदर्थं काचित् व्यवस्था इत्थं कल्पिता वर्तते –

**1. व्यक्तिशः परीक्षणम्** (Individual Testing)

केचन विषयविशेषज्ञाः विद्वांसः, केचन भाषाविशेषज्ञाः, केचन अभिक्रमपद्धतिविशेषज्ञाश्च व्यक्तिशः

सामग्रीमेनां परीक्षेरन् इति एतस्य अभिप्रायः।

**2. लघुगणेषु परीक्षणम्** (Small Group Testing)

अत्र विदुषां कश्चन समवायः सम्भूय मन्थनं कृत्वा सामग्र्याः अस्याः परीक्षणं करोति।

**3. क्षेत्रीयपरीक्षणम्** (Feild Testing)

इदं परीक्षणं छात्राणां न प्रत्युत सामग्र्याः इति भृशं स्मर्तव्यम्। किन्तु सामग्र्याः परीक्षणं छात्रपरीक्षणेनैव सम्भवति। क्षेत्रीयपरीक्षणमित्युक्ते साक्षात् यत्स्तरीयच्छात्रानुद्दिश्य सामग्री लिखिता वर्तते तत्स्तरीयेभ्यः एव छात्रेभ्यः तत्प्रदाय प्रतिक्रियायाः प्राप्तिः। अनेन इदं ज्ञायते यत् छात्राः सामग्रीतः कियता कात्रेण प्रयोजनं प्राप्तुमर्हन्ति इति मात्रात्मकपरिणामज्ञा।

# ह्यूरिस्टिक् विधिः

**डा.पि.अरविन्दकुमारसोमदत्तः**

अतिथिप्राध्यपकः

शिक्षाक्षेत्रे दिनानुदिनं सामान्यो विशिष्टो वा विधिः अन्विष्टः, आविष्कृतो वा भवति। नवपद्धतिरपि वातावरणानुगुणं स्वतन्त्ररूपेण आविष्कृता भवति। यथा – हरबर्टीयपञ्चपदी, माण्टेसरी–बालोद्यान–पद्धतयः, आगमनिगमनविधिः एवं आगमनसमस्याविध्योः संयोजनेनाविष्कृतोयं विधिः ह्यूरिस्टिक् विधिरिति नाम्ना प्रथते। शिक्षाक्षेत्रे अस्य विधेः असाधारणं स्थानं वर्तते।

ह्यूरिस्टिक् विधेः प्रमुखानि उद्देश्यानि –

१) परिश्रमः, निरीक्षणं, चिन्तनमित्येषां महत्वप्रतिपादनम्।

२) अनुसन्धानतत्वानां परिचयः।

३) छात्रेषु वैज्ञानिकासक्तेः प्रवृत्तेश्च संवर्धनम्।

४) स्वाध्यायान्मा प्रमदितव्यमितिज्ञानोत्पादनम्।

५) स्वप्रयासैरधिगततत्वानां व्यवस्थापनाय नियमनाय च प्रशिक्षणम्।

६) स्वीयानुभवानां तर्कसङ्गतरीत्या व्यवहारे नयनम्।

७) तत्वज्ञानं कथं प्राप्नुयाच्छात्र इति विषये प्रशिक्षणम्। इत्येतानि ह्यूरिस्टिक् विधेः प्रमुखन्योद्देश्यानि भवन्ति।

**ह्यूरिस्टिक् विधेः आधरभूताः सिद्धान्ताः**

आर्मस्ट्रांग महोदयः स्व ह्यूरिस्टिक् विधिम् केषाञ्चित् सिद्धान्तानामाधारेण समकल्पयत्। सामान्यतया प्रचारे व्यवहारे वा यो विधिः वर्तते तत्र सिद्धान्ताः अन्विष्य ज्ञायते। परन्तु अत्र विधिः वास्तविकरूपेण मनोवैज्ञानिकसिद्धान्तानामाधारेण कल्पितो वर्तते। वस्तुतः इयमेव औपचारिकता नवविधीनामन्वेषणात् शिक्षशास्त्रिणः उद्घोषयन्ति। तथोपि। Armstrong महोदयः आवश्यकतां केचन वर्तन्ते। यथा –

१) विधिः प्रमुखेन क्रियाशीलता, सिद्धान्तमनुसरति यतः छात्रः सक्रियः भूत्वा शिक्षते।

२) कार्यमुखादधिगमः इति सिद्धान्तमाधारीकृत्य तिष्ठति, छात्राः निरीक्षणं, तत्त्वानाम् संकलनं, नियमनिर्धारणं इति सर्वं कार्यं सम्पाद्याधिगमं प्राप्नुवन्ति।

३) रुचेः सिद्धान्ताः।

४) प्रेरणसिद्धान्तः।

५) प्रयात्नसिद्धान्तः।

६) अनौपचारिकसिद्धान्तः।

७) विकासात्मकसिद्धान्तः इति विविधसिद्धान्तान् पुरस्कृत्य विधिरयं प्रवर्तते।

**ह्यूरिस्टिक् विधौ शिक्षकस्य स्थानम्**

अत्र विधौ छात्राः स्वयमेव सर्वं कृत्वोवगच्छति, अतः अध्यापकः अनपेक्षितः इति न वाच्यम्। वस्तुतः अध्यापकस्य महत्यावश्यकता वर्तते। अत्र अध्यापकस्य स्थानं भवेत् विवरणं निम्नांकितं वर्तते।

१) अध्यापकः विषयज्ञः प्रतिभावान् च स्यात्।

२) सः अल्पमेव बोधयेत्, छात्राः तस्मात् संसूचनं प्राप्य अग्रेसरेयुः।

३) अध्यापकः वैज्ञानिकविषयाणां ज्ञाता, निरीक्षकश्च भवेत्।

४) साधनानि विषयाश्च कृतो लभेरन्निति मार्गप्रदर्शकः।

५) सः तत्वं जानन्नपि यावत् छात्राः स्वयं न अवगच्छन्ति, तावन्न वदेत्। ज्ञाने मौनं कष्टमेव, तथापि पालयेत्। यदि छात्राः सर्वथा न अवगच्छन्ति, तर्हि भीतं सम्बोध्याग्रेसारयेत्।

६) प्रश्नकरणे कुशली स्यात्, यतः अयं विधिः प्रश्नानामाधारेणैव तत्त्वमवगमयति। यथापेक्षमेव मार्गदर्शनं कुर्यात्।

७) छात्राणां समस्याः प्रतिपदमवगत्य समाधानं कुर्यात्।

८) सूक्ष्मनिरीक्षकः।

६) सामजिकज्ञानयुक्तः।

१०) आदर्शवादीयगुणयुक्तः, विषयज्ञः, ज्ञानवान् च भवेत्।

**ह्यूरिस्टिक् विधौ निम्नाङ्कितपञ्चपदानि प्रयुज्यन्ते**

१. समस्यायाः प्रस्तावः – अध्यापकः पाठ्यविषयसम्बद्धां कामपि समस्यां कक्षायां प्रस्तूयात्। समस्यां तथा उद्घोषयेत् यथा छात्राः सावधाना भवेयुः छात्रेषु तादृशी भावना उदीयात्, समस्या पाठसम्बद्धा,उपयोगिनी चेति।

२. तत्वानां निरीक्षणं, सारणीकरणम् – अत्र छात्राः समस्यां समाधातुमावश्यक तत्त्वानि, उपकरणानि च स्वयमन्विष्य एकीकृत्य सारणीकरणं कुर्वन्ति। सारणीकरणेन विश्लेषणे सौलभ्यं जायते।

३. परिकल्पना – अत्र बालकाः स्वसंकलितविषयाणां निरीक्षणपूर्वकं सन्तर्क्य कामपि परिकल्पनामुचितां स्वसमस्यायाः समाधानत्वेन निश्चिन्वन्ति।

४. परीक्षणम् – स्वकृतां परिकल्पनां छात्राः विविधैः प्रमाणैः अध्यापकस्य सहयोगेन परीक्षन्ते।

५. नियमनिर्धारणम् – परीक्षणानन्तरं छात्रैः कश्चित् नियमः निर्धार्यन्ते। यदि परिकल्पना पूर्णता साध्वी तां नियमत्वेन स्वीकुर्वन्ति छात्राः। परीकल्पनायां परिवर्तनस्यावश्यकता भवति चेत्, तदनुपरिवर्त्य

नियमनिर्धारणं कुर्वन्ति। यथा अत्र परीक्ष्य परिकल्पनां नियमयन्ति छात्राः। एतेन छात्राः ह्यूरिस्टिक् विधौ स्वयं सक्रियाः सन्तः तत्त्वं संकलय्य, परीक्ष्य, नियमं निर्धार्य ज्ञानं प्राप्नुवन्ति।

# सा विद्या या विमुक्तये

**राजेशभट्टः** अनुक्रमांकः – 01
शिक्षाशास्त्रिद्वितीयवर्षः

विद्या शब्दस्य ज्ञानमित्यर्थः। विद् ज्ञाने इति धातोः रूपमेतत्। विद्यते अनया विदन्त्यनेनेति वा विद्या शब्दस्य व्युत्पत्तिः। कस्यचिदपि वस्तुनो विषयस्य वा सम्यक् ज्ञानं विद्येत्यभिधीयते। वेदशास्त्रविज्ञानादीनां साध्वनुशीलनं तत्त्वार्थज्ञानं च विद्येति स्वीक्रियते।

विद्येव मित्रं विदेशगमनेऽपि। विद्यायाः कारणात् मनुष्यः स्वदेशे एव नैव अपि तु विदेशेष्वपि सर्वत्र पूज्यते। सर्वप्रथमं तु छात्रे आत्मानुशासनं भवेत्। यदि आत्मानुशासमस्ति इति चेत् संस्काराः उत्पद्यन्ते। संस्काराः सन्ति चेत् विनयशीलता स्वयमेवायाति। शिक्षया अथवा विद्यया अपि विनयः आयाति।

ज्ञानं लौकिकमलौकिकं चेति द्विविधं भवति। तयोरेव पराविद्याऽपराविद्या इति नामनि स्तः। सम्पूर्णवैदिकसाहित्यं पराविद्या इति नाम्ना कथ्यते। उपनिषदामनुसारं द्वे विद्ये पराऽपरा च। तत्र अपरा वेदवेदाङ्गानि च। अर्थात् तत्रापरा ऋग्वेदो यजुर्वेदस्सामवेदोऽथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषामिति। यया लौकिकं ज्ञानं जायते साऽपरा विद्या। परा यया तदक्षरमधिगम्यते। यया च अक्षरब्रह्मविषयकं ज्ञानं जायते सा पराविद्या (मुण्डक.उ.१/१/४,५)। शास्त्रकारैः विद्या द्विधा प्रतिपादिता। शास्त्रविद्या शस्त्रविद्या च। शस्त्रविद्या वृद्धावस्थापतिते केवलं हास्यायैव भवति। शास्त्रविद्या सततं वृद्धिमाप्नोति। यथा मानवस्य आयुः वर्धते तथा विद्याऽपि वर्धते। शस्त्रविद्या तु क्षीणकायशक्तौ शनैः शनैः क्षीणतां प्रयाति। यथा –

**शस्त्रविद्या च शास्त्रं च द्वे विद्ये प्रतिपत्तये।**
**आद्याऽऽस्याय वृद्धत्वे द्वितीयाऽद्रियते सदा।।**

विद्याधनं प्रधानमस्ति। कस्यापि विषयस्य वस्तुनः च ज्ञानं विद्यामाध्यमेनैव भवति। विद्या तु मनुष्यस्य तृतीयं नेत्रमपि भवति। अर्थात् वेदानामध्ययनं तत्त्वार्थज्ञानमेतेषामनुशीलनं विद्यैव। विद्यैव तद्धनं यया सर्वोऽपि मानवीयमनोरथोऽभिलाषो वा पूर्यते। विद्ययैव कर्तव्याकर्तव्यज्ञानं धर्माधर्मपरिज्ञानं पुण्यापुण्यविवेकः लाभालाभावबोधश्च। विद्ययैव लक्ष्यनिर्धारणं लौकिकविषयव्याप्तिः भौतिकसुखसाधनं भूमोग्रहविभावादीनामवाप्तिश्च। अपरञ्च एतस्याः वैशिष्ट्यं यत् एतद्धनं न भ्रातृभाज्यं न नृपहार्यं न च भारकारी वर्तते। यया यथा विधीयते विभज्यते च, तथैव वृद्धिमश्नुते।

वस्तुतः अस्मिन् दुःखोदर्के संसारे विद्यायाः माध्यमेन दुःखसागरात् पारं गन्तुं शक्यते। दुःखानां मूले तु अविद्या एवास्ति। विद्यायाः प्रकाशैः अविद्यायाः सार्वकालिको विनाशो भवति। सदसद्वस्तुविवेको विद्यया एव भणितुं शक्नोति। अतः सर्वदा सर्वैः विद्या एव समाश्रयणीया आराधनीया च। कदाचिदपि विद्वत्त्वं नृपत्त्वं च न तुलनीयम्। विदुषां समक्षे महान्तः राजानः नतमस्तकाः भवन्तीति समवलोक्यते

सर्वत्र। विद्वांसस्तु सर्वत्र पूज्यन्ते। परन्तु स्वदेशे आदरभाजाः भवन्ति उक्तं च केनचित्–

**विद्वत्त्वं च नृपत्त्वं च नैव तुल्यं कदाचन।**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।**

एवं विद्या सभ्यसमाजे प्रशस्ता विहिता शास्त्रनिर्दिष्टा च भवति। अस्तु सुविद्या युक्ता न तु कुविद्या। कुविद्या सदैव मानवमन्धकारस्य अज्ञानस्य पतनस्य गर्ते निपातयति। तदेवोक्तं केनचिद्विद्वद्वरेण – सुकविता सुविद्या वा यद्यस्ति तर्हि राज्येन किम् ? इति। विद्या ज्ञानञ्चात्मशोधकं भवति। छलप्रपञ्चलिप्सागर्वप्रमादविलासादिनाशनं ज्ञानं विद्या। अनयैव विद्यया स्वात्मपरिष्कारः लोककल्याणं मोक्षप्राप्तिश्च भवति।

# अनुबन्धचतुष्टयनिरूपणम्

**सुजाता नाएक्** अनुक्रमाङ्कः – 03
शिक्षाशास्त्रिद्वितीयवर्षः

या कापि वा व्यक्तिः भवतु, कमपि ग्रन्थविशेषान् दृष्ट्वा आदौ एव चिन्तयति यत्– (क) ग्रन्थेस्मिन् कः विषयः वर्तते ? (ख) किम् अहं अमुं ग्रन्थं पठितुं शक्नोमि ? (ग) पुस्तकस्य नाम तस्मिन् अन्तर्गत विषयस्य च कः सम्बन्धः वर्तते ? (घ) ग्रन्थस्य अस्य अध्ययनेन मम किं प्रयोजनम्? इति।

एतत् सर्वं विचिन्त्य या कापि व्यक्तिः कस्यचित् पुस्तकस्य अध्ययने प्रवृत्ता भवति। मनोनुकूलता अस्ति चेदेव सा तं ग्रन्थम् आरम्भात् आन्तं यावत् सावधानेन पठति चिन्तनञ्च करोति। अत एव ग्रन्थकारः ग्रन्थस्य प्रारम्भे एव एतेषां तत्त्वानाम् उल्लेखं करोति। एतानि एव चत्वारि तत्त्वानि शास्त्रीयभाषया अनुबन्धचतुष्टयमिति कथ्यते। उक्तं च –

**ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रजोजनः।।** (वाचस्पत्यम्)

### वेदान्तशास्त्रे अनुबन्धचतुष्टयम्

वेदान्तदर्शनस्य मुख्यग्रन्थेषु ब्रह्मसूत्रादिषु अनुबन्धचतुष्टयस्य उल्लेखःविस्तारपूर्वकं कृतं वर्तते। तद्यथा –

### अधिकारी

अधिकारिस्तु विधिवदधीतवेदवेदाङ्गत्त्वेनपाततोऽधिगताखिलवेदार्थोस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितन्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता। अर्थात् स अस्याः वेदान्तविद्यायाः अधिकारी, इह जन्मनि जन्मान्तरे वा सविध्यधीताखिलवेदाङ्गाधिगतसकलतत्त्वः, काम्यनिषिद्धकर्मपरित्यागपूर्वकं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन विधूतसकलकल्मषस्वान्तः, नित्यानित्यवस्तुविवेकादिवक्ष्यमाण–साधनचतुष्टयसम्पन्नश्च भवेत्।

**विषयः**

अज्ञाननिमित्तकजीवब्रह्माध्यारोपितकिंचिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धधर्मपरित्यागानन्तर– मवशिष्टं यज्जीवब्रह्मैक्यरूपं शुद्धचैतन्यं तदेवाखिलवेदान्तवाक्यप्रतिपाद्यविषयः। अत्र जीव ब्रह्मैक्यानन्तरं शुद्धचैतन्योक्तिर्वेदान्तप्रतिपाद्यविषयः शुद्धचैतन्यमेवेत्यर्थे वर्तते, न पुनः पयः पानीययोः पारस्परिक–पार्थक्येऽपि मिश्रीभावेन तदैक्यमिव जीवब्रह्मणोः पार्थक्येऽप्येकत्वमित्यर्थम्, इत्यवधेयम्। 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिवेदान्तवाक्येषु अस्यैव चैतन्यस्य प्रतिपादनम्।

**सम्बन्धः**

जीवब्रह्मैक्यरूपप्रतिपाद्यविषयस्य (प्रमेयस्य) तत्प्रतिपाद्योपनिषद्वाक्यजातस्य (प्रमाणस्य) च बोध्यबोधकभावसम्बन्धः, तत्र च जीवः ब्रह्म जीवैक्यं बोद्यम्,तत्प्रतिपादकञ्च तत्वमसीत्यादि वाक्यं बोधकम्।

**प्रयोजनम्**

आत्मगताज्ञानतज्जन्यसकलप्रपञ्चनिवृत्तिपूर्वकस्वरूपपरिचयाखण्डानन्दावाप्तिरेव वेदान्त–शास्त्रप्रयोजनम् 'तरति शोकमात्मवित' ,'ब्रह्मविद् ब्रह्मैव भवति', इत्यादिश्रुतेः।

# मूल्यशिक्षा

**कन्हैया कुमार यादव** अनुक्रमांङ्कः–05
शिक्षाशास्त्रिद्वितीयवर्षः

**मूल्यशब्दस्यार्थः**

भारतीयधर्मग्रंथेषु मूल्यशब्दस्य प्रयोगः मानवीयगुणानां शीलशब्दार्थे विहितोऽस्ति। अयं मूल्यशब्दः आंग्लभाषायाः अंसनम इति पदात् निष्पन्नः जातः। Value इति शब्दः लैटिनभाषायाः Valere इति शब्दात् उत्पन्नोस्ति। यस्य चार्थः कस्यचन वस्तुनः मूल्यम्, गुणम्, विशेषताम्, योग्यताम्, उपयोगिताम् एवं महत्वम् वा सूचयति। जीवने शीलमेव" ( मूल्यम्) सद्गुणसाधनम् वर्तते। यत्र मूल्यम् तत्रैव धर्मः, सत्यम्, तेजः, बलम् च स्वमहत्ताम् प्रदर्शयन्ति। मूल्येन वा त्रिलोकमपि वयं जेतुं शक्यामहे। महाभारतमपि वक्ति –

**"शीलेन हि त्रयो लोकाः शाक्याः जेतुं न संशयः।**
**न हि किंचिदसाध्यं वै लोके शीलवतां भवेत्।।"**

**मूल्यानाम् परिभाषा**

Jhon.J.Kane ( जॉन, जे, काने) महोदयानुसारम् – " मानवमूल्यानि आदर्शरूपणि, विश्वासनीयरूपाणि, मानकरूपाणि च भवन्ति, यानि सामाजिकजनाः स्वजीवने सर्वदैव अङ्गीकुर्वान्ति।"

**मूल्यानाम् प्रकाराः**

1. नैतिकमूल्यानि।
2. आध्यात्मिकमूल्यानि।
3. सामाजिकमूल्यानि।

4. शैक्षिकमूल्यानि।
5. राष्ट्रियमूल्यानि।
एतेषां संक्षिप्तपरिचयः अधोलिखितरुपेण क्रियते।

**1. नैतिकमूल्यानि**

नीतौ भवः नैतिकः। अर्थात् व्यवहारे विचारे चिन्तने वा येषां मूल्यानाम् महत्वं वर्त्तते अमूनि मूल्यानि नैतिकमूल्यानीति नाम्नाभिधीयन्ते। महर्षि मनुनापि उक्तम् –

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुः विद्या यशो बलम्।।**

चरित्रविषये अपि सुन्दरम् उक्तम् –

**वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च।**
**अक्षीणो वित्ततः क्षीणः वृत्ततस्तु हतो हतः।।**

**2. आध्यात्मिकमूल्यानि**

जगत्यस्मिन् नैके जीवाः निवसन्ति। तेषां सर्वेषामेव आध्यात्मिकमहत्वं नैव भवति। केवलं मनुष्याणामेव वर्तते। दया, शान्तिः, क्षमा, मैत्री, प्रीतिः, सेवा, त्यागः, परोपकारः इत्यादयः। अहिंसा परमोधर्मः, परोकारार्थमिदं शरीरम्, प्रियं च नानृतं ब्रूयाद् एषः धर्मः सनातनः।

**3. सामाजिकमूल्यानि**

Fransic Bachon - Man is a social animal. He who lives without society either a beast or God. एनम् विश्वमेकं नीडं मत्वा कुटुम्बसदृशाः सर्वे जनाः विद्यन्ते इति भावना अस्माकं सर्वेषां मनसि अवश्यमेव स्यात्। यथा निगदितम् –

**अयं निजः परोवेत्ति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**
**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुखभाग् भवेत्।।**

**4. शैक्षिकमूल्यानि**

शैक्षिकमूल्येषु तेषां विषयाणां समावेशः स्यात् यान् विषयान् पठनेन बालेषु आदर्शभावनाः, प्रेमभवनाः, सर्वाङ्गीणविकासः च स्यात्। तदर्थम् महापुरुषाणां जीवनादर्शरूपम् विषये योजनीयः।

**5. राष्ट्रियमूल्यानि**

अस्माकं जीवनस्योद्देश्यम् राष्ट्रम् एव भवति। अतः अस्माभिः सदा राष्ट्ररक्षार्थं प्रयत्नः विधेयः। यतोहि यदि राष्ट्रस्यावनतिः जायते तर्हि समाजस्य स्वकीयस्य अपि अवनतिः जायते। अतः अस्मासु सर्वेषु देशाभिमानम् देशगौरवं च स्वीयप्राणेभ्यः अप्याधिकं स्यात्। भणितम् अप्यस्ति–

**न यत्र देशोधृतकामनास्ते न मातृभूमेःहितचिन्तनं च।**
**न राष्ट्ररक्षा बलिदानभावः श्मशानतुल्यम् नरजीवनं तत्।।**

# भाषाविज्ञानस्य अर्थः अङ्गानि च

**सुरज कुमार पटेल** अनुक्रमांङ्कः – 06
शिक्षाशास्त्रिद्वितीयवर्षः

भाषा शब्दः लाटिन् भाषायाः लिंग्वा शब्दतः निष्पन्नः अस्ति। दण्डिना काव्यादर्शे भाषा सम्बन्धे उक्तम् –

**इदम् अन्धतमः कृत्स्नं जायते भुवनत्रयम्।**
**यदि शब्दाह्वयो ज्यौतिरासंसारं न दीप्यते।।**

अर्थात् यदि शव्दरूपिणी ज्योतिः संसारे न प्रकाशति तर्हि संसारे सर्वत्र अन्धकारः भवति। वस्तुतः अस्माकं जीवनयात्रा वाग्देवतायाः अनुग्रहेण सम्भवति।

**भाषायाः अर्थः**

मानवानां सर्वेऽपि व्यवहाराः भषाद्वारा एव सम्पद्यन्ते। सार्थकः व्यवहारः न स्यान्विना भाषाज्ञानम्। भाषा एकः संस्कारविशेषः, येन पारिवारिकसामाजिकपरिवेशे सहजता आयाति। भाषा भावसम्प्रेषणस्य स्थूलसाधनत्वेन आत्मानं प्रकाशयति।

भाषा शब्दः 'भाष् व्यक्तायां वाचि' इति धातोः 'गुरोश्च हलः ' इति सूत्रेण 'अ' प्रत्यये 'अजाद्यतष्टाप्' इति सूत्रेण टापि कृते सिद्धयति।

भाषा इति शब्दः आङ्ग्लभाषायाम् Language इति उच्यते। Language इति पदं लाटिन् भाषायाः लिङ्ग्वा शब्दात् निष्पन्नः। लिङ्ग्वा इति श्बदस्य अर्थः भवति जिह्वा मुखादिनां अवयवानां सहायेन निःसरति इति व्यक्त् वाक् रूपा भाषैव भवाभिव्यक्तौ समर्थो भवति।

**भाषाविज्ञानस्य अर्थः**

भाषायाः विशिष्टज्ञानं भाषाविज्ञानम् इति अभिधीयते। अर्थात् भाषाविज्ञाने अनेकविधभाषाणां वैज्ञानिकरूपेण अध्ययनं क्रियते। कपिलदेवद्विवेदीमहोदयः एवमाचष्टे–

**भाषायामस्तिविज्ञानं सर्वाङ्गं विपुलात्मकम्।**
**विज्ञानं दृष्टिमूलं तत् भाषाविज्ञानमुच्यते।।**

अत्र इदं वक्तुम् शक्यते यत्– भाषाविज्ञानं तादृशं विज्ञानमस्ति यत्र भाषायाः सर्वाङ्गीणं विवेचनात्मकम् अध्ययनं प्रस्तूयते। इत्थं भाषायाः संरचना, ध्वन्याल्मकप्रवृत्तिः, पदसंरचना, पदानाम् उत्पत्तिः, रूपविकासः, अर्थविकासः, वाक्यसंरचना अन्याभिः भाषाभिः सह साम्यं वैषम्यं च भजते। भाषा विज्ञानस्य अध्ययने सिद्धान्तं प्रतिपदमेव सहायकं भवन्ति। एतादृशम् अध्ययनमेव वैज्ञानिकाध्ययनमिति उच्यते।

**परिभाषा**

भोलानाथमहोदयमतानुसारम्– ऐतिहासिकेन तुलनात्मकेन अध्ययनमाध्यमेन भाषाणां प्रकृतेः विकासपराम्परायाः भाषयाः सांरचनायाश्च ज्ञानं विधिपूर्वकं विशिष्टाध्ययनं सिद्धान्तनिर्धारणं च भाषा विज्ञानमिति उच्यते। General lingustics may be defiends as the science of language - AS H.R. Robins.

**भाषविज्ञानस्य अङ्गानि**

भाषविज्ञानस्य सम्वन्धः कस्याश्चन भाषायाः लघुकालविशेषेणैव सह न हि भवेत्। अपि तु तस्य सर्वेषां कालानां भाषाविषयकाणां तत्त्वैः सह भवति। भाषाविज्ञानं भाषायाः कस्याश्चन तत्वानि संकल्प्य तानि च आश्रित्य सिद्धानामपि निवारणं करोति। भाषाविज्ञानं भाषायाः सर्वाङ्गीणं अध्ययनं प्रस्तौति। अतः तत्र भाषाघटकभूतानां समेषामपि तत्वानां ज्ञानं सम्भवति। भाषा शब्देन तस्याः चतुर्णां घटकानां वोधः भवति। १. ध्वनिः, २. पदम्, ३. वाक्यम्, ४. अर्थः। वर्णानां समूहः पदम् उच्यते एवं च पदानां समूहः वक्यम् उच्यते। वाक्यानि अर्थमभिव्यञ्जते। क्रमोऽयं निरन्तरं प्रचलति। अत्र प्रत्येकमपि घटकस्य विशेषाध्ययनेन भाषाविज्ञानस्य अङ्गानि अभूवन्।

**(१) ध्वनिविज्ञानम्**

भाषायाः अध्ययनस्य प्रमुखविषयः ध्वनिः विद्यते। सम्पूर्णा भाषा ध्वन्याश्रिता भवति। अत एव भाषविज्ञानेऽपि ध्वनेः अध्ययनाय स्थानं भवति। ध्वनिविज्ञाने मानवशरीरस्य उपयोगिनां अवयवानां परिचयः भवति। तानि च अङ्गानि – (१) स्वरयन्त्रम्, (२) मुखम्, (३) जिह्वा, (४) ताल्वादि इति।

तदनन्तरं ध्वनीनामुच्चारणस्थानम् उच्चारणदृष्ट्यापि वार्गीकरणं क्रियते। तदनन्तरम् इदमपि विचार्यते यत् तेषु ध्वनिषु कदा केन केन प्रकारेण च विकासः सञ्जातः इति। तानेव ध्वनिविकासनमाश्रित्य केचन निश्चिताः ध्वनिनियमाः अपि क्रियन्ते। अत एव ध्वनिविज्ञानस्य इमे विषयाः सन्ति – १.उच्चारणावयवाः, २. ध्वनीनां संख्या, ३. ध्वनीनां वर्गीकरम्, ४. ध्वनेः नियमाश्च।

**(२) पदविज्ञानम्**

पदं पदार्थं च निरूपयता महर्षिपाणिनीनाऽभिहितम् – सुप्तिङन्तं पदम् इति। अस्मिन् पदविज्ञाने नानाविधानां पदानाम् अध्ययनं क्रियते। यथा – संज्ञा, सर्वनाम, क्रिया, क्रियाविशेषणानां, धातुरूपाणां च पदानि एव भाषायाः मूलभूतानि सन्ति।

**(३) वाक्यविज्ञानम्**

अनेकेषां सार्थकानाम् अन्वितानाञ्च पदानां समूहः वाक्यमिति उच्यते। योग्यता, आकाङ्क्षा, सन्निधिः, आसक्तिः च यत् निरूपितो भवति, तत् वाक्यानाम् ऐतिहासिकं तुलनात्मकध्ययनमपि प्रस्तूयते।

**(४) अर्थविज्ञानम्**

शब्दार्थयोः अभेदसम्बन्धविषये अर्थविज्ञाने चात्र चर्चाक्रियते। शब्दानां अर्थेषु परिवर्त्तनस्य कारणानि परिशील्यन्ते।

# शरीरमाद्यं खलु धर्मसाधनम्

**पृथिराज सरकार** अनुक्रमाङ्कः – 09
शिक्षाशास्त्रिद्वितीयवर्षः

अपारेऽस्मिन् संसारे मानवजीवनस्य सन्ति बहूनि कर्तव्यानि, नानाविधानि उद्देश्यानि तथा तेषां समेषामुपलब्धिः। शारीरिकस्वस्थः मानवः एव स्वस्य परिवारस्य, राष्ट्रस्य च हितं कल्पयितुं

शक्नोति। यस्य शरीरमेव सर्वदा रोगग्रस्तं अथवा विकारग्रस्तः सः समाजस्य कृते किं कर्तुं शक्नोति ? किमपि न। उक्तञ्च वर्तते – "स्वस्थे शरीरे स्वस्थं मनः" इति। अर्थात् स्वस्थशरीरे एव मनः स्वस्थं भवति, इत्यत्र नास्ति कोऽपि संशयः। अत्र शरीरेण साकं मनसः घनिष्ठः सम्पर्कः वर्तते। शरीरं स्वस्थं न भवति चेत् मनसि उत्तमविचाराः आगन्तुं न शक्नुवन्ति। मनोवैज्ञानिकाः अपि उत्तमाध्यापकस्य प्रधानः गुणः स्वस्थं शरीरं तथा मनः इत्येव मन्वते।

**शारीरिकं तथा मानसिकस्वास्थ्यस्य लक्षणानि**

१. शारीरिकमानसिकस्वास्थ्यसम्पन्नः आत्मानं सम्यक् विज्ञाय आत्मपरीक्षणेन स्वीयबलहीनताः काः ? स्वीयबलञ्च किमिति विज्ञाय सर्वैः सह संव्यवहरति।

२. आत्मविश्वासी भूत्वा समाजे आत्मनोऽपि किं महत्वं विद्यते इत्यभिजानाति। आत्माभिमानी सुरक्षितबुद्धिश्च भवति।

३. सर्वेषां प्रीतिपात्रं भवति सर्वैरभिलष्यते च।

४. सर्वविधकार्यसाफल्याधिगमे अस्य विश्वासः भवति।

५. इतरैः सह सव्यवहारे समर्थो भवति। सर्वदा समाजसम्मतं व्यवहारमाचरति।

६. स्वीय परिवेशं सम्यक् विज्ञाय प्रतिकूलवातावरणमपि स्वानुकूलीकर्तुं शक्तः भवति। भविष्यमधिकृत्य भीतिं न प्राप्नोति।

७. सर्वदा उत्साही भूत्वा कार्यं सम्पादयति।

८. काल्पनिकं लोकं परित्यज्य वास्तविकलोके सञ्चरति।

९. स्वीयव्यवहारे सांवेगिकपरिपाकं (Emotional Maturity) प्रदर्शयति।

१०. स्वीयजीवने जायमानानि कटण्ठान् सोढुं प्रभवति। कण्टकानां परिहाराय निरन्तरं परिश्रममाचरति।

११. शरीरस्वास्थ्यवर्धकान् अभ्यासान् निरन्तरमाचरति।

१२. स्वीयदैनन्दिनकार्यक्रमे आनन्दमनुभवति।

१३. स्वजीवनस्य लक्ष्यं सुनिश्चितं करोति।

१४. रुचिः रचनात्मककार्येषु भवति। जीवने वास्तविकतायाः सिद्धान्तं पालयति।

मांसभक्षणं तथा मदिरापानं अस्माकं शरीराणि विचारान् च दूषयन्ति। संसारेऽस्मिन् वयं द्रष्टुं शक्नुमः, तामसिकविचारवान् भवन्ति येते मांसभक्षणं तथा मदिरापानादिकं कुर्वन्ति। त एव कामिनः, क्रोधिनः, लोभिनश्च भवन्ति। तेषां मध्ये सामाजिक मैत्रीभावना न भवति। उक्तं च वर्तते शास्त्रकारैः – "शनैः रुष्टः शनैः तुष्टः इति।"

पुरुषार्थचतुष्टयसंसिद्ध्यर्थं स्वस्थशरीरमावश्यकमेवास्ति।

**धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।**
**रोगस्तस्यापहर्तारः श्रेयसो जीवितस्य च।।**

एवं प्रतिपादयता चरकाचार्येण स्वस्थशरीरस्य महत्त्वं प्रादर्शि। काकोऽपि जीवति चिराय बलिं च भुङ्क्ते। किन्तु विना कीर्तिं जीवनेन किम्। कीर्तिलाभश्च सुकृतसम्भारेण च नीरोगशारीरेण त्वं भव इति तत्वम्। अतो मानवेन प्रथमं तावत् स्वास्थ्यसम्पत्तिः सम्पादनीया स्वास्थ्यं विना जीवनं मरणसदृशमस्ति। "शरीरमाद्यं खलु धर्मसाधनम्।" इत्यत्र महाकविकालिदासेन शरीरमेव धर्मपालनस्य

प्रमुखं साधनमिति महता कण्ठस्वरेण उद्घोषितम्। को नाम धर्मः इति चेत् तत्र भगवान् मनुरेवमाह–

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**

## विश्वशान्तये भारतीयसंस्कृतवाङ्मयस्य योगदानम्

**अभिषेकपरगाँई** अनुक्रमाङ्कः – 10
शिक्षाशास्त्रिद्वितीयवर्षः

**सत्यम् अहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।**
**विश्वशान्ति सुखधात्री भारतीया हि संस्कृतिः।।**

संस्कृतवाङमये विश्वशान्तिनिमित्तं बहवः विषयाः दृश्यन्ते। मान्यता वर्तते यत् पुरा काले अस्यां धरायां संस्कृतभाषा एव आसीत् अस्माकं वेदादयः, आरण्यकग्रन्थाः, उपनिषद् ग्रन्थाः, ब्राह्मणग्रन्थाः सर्वेऽपि संस्कृतभाषायामेव सन्ति। अस्माकं वेदादिषु याः वैदिकीप्रार्थनाःवर्तन्ते तासां विशेषत्वं नाम ताः सर्वाऽपि बहुवचने एव सन्ति न तु एकवचने। यथा –

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**

संस्कृतग्रन्थेषु त्यागभावनायाः स्थानं सर्वोपरि वर्तते। संसारस्य भेदः त्यागभावनाया कर्तव्यः इति। यथा यजुर्वेदे उल्लिखितं वर्तते –"तेन त्यक्तेन भञ्जीथा" इति।
भारतीयसंस्कृते कर्मवादस्य सर्वोच्च स्थानं वरीवर्ति यथा यजुर्वेदे उक्तमस्ति –

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्तिन कर्म लिप्यते नरे।।** (यजुर्वेदे–४०/२)

वेदेषु प्राणिमात्रस्य कृते मित्रभावः स्यात् इति उल्लिखितमस्ति। यथा –

**"मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे"।**

एवमेव अन्यविशेषत्वं नाम अत्र साम्यवादीभावनायाः महत्वं वर्तते। यथा–

**संगच्छध्वं संवर्दध्वं सं वो मनांसि जानताम्।**
**देवा भाग यथापूर्वे संजानानामुपासते।।**

भारतीयसंस्कृतिरेव वर्तते यत् मानवमात्रं सन्मार्गं चलनार्थं प्रेरयति। भारतीयसंस्कृतिः सर्वदाऽपि मानवस्य कृते मानवतायाः सन्देशं यच्छति। वेदेषु उल्लिखितं वर्तते यत् –"मनुर्भव" अस्य शाब्दिकमर्थः भवति यत् मानवं भव इत्युक्ते ज्ञानवान् भव अस्मिन् विषये मनुनाऽपि अवादि –

**आहारनिद्राभयमैथुनि सामान्यमेतत्पशुभिर्नराणाम्।**
**धर्मोहितेषामधिको विशेषो धर्मेणहीनाः पशुभिः समानाः।।**

संस्कृतं मानवं कथं शान्त्यर्थं प्रेरयति इत्युक्ते –

**असतो मा सद्गमय**

**तमसो मा ज्योतिर्गमय**

**मृत्योर्मा अमृतं गमय।।** इति

आधुनिके युगे भारतीयसंस्कृतिः विश्व–मञ्चे यावती दृढी भूत्वा उपस्थिताऽस्ति तेन ज्ञायते विश्वेऽस्मिन् संस्कृतं प्रति जनानां मनसि कीदृशी प्रीतिः वर्तते । तत्तु वयं विश्वयोगदिवसमाध्यमेन ज्ञातुं शक्नुमः। तस्य कारणं वर्तते यत् एषा भाषा पुरातनी ज्ञानविज्ञानयुक्ता, सकलकलायुक्ता वर्तते। तद्यथा –

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।**
**संस्कृतं संस्कृतेर्मूलं ज्ञान–विज्ञानवारिधिः।**
**वेद तत्वार्थसंजुष्टं लोकालोककरं शिवम्।।**
**संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।**
**संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते।।**

मानवजीवनस्य सर्वांगीणविकासदृष्ट्या भारतीयसंस्कृतेः महत्वपूर्णस्थानं वरीवर्ति। एषा प्राचीना भूत्वाऽपि मानवस्य निमित्तं अमरत्वस्य सन्देशं यच्छति। एषा संस्कृतिरेव सार्वदेशिकी–सार्वभौमिकीचास्ति। विश्वस्य प्राचीनतमसंस्कृतिषु भारतीयसंस्कृतेः तत्वानि विद्यमानानिवर्तन्तेव। प्राचीन चीन–काबुल–मिस्त्र–यूनान–रोमप्रभृतिदेशीयस्कृसंतिषु भारतीयदर्शनं–धर्मः–साहित्यं–भाषा–कला–राजनीतीत्यादीनां प्रभावस्तु दरीदृश्यत एव।

भारतीयसंस्कृतिः मानवस्य निमित्तं मानवतायाः सन्देशं यच्छति। यथा पूर्वं वर्णितं वेदेषु उक्तमस्ति मनुर्भव। भारतीयसंस्कृतिविषये महाकवि इकबालेन इत्थं वर्णितम्–

**यूनान मिस्त्र रोमां सब मिट गये जहाँ से**
**अब तक मगर है जिन्दा नामो निशां हमारा।**
**कुछ बात है कि हस्ती मिटती नहिं हमारी**
**सदियों रहा है दुश्मन दौरे जमाँ हमारा।।**

इदानीं भारतीयसंस्कृतवाङ्मयस्य आवश्यकता किमर्थमस्ति चेद् जगति सिरिया–इराक–देशेषु आतङ्कवादिनां आंतकेन त्राहि–त्राहि जायमाना वर्तते। संस्कृतशिक्षणेन कदाचित् तेषां मनसि विश्वबन्धुत्वभावनायाः विकासः जायेत।

## अधिगमे भाषायाः केन्द्रीकरणम्

**सस्मिता परिडा** अनुक्रमाङ्कः – 11
शिक्षाशास्त्रिद्वितीयवर्षः

मानवजीवने भावभिव्यक्तेः मुख्यं साधनं भाषा एव अस्ति। मानवसभ्यतायाः संस्कृतेश्च विकासे भाषायाः स्थानं महत्वपूर्णं वर्तते। भाषामाध्यमेन वयं स्वविचारान् प्रकटीर्कुमः मानवव्यक्तित्वस्य गतिशीलता भाषाम् आश्रिता अस्ति। भाषा मानवजातेः सारसवस्वं वर्तते।

भाषाशब्दः भाषव्यक्तयां वाचि इत्यस्मात् धातोः टाप् प्रत्यये कृते सिध्यति। भाषणात् भाषा इत्युच्यते।

विद्वद्भिः भाषा परिभाष्यते यथा – आचार्य दण्डिनानुसारं "वाचामेव प्रसादेन लोकयात्रा प्रवर्तते इति" स्वीट् महाभागानुसारं "ध्वन्यात्मकशब्दैः विचाराणां प्रकटीकरणमेव भाषा"। भाषा मुख्यरुपेण द्विधा भवति मौखिकी लिखिता चेति। मौखिकभाषायाः अभिप्रायः विचाराणां मौकिकाभिव्यक्तिः। तथा च लिखितभाषायां ध्वनिसङ्केताः लिखित्वा अभिव्यक्तिः क्रियते। व्यवहारदृष्टया भाषायाः विभिन्नानि रुपाणि भवन्ति। यथा – मातृभाषा, प्रादेशिकभाषा, राष्ट्रियभाषा, सांस्कृतिकभाषा, अन्तराष्ट्रियभाषा इत्यादि।

कस्यश्चित् एकस्य विषयस्य अवगमनाय क्रमवद्धरुपेण या प्रक्रिया अनुस्रियते तदेव शिक्षणम् इति वक्तुं शकत्ये। ऋषि परम्परायां अपि शिक्षणाधिगमप्रक्रियाः महत्वपूर्णं स्थानम् आसीत्। साम्प्रतिककाले नवीनविधिभिः इयं शिक्षणाधिगमप्रक्रिया प्रचलिति। यथा – "यया प्रक्रियाया छात्रः ज्ञानं प्राप्नुवन्ति"

अधिगमनम् नूतनस्य ज्ञानस्य नूतनप्रतिक्रियायाः श्च प्राप्तेः प्रक्रिया अधिगमस्य प्रक्रिया वर्तते इति। अधिगमः हि सर्वेषां प्राणिनां साधारणौधर्मः इति स्वीक्रियते। मानवस्तु प्राणिषु श्रेष्ठः वर्तते। सामान्यरूपेण अधिगमस्य प्रयोगः भाषाज्ञाने कौशलप्राप्तौ वा अधिकः क्रियते।

शिक्षा व्यवस्थायाम् अभ्यासस्य प्रशिक्षणस्य वा परिणामतः नूतनप्रकारेण व्यवहारपरिवर्तनस्य वा प्रक्रिया एव अधिगम इति कथ्यते। भाषाविषये यदि वयं चर्चा कुर्मः चेत ज्ञायते यत् भाषाधिगमः एका प्रक्रिया वर्तते। व्यवहारे भाषासम्बद्धपरिवर्तनं परिमार्जनं वा जायते। भाषाधिगमे वातावरणस्य क्रियाशीलतयाश्च प्रभावः अपि दृश्यते। अतएव यदा बालकाः विद्यालये यत् किमपि अधिगच्छति तदा तस्य भाषायाः उपरि अवधानम् आवश्यकम्। अधिगमसमये भाषा एतादृशी स्यात् यथा सः सम्यक् संदेशं प्राप्नुयात् एतस्य कृते अधिगमस्य भाषा –(१) सरला स्यात् (२) शुद्धा भवेत् (३) स्पष्टा भवेत् (४) उपदेशयुक्ता भवेत् (५) मधुरा स्यात् (६) सुसंस्कृता स्यात् (७) प्रभावपूर्णा भवेत् (८) मूल्ययुक्ता भवेत् (६) व्यवहारिकी स्यात्। एवं बालकस्य अधिगमे भाषायाः प्रधानं पात्रम् अस्तीति ज्ञायते।

## आदर्शशिक्षकः

**पुष्पलता बेहेरा** अनुक्रमाङ्कः – 13
शिक्षाशास्त्रिद्वितीयवर्षः

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं खलु शिक्षकस्य" निखिलभुवने न कोऽपि नरः विद्यते, यः गुरुं न नमति। संसारे अस्मिन् विद्यमानः"गुरुः"इति शब्दः अतीव दुर्लभः। यद्यपि "गुरुः" इति अतीवलघुकाय शब्दः तथापि सः महान् तात्पर्यमावहति। अधुनातने समाजे "गुरुः", शिक्षकः, अध्यापकः, आचार्य इति नामभिः अभिधीयते। येषां पार्श्वे विद्यायाः वारिधिः पुष्प सदृशं शोभते। तां विद्यामुपासर्तुं छात्रः शिक्षकस्य शरणं गच्छति। शरणागतस्सन् छात्रः सर्वदा शिक्षकस्य सुव्यवहारं, सुसम्बधस्थापनं मधुरवाचं च पश्यति। एतादृशं व्यवहारं दृष्ट्वा छात्रः तं शिक्षकम् आदर्शशिक्षकरूपेण आमनति। अतः कलिदासेन उक्तं यत् –

**शिलष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां धुरी प्रतिष्ठापयितव्य एव।।**

अतः छात्रस्य मनसि सैव आदर्शशिक्षकः, यः स्वमधुरवचनैः उपदिशति, स्नेहेन पाठयति, उदाहरणैः बोधयति,छात्रेभ्यो न कृध्यति, प्रियभाषी भवति, छात्रवत्सलः भवति, छात्रैः साकं मित्रवत् आचारति, इतरदोषकृतछात्रम् दण्डम् विना बोधयति च। तस्मात् एतादृशः गुणग्राहीशिक्षकः निस्सन्देहेन अध्यापकश्रेष्ठः, सर्वप्रियः, सर्वगुणसम्पन्नः च भवति। अतः छात्राः एतादृशाध्यापकान् स्वादर्शशिक्षकत्वेन स्वीकुर्वन्ति।

विद्यालये शिक्षकः छात्रान् बोधयति। परन्तु समाजे वास्तविकरूपेण सः समाजनिर्मातैव वर्तते। यथोक्तम् 'अर्चकस्य प्रभावेण शिला भवति शंकरः' इति तद्वत् शिक्षकस्य प्रभावेण छात्रः ज्ञानी भवति। अतः शिक्षकस्य महत्वमनीतरसाधरणं वर्तते। शिक्षकः एव भाविसमाजस्य निर्माता भवति। देशस्य विकासः शिक्षकस्य हस्ते भवति। पितरौ शीशोः जन्मदातारौ वर्तेते। परन्तु शिक्षकः जीवनदाता भवति। अतः शिक्षकः बालानां मानसपितेती कथ्यते। प्राचीनकाले शिक्षकशब्दस्य स्थाने गुरुशब्दस्य प्रयोग एवासीत्। गुरुः ब्रह्मविष्णुमहेश्वरसमानरूपेण पूजितः भवति स्म।

**गुकारस्यान्धकारवाचित्वाद्रुकारस्तन्निरोधकः।**
**अंधकारनिवृत्तित्वात् गुरुरित्याभिधीयते।।**

इयमुक्तिः सार्थक्यं भजते स्म। परमिदानीं तत्स्थाने शिक्षकः इति व्यवहारः प्रचलति। यः शिक्षणं ददाति सः शिक्षक इत्यर्थः। अत्रान्धकारनिवारणापेक्षया मार्गदर्शनमेव प्रधानं वर्तते। अथापि तत्पदस्य महत्त्वन्तु वर्तते एवेति केषाञ्चन विदुषामुक्तिमवलोकयामश्चेदवश्यम् ज्ञायते।

## मूल्यसम्प्रत्ययः

**प्रवीणदेवशर्मा** अनुक्रमाङ्कः –15
शिक्षाशास्त्रिद्वितीयवर्षः

**मूल्यशब्दस्य अर्थः**

भारतीयशास्त्रेषु मानवीयगुणानां परिप्रकाशाय शीलशब्दार्थे प्रयुक्तोऽयं मूल्यशब्दः आङ्ग्लभाषायाः value इति पदात् निष्पन्नः। अंसनम इति शब्दः लेटिन् भाषायाः Valere इति शब्दात् समुत्पन्नोस्ति। यस्य च शब्दस्य अर्थस्तावत् योग्यता (Ability), उपयोगीता (Utility) एवं महत्वं (Importance) इत्यवबोध्यते। व्यक्तेः वस्तुनः च मूल्यं तादृशः कश्चन गुणः येन तस्य उपयोगीता महत्वं च प्रकटितं भवति। परन्तु बहुभिः विद्वद्भिः मूल्यशब्दस्यार्थः भिन्नरीत्या प्रतिपादितः। अतः उच्यते –

**शीलेन हि त्रयोलोकाः शक्या जेतुं न संशयः**

**मूल्यानां प्रकाराः**

मूल्यानां प्रकाराः पञ्चधा भवन्ति। यथा –

१. नैतिकमूल्यानि।
२. आध्यात्मिकमूल्यानि।

३. सामाजिकमूल्यानि।
४. शैक्षिकमूल्यानि।
५. राष्ट्रियमूल्यानि।

**मूल्यस्रोतांसि**

१. सांस्कृतिकपृष्ठभूमिः
अस्माभिः अस्मत्पूर्वजेभ्यः प्राप्तानि मूल्यानि अस्मत्संस्कृतेः मुख्यमूल्येभ्यः उद्धृतानि।

२. वैज्ञानिकपृष्ठभूमिः
वयं मूल्यानामवधारणानां बलेन मूल्यनिर्धारणंकुर्मः विज्ञानविकासबलेन प्राप्तं ज्ञानं मूल्यपरिवर्तने कारणं भवति।

३. धार्मिकपृष्ठभूमिः
इतिहासः वदति यत् बहूनि मूल्यानि धर्मसम्बद्धानि भवन्तीति नैकानि मूल्यानि बहुषु धर्मेषु समानानि।

४. जीवनानुभवः मानवश्च

बहूनि मूल्यानि मानवजीवनानुभवेभ्यः उत्पन्नानि भवन्ति। मानवाः स्वीयविकाससुखादिप्राप्त्यर्थं सर्वदा स्वजीवने अनुप्रयोज्यमूल्यानां निर्धारणे नैरन्तर्येण प्रयतते।

## श्रीमद्भगवद्गीतायां राजयोगः

**संजय दत्त भट्टः** अनुक्रमाङ्कः – 16
शिक्षाशास्त्रिद्वितीयवर्षः

भगवान् श्रीकृष्णः कारुण्येन अनेकान् योगान् उपदिष्टवान् अस्ति। गीतायां तेषु अन्यतमः अस्ति अयं राजयोगः। अयं राजयोगः ध्यानयोगः आत्मसंयमयोगः इत्यपि निर्दिश्यते। पतञ्जलिमहर्षिः राजयोगम् अधिकृत्य योगसूत्रेषु सविस्तरं वर्णनं कृतवान्। अयमेव अष्टांगयोगः नाम। ते च अष्ट–(१) यमः (२) नियमः (३) आसनम् (४) प्राणायामः (५) प्रत्याहारः (६) धारणा (७) ध्यानम् (८) समाधिः चेति।

एतानि अष्टाङ्गानि अपि गीताचार्यः गीतायां तत्र तत्र प्रस्तुतवान् अस्ति। एवं तानि नामग्राह पूर्वकं स्फुटतया न निर्दिष्टानि इत्यतः केचन तेषाम् अभिज्ञाने कष्टम् अनुभवेयुः। अतः सः अंशः लेखेऽस्मिन् विव्रीयते। एकैकशः परिशीलयाम तावत् –

(१). यमः – अहिंसा–सत्य–अस्त्येयत्वम् ब्रह्मचर्यम् अपरिग्रहणं च यमः इति कथ्यते।

**अहिंसा**

**अमानित्वमदम्भित्वमहिंसा शान्तिरार्जवम्।**
**आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः।।** (१३/८)
**अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।**
**भवन्ति भावा भूतानां मत्त एव पृथग्विधा।।** (१०/५)

देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।। (१७/१४)

सत्यम्

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।। (१७/१५)
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचपलाम्।। (१६/२)

अस्तेयम्

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः।। (१२/१६)

ब्रह्मचर्यम्

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।। (१७/१४)

अपरिग्रहः

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।। (१८/५३)

नियमः

शौचं, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानं च "नियमः"इति कथ्यते।

शौचम्

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत।। (१६/३)
अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः।। (१३/८)
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।। (१७/१४)

सन्तोषः

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।। (१२/१४)
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः।। (१२/१९)

तपः

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।। (१७/१४)
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।। (१७/१५)

मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरत्येतत्तपो मानसमुच्यते।। (१७/१६)
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः।। (१०/५)

स्वाध्यायः

अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।। (१६/१)
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।। (१७/१५)

ईश्वरप्रणिधानम्

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। (१८/६६)

आसनम्

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनं।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।। (६/११)

प्राणायामः

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगति रुद्धा प्राणायामपरायणाः।। (४/२६)
स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवो।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ।। (५/२७)

प्रत्याहारः

बुद्धया विशुद्धया युक्तो धृत्यात्मानं नियम्य च।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च।। (१८/५१)
बाह्यस्पर्शेष्वसक्तात्मा विन्दयात्मनि यत्सुखम्।
स बाह्ययोगयुक्तात्मा सुखमक्षयमश्नुते।। (५/२१)
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्।। (६/२६)
यदा संहरते चायंकूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता।। (२/५८)

धारणा

शनैः शनैरुपरमेद् बुद्धया धृतिगृहितया।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्।। (६/२५)
मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः।। (१२/८)

**ध्यानम्**

**विविक्तसेवी लघ्वाशी यतवाक्वायमानसः।**
**ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः।।** (१८/५२)
**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**
**उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये।।** (६/१२)

**समाधिः**

**श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।**
**समाधावचला बुद्धिस्तदा योगमवाप्स्यसि।।** (२/५३)
**भोगैश्चर्यप्रसक्तानां तयापहृतचेतसाम्।**
**व्यवसायात्मिका बुद्धिः समाधौ न विधीयते।।** (२/४४)
**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।**
**उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।।** (६/२७)
**सुखमात्यन्तिकं यत् तद् बुद्धिग्राह्यमतीन्द्रियम्।**
**वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।।** (६/२१)

एवं राजयोगस्य अष्टापि अङ्गानि सुष्ठु निरुपितमस्ति भगवद्गीतायाम्। ध्यानयोगिना कुत्र कथम् उपक्रमणं करणीयम् इति षष्ठे अध्याये विवृतमस्ति। आहारनियमः निवासनियमः अनुष्ठाननियमः इति एतेषु त्रिषु साधकाः सावधानचित्ताः भवेयुः इति गीताचार्यः प्रतिपादितवान्। साधनदशायाम् नितान्तं सूक्ष्मांशाः अपि उपेक्षणीयाः इति मुमुक्षून् ज्ञापयति श्रीकृष्णः। एषा गीतायाः विशेषता यतः सूक्ष्मांशेषु यदि सावधानता न भवेत् तर्हि फलानि हस्तच्युतानि भवेयुः। अतः किं खादनीयं किं न खादनीयम् ? कथम् उपवेशनीयम् ? कुत्र दृष्टिः स्थिरीकरणीया ? इत्यादिषु सामान्यविषयेषु अपि गीता श्रध्दां प्रदर्शयति। एतान् प्राथमिकान् अंशान् सुनिश्चिततया दृष्ट्या परिशील्य क्रमशः साधकान् करोति भगवद्गीता।

# गीतानुसारं शिक्षायाः उद्धेश्यानि

**ब्रम्हानन्दप्रधानः** अनुक्रमांकः –17
शिक्षाशास्त्रिद्वितीयवर्षः

**भूमिका**

सर्वप्रथमस्तु अस्माकं मनसि प्रशनोऽयं उत्पद्यते यत् का नाम गीता ? अस्य प्रश्नस्य उत्तरं दीयते । गीता आध्यात्मिकदर्शनस्य जीवनस्य कलायाः एका रचना अस्ति। सामान्यजनस्य ईश्वरे विश्वासः भवति। विश्वासेन भक्तया सह सामान्यं जनं स्वकार्यं कुर्यात् एषा एव गीता अस्ति। गीताऽस्माकं जीवनस्य मार्गनिदेशिका अस्ति। सप्तशतं श्लोकेषु रचिता अस्ति। अस्यां अष्टादशाः अध्यायाः सन्ति। अपेक्षया त्रिषु भागेषु वर्ण्यविषयानुसारं विभाजनं वर्त्तते। प्रथमे षडध्यायेषु

ईश्वरज्ञानं द्वितीये षडध्यायेषु विश्वज्ञानं तथा अन्तिमे षडध्यायेषु आत्मनः ज्ञानस्य विवेचनं अस्ति।

**गीताऽनुसारं शिक्षायाः उद्देश्यानि अष्टौ वर्तन्ते**

**आत्मपूर्णतायाः प्राप्तिः**

शिक्षायाः प्रथमम् एवं प्रमुखं लक्ष्यम् अस्ति, आत्मपूर्णतायाः प्राप्तिः। गीतायाम् एतत् स्पष्टतया अभिव्यक्तं कृतवान्– "स्वकर्मणातमभ्यर्च्यसिद्धिंविन्दतिमानवः" अमरतायाः प्राप्तिः– शिक्षायाः द्वितीयम् उद्देश्यं गीताऽनुसारं अमरतायाः प्राप्तिः अस्ति। आत्मपूर्णतायाः पश्चात् सोपानं प्राप्तिः अस्ति। पूर्णता सर्वेषां कार्याणां करणस्य सामर्थ्यं एव कौशलमस्ति गीतानुसारं यत् किमपि ज्ञेयमस्ति तम् ज्ञात्वा अमरतायाः प्राप्तिः प्राप्तुं शक्यते।

यथोक्तं गीतायां – " ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वात्वामृतमश्नुते ?"

**आध्यात्मिकयोगस्याऽनुभूतिः**

गीतानुसारं शिक्षायाः चतुर्थम् उद्देश्यम् अस्ति आध्यात्मिकयोगस्यानुभूतिः। सर्वेषु प्राणिषु एका आध्यात्मिकशक्तिः भवति। ईश्वरे सा शक्तिः परमं अथवा सर्वाऽधिकं भवति। अतः मानवेन ताम् आध्यात्मिकं शक्तिं शिक्षया प्राप्तकरणार्थं प्रयासः करणीयः। गीतायां भगवान् श्रीकृष्णः स्वीकरोति यत् मानवः ईश्वरस्य अंशोऽस्ति। एतस्य इदं ज्ञानं भवितव्यम्। एतस्य अनुभूतिरेव योगः अस्ति। एतत् शिक्षायाः उद्देश्यं भवति। यथोक्तम्–" ममेवांशो जीवलोके जीवभूतः सनातनः"

**सद्गुणानांप्राप्तिः**

गीतानुसारंशिक्षायाः पंचमोद्देश्यं सद्गुणानां प्राप्तिरस्ति। मानवः प्रकृत्यां दैवदानवद्वयोः रूपयोः भवति। दानवप्रकृतिः मानवं पशुवत्वव्यहारे संल्लग्नं करोति, परन्तु शिक्षया अथवा ज्ञानेन मानवस्य देवप्रकृतिः प्रकाशितां तथा विकसितां भवति।

**साधुसन्तानां उत्पत्तिः**

गीतानुसारं षष्ठमुद्देश्यं साधुसन्तानां जननम् अस्ति। साधुसन्तो कोऽस्ति अस्मिन् विषये गीतायां कथितमस्ति यत् एतादृशाः मानवाः सर्वेषां भौतिकबन्धनात् तथा मिथ्याहंकारात् मुक्ताः भवन्ति। धैर्यं वहन्ति। सिद्ध्यसिद्धिविषये उदासिनाः भवन्ति। सत्कर्म मुक्ताः भवन्ति तेषां जननं गीतायाः उद्देश्यम् अस्ति।

## हुसैन महोदयानुसारम् अध्यापकः

**कार्तिकसाहू** अनुक्रमाङ्कः – 18
शिक्षाशास्त्रिद्वितीयवर्षः

अस्माभिः विदितं यत् शिक्षायां शिक्षकस्य स्थानं सर्वोपरि भवति। डा. जाँकिरहुसैनमहोदयाः अपि एवं मन्यन्ते। हुसैनवर्याः वदन्ति – शिक्षकोऽपि सर्वेच्छाया प्रतिष्ठामाप्तुं समीचीनान् उच्चादर्शान् अवाप्य अनुकूलं व्यवहारम् अधिगच्छेत्। तेषां मते शिक्षके प्रजातान्त्रिकाः गुणाः बुद्धिविवेकादयः अपि भवेयुः। सः वर्गभेदम्, जातिभेदम्, साम्प्रदायिकताप्रभृतिमनोवृत्तीः न धारयेत्। शिक्षकः नैतिकैश्चारि–त्रियकैश्च गुणैः समन्वितो भवेत्। सः उदारः, आशावादी, सहानुभूतियुक्तव्यवहारप्रदर्शकश्च भवेत्।

सः बालकानां स्वभावं, रूचिं, योग्यतामभिवृतिञ्च परीक्ष्यानुकूलं शिक्षणं दद्यात्। सः निःस्वार्थभावनाया शिक्षणं कुर्यात्। हुसैनमहोदयमते शिक्षकः धैर्यवान्, प्रयत्नशीलः, अध्यवसायिशिक्षणविधीनामन्वेषकः, राष्ट्रभक्तः, मानवप्रेम्णा पूरितः स्वस्थश्च स्यात्। तेषां मते वस्तुतः शिक्षकः सर्वतोभावेन आदर्शयुक्तः भवेत्। मानवधर्मस्य पोषकस्य तेषां मते शिक्षकस्य जीवने स्थितपुस्तकस्य प्रथमप्रष्ठे प्रेम्णः दर्शनं भवेत् न तु ज्ञानस्य। तेषां मते शिक्षकः विद्यार्थिनां व्यक्तित्वं जानीयात्। सः तस्य प्रगतेः सम्भावनायाः अनुमानमपि कुर्यात्। येन सः विद्यार्थिनामुत्तमोत्तस्य विकासस्य कृते यत्नशीलः भवितुमर्हति। स्नेहे शिक्षकः बालानां मातृवदाचरेदिति तेषां मतमासीत्।

## भारतीयसंस्कृतिः

**कमलिनि प्रधान** अनुक्रमङ्कः – 19
शिक्षाशास्त्रिद्वितीयवर्षः

पूण्यभूमिः भारतम्। तस्यां पूण्यभूमौ जन्मलब्धा मया। धर्मस्य अवक्षयस्य हेतोः सर्वदा भगवान् धर्मरक्षायै अत्र अवतीर्य्य धर्मरक्षयित्वा अस्याः सुरक्षां प्रददाति। यत्र भगवद्गीतायां भगवान् स्वयं कथयति –

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत**
**अभ्युत्थानं धर्मस्य तदात्मानं सृजाम्यहम्।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्**
**धर्मसंस्था पनार्थाय सम्भवानि युगे युगे।।**

द्वापरयुगे जन्मितः श्रीकृष्णः कंसं तथा त्रेतायां पुरुषोत्तमः श्रीरामः रावणं सत्ययुगे भगवान् विष्णुः नृसिंहावतारं धृत्वा हिरण्यकश्यपं हत्वा धर्मं प्रतिष्ठापितम्। यतोहि – "यतो धर्मः ततो जयः"

ऋषिणां तपोभूमिः भारतवर्षं वेदवेदान्तयोः प्राणकेन्द्र एव। महाभारत तुल्य महाग्रन्थे वेदचतुष्टये अष्टादशपुराणेषु भारतस्य महत्वं वर्णितं भवति। भारतस्य हेतोः पशुः अपि देवस्य स्थानम् अलङ्करोति। यत्र चण्डाशोकः धर्माशोकेन रूपान्तरितः भवति।

अयं स्वर्णप्रसू भारतवर्षः एव धर्मस्य ध्वजं उड्डयितुं समर्थः। तत्र नास्ति सन्देहस्य अवकाशः – "धर्म एव भारतस्य मस्तकमणि सदृशः"। त्यागेन क्षणभङ्गुजः जीवन पूर्णतां लभते। पुराणे तस्य वर्णना दधीचि एव प्रमाणम्। यः स्वीयजीवनं त्यक्त्वा व्यत्तासुरस्य मरणाय वज्ररूपेण अस्थि दत्तवान्।

अस्मिन् भारते मातृस्वरूपिण्यः कीर्त्तिः अपि अनन्या। आवाहमानकालात् मातृपूजायाः महनीयता विद्यते। या शक्तिदायिनी माता दुर्गा, विद्यादायिनी माता सरस्वती, हितकारिणी माता पार्वती, अन्नदायिनी माता अन्नपूर्णा तथा सहस्रभुजा भारतमातुः पूजयित्वा भारतवर्षः स्वस्य आध्यात्मिकतायाः परिचयं ददाति। एषा आध्यात्मिकता नूतनालोकं दर्शयति भारतवर्षः। परन्तु

संप्रति आधुनिकभारते नारी असहायिका जाता। नार्याः मर्यादाम् अवक्षीयते। तस्य सततं प्रतिवादस्वरं उत्तोल्य दूरयितुं सर्वे एकता सूत्रे बन्धनीयाः। कथ्यते –

**गुरुर्ब्रह्मगुरुर्विष्णु गुरुर्देवो महेश्वरः।**
**गुरुस्साक्षात् परंब्रह्मा तस्मै श्री गुरवे नमः।।**

गुरुः भगवतः गरीयान्, महीयान्, यः मोक्ष भगवत्प्राप्तिनिमित्तं पथप्रदर्शकः। सः कदापि निन्दनीयः न।

भारतीयसंस्कृतौ पितरः सर्वोच्चासने विराजिताः। पितृमातृसेवा हि धर्मस्य प्रथमं सोपानम्। यत्र श्रवणकुमारः चक्षुहीनः पितरौ स्कन्धे संस्थाप्य समग्रतीर्थं दर्शितवान्। आधुनिक शिक्षायामधिष्ठितः पुत्रः पितरौ ददाति अहेतुं दुःखम्। कुत्र गता सा संस्कृतिः। किंमर्थं विस्मर्यते –

**मातृदेवो भव, पितृदेवो भव, आचार्यदेव भव।**

# सूक्ष्मशिक्षणम्

**शुभस्मिता साहु** अनुक्रमाङ्कः – 20
शिक्षाशास्त्रिद्वितीयवर्षः

शिक्षकप्रशिक्षणसंस्थानां प्रमुखं कार्यं वर्तते प्रभावशालीनां शिक्षकाणां सज्जीकरणम्। स्वातन्त्र्योत्तरे भारते पर्याप्तसङ्ख्याकाः इमाः संस्थाः संस्थापिताः। सूक्ष्मशिक्षणं तादृशी प्रक्रियाऽस्ति, यस्यामेकः शिक्षकः एकस्यां सूक्ष्मप्रक्रियायां पञ्चच्छात्राणां समूहे निश्चितकालं यावत् शिक्षणं करोति। प्रशिक्षकास्तस्य शिक्षणं प्रेक्षन्ते। एतस्यां प्रक्रियायां सर्वमप्यवधानम् एकस्मिन् कौशलविशिष्टे भवति। इयं प्रक्रियैव सूक्ष्मशिक्षणम्।

परिभाषा

1. पैकवर्यः टैकरवर्यश्च वदतः – "सूक्ष्मशिक्षणं सा विद्या वर्तते यस्यां विशिष्टानाम् अध्यापनकौशलानां परिचितेः सैद्धान्तिकविचारप्रणाल्या संयुक्तदूरदर्शनप्रतिपुष्ट्याञ्च शिक्षणकौशलानां विकासस्योपायानां मध्ये सामञ्जस्य स्थाप्यते।"

2. एलेनमहाशयेन कथितम् –"सूक्ष्मशिक्षणं सा प्रक्रिया वर्तते या लघुकक्षायां अल्पसमये सम्पाद्यते।"

**सूक्ष्मशिक्षणस्य सोपानानि**

सूक्ष्मशिक्षणस्य सोपानानां निश्चिता सङ्ख्या नास्ति। यावत्पर्यन्तं कौशलविशेषस्य दृढाभ्यासो न जायते तावत्पर्यन्तं तत्र श्रमः कर्तव्यो भवति। तथापि न्यूनातिन्यूनम् अष्टौसोपानानि वर्तन्ते इति कथयितुं शक्यते।

1. योजना – प्रथमसोपाने किमपि विशिष्टकौशलं स्वीकृत्य पाठयोजना निर्मीयते। यथा – प्रश्नकौशलम्।

2. शिक्षणम् – पञ्चनिमेषात्मके दशनिमेषात्मके वा कालांशे शिक्षणीयं भवति। छात्राः वास्तविकाः भवितुमर्हन्ति, किन्तु तेषामभावे छात्राध्यापकेषु केचन तत्र उपवेष्टुं शक्नुवन्ति।

3. निरीक्षणम् – छात्राध्यापकेन पाठ्यमानस्य पाठस्य छायाङ्कनं दृश्याङ्कनं वा कार्यते। पाठन–समाप्तेरनन्तरं प्रशिक्षकाः तेन छात्राध्यापकेन सह एव निरीक्षणं कुर्वन्ति। साधनानामभावे प्रशिक्षकाः कक्ष्यां गत्वा साक्षात् निरीक्षणं कुर्वन्ति। तथा च पूर्वनिश्चितप्रेक्षणसूच्यां बिन्दूनां पूर्तिं कुर्वन्ति।

4. प्रतिपुष्टिदानम् – निरीक्षणस्य पश्चात् पाठगतगुणदोषान् समालोच्य निरीक्षकैः प्रशिक्षार्थिने समूचितनिर्देशाः प्रदीयन्ते। श्रेष्ठपाठनस्य कृते पृष्टपोषणमपि दीयते। तस्मात् तस्मिन्नात्मविश्वासो जागर्ति।

5. पुनर्योजना – प्रेक्षकैः यास्त्रुटीः उद्दिश्य ध्यानाकर्षणं कृतं, ताः प्रति ध्यानं प्रदाय पूनर्योजना निर्मीयते। ततः पुनः शिक्षणम्। इत्थं चक्रमिदं तावद् वारं वारं प्रवर्त्यते, यावत्पर्यन्तं कौशलार्जनं न जायते।

**सूक्ष्मशिक्षणस्य वैशिष्ट्यानि**

1. सूक्ष्मशिक्षणे छात्राध्यापकाः पाठ्ययोजनां निर्माय पञ्चछात्रान् दशछात्रान् वा अध्यापयन्ति।
2. सूक्ष्मशिक्षणकक्ष्यायां विद्यालयीयाः छात्राः एव उपवेशयुरित्यत्र नास्ति नियमः अत्र छात्राध्यापकाः अपि छात्रभूमिकां (Roll Play) निर्वोढुं शक्नुवन्ति।
3. सूक्ष्मपाठार्थं (Micro Lesson) विषयवस्तु अत्यल्पं भवति।
4. सूक्ष्मपाठार्थं पञ्च उत दशनिमेषात्मकः कालः पर्याप्तोऽस्ति।
5. शिक्षकप्रशिक्षकः क्वचित् इतरछात्राध्यापकाः पर्यवेक्षकस्थानम् अलङ्कुर्वन्ति, ते सूक्ष्मपाठं दृष्ट्वा स्वाभिप्रायान् प्रकटयन्ति, गुणदोषान् अङ्कयन्ति च।

**सूक्ष्मशिक्षणस्य प्रयोजनानि**

- सूक्ष्मशिक्षणे छात्राध्यापकस्य ध्यानम् एकस्मिन् एव कौशले केन्द्रितं भवति, इत्यतः सः तत्कौशलं पूर्णरूपेण आत्मसात्कर्तुं शक्नोति।
- प्रतिपुष्टिप्रदानावसरे पर्यवेक्षकः छात्राध्यापकस्य व्यवहारस्य वस्तुनिष्ठमूल्याङ्कनं करोति। अतः अत्र पक्षपातः न सम्भवति।
- सूक्ष्मशिक्षणे पर्यवेक्षकः शिक्षणनिर्देशकरूपेण व्यवहरति।

**सूक्ष्मशिक्षणस्य दोषाः**

1. प्रशिक्षितप्रशिक्षकाणाम् अभावः।
2. पद्धतिरियं प्रशिक्षणार्थिषु स्वीयप्रशिक्षकाणाम् अनुकरणस्य वृत्तिम् उत्पादयति। स्वतन्त्रपाठनस्य कृते प्रोत्साहनं नास्ति।
3. सूक्ष्मशिक्षणम् अत्यन्तं श्रमसाध्यं वर्तते।
4. अस्मिन् भूयान् समयोऽपेक्ष्यते यतोहि प्रत्येकं छात्राध्यापकाय प्रत्येकं कौशलस्य दृढाभ्यासार्थम् अवसराः प्रदातव्याः भवन्ति।
5. सूक्ष्मशिक्षणं व्ययसाध्यम् अस्ति।

# भारतीयानां भाषाविज्ञाने योगदानम्

**शुभश्री भूयाँ** अनुक्रमाङ्कः– 21
शिक्षाशास्त्रिद्वितीयवर्षः

**ज्ञानविज्ञानसंश्लिष्टम् विश्वभाषाविभूतिमत्।**
**ध्वोनि–वाक्य–पद–ज्ञानं भाषाविज्ञानमिष्यते।।**

**भाषाविज्ञानम्**

यद्यपि भाषाविज्ञानस्य भाषाशास्त्रस्य च वर्त्तमानं रूपम् आधुनिकमेव। विद्यारूपेण उपविद्यारूपेण वा नास्य विज्ञानस्य पुरा नामोल्लेखः प्राप्यते। तथापि भारतवर्षे वैदीककालाद् आरभ्य भाषाविषयकं चिन्तनं विवेचनं विश्लेषणं चोपलभ्यते। एतदेवत्र समसतः प्रस्तूयते।

**वेदाः**

वेदाः विश्ववाङमयस्य प्राचीनतमा निधिस्वरूपा ग्रन्थाः। तत्र भाषाविज्ञानसम्बद्धा निर्वचनादयः प्राप्यन्ते। तद्यथा–वृत्रहन्–शब्दादीनां निर्वचनं व्युत्पत्तिश्च वेदेषु वृत्रं हनति वृत्रहा, (यजुर्वेदे) अमावस्या मामा वसन्ति सुकृतः, (अथर्ववेदे)। यजुर्वेदे सर्वप्रथमं विश्लेषणार्थे व्या + कृ धातोः प्रयोग उपलभ्यते।

**दृष्टवा रूपे व्याकरोत् सत्यानृते प्रजापतिः" (यजुर्वेदे)।**
**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।।**

ब्राह्मणग्रन्था आरणयकग्रन्थाश्च – ब्राह्मणग्रन्थेषु इन्द्र–वरुण–वृत्राशब्दानां निर्वचनं तदर्थविवेचनं च प्राप्यते। ऐतरेयब्राह्मणे वाक् सप्तधा विभज्यते। सप्त विभक्तय इति भट्टभास्करः। गोपथब्राह्मणे ओंकारशब्दे धातु–प्रत्यय–उपसर्ग–निपात–विभक्त्यदिभाषाशास्त्रीयशब्दानां प्रयोगः सर्वप्रथमम् उपलभ्यते –

ओंकारं पृच्छामः, को धातुः, किं प्रातिपादिकं, किं नामाख्यातं, किं लिङ्गम, किं वचनं, का विभक्तिः, कः प्रत्ययः, कः स्वर उपसर्गो निपातः, किं व्याकरणं किं स्थाननादानुप्रदानानुकरणम्।

**पाणीनिपूर्वजा वैयाकरणाः**

(क) पाणीनीपूर्वजानां ८५ वैयाकरणानां नामानि उपलभ्यन्ते। तत्र पाणीनेष्टाध्याय्यां १० वैयाकरणा नां नामानि प्राप्यन्ते। तद् यथा – आपिशलि–काश्य (प)–गार्ग्य–भारद्वाज–शाकटायन–स्फोटायन–प्रभृतयः।

(ख) प्राचीनग्रंथेषु १५ वैयाकरणानां नामानि उल्लिख्यन्ते। तद्यथा–शिव(महेश्वर)– वृहस्पति–इन्द्र–व्याडि–प्रभृतयः।

(ग) १० प्रातिशाख्यग्रन्थाः। तद्यथा – ऋक्तन्त्र–सामतन्त्र–अक्षरतन्त्र प्रभृतयः।

(घ) सप्त अन्ये वैदीकव्याकरणग्रन्थाः। अग्निवेश्म–अगस्त्य–आत्रेय–पौस्करसादि–प्रभृतयः।

अष्टप्रभेदं नवप्रभेदं च व्याकरणम्

पुरा अष्टप्रभेदं व्याकरणं प्रचालितम् आसीत्। अतएव निरुक्तवृतौ दुर्गाचार्येण कथ्यते– (दुर्ग, निरुक्त वृत्ति,)। तद्यथा –

**ब्राह्ममैशानमैन्द्र च प्राजापत्यं बृहस्पतिम्।**
**त्वष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम्।।**

वाल्मीकिरामायणे श्रीतत्त्वविधिग्रन्थे च व्याकरणं नवप्रभेदः श्रूयते।

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलयं पाणिनीयकम्।।** (श्रीतत्त्वविधि)

एतेषु व्याकरणषु ध्न्द्रं व्याकरणं प्रमुखम् आसीत्। तिब्बतीय–ग्रन्थानुसारम् ऐन्द्रव्याकरणं २५ सहस्त्रश्लोकपरिमितम् आसीत्। एतद् व्याकरणम् आकारदृष्ट्या पाणिनीयव्याकरणतः पञ्चविंशतिगुणम् अधिकं विज्ञायते। इन्द्र एव सर्वप्रथमं प्रकृति–प्रत्ययविश्लेषणस्य प्रवर्तकः। तथा चोच्यते तैत्तिरीयसंहितायाम् –

वाग्वै पराच्यव्याकृतावादत्। ते देवा इन्द्रमब्रुवन्, इ मां नो वाचं व्याकुर्विति। तामिन्द्रो मध्यतो अवक्रम्य व्याकरोत्।

एलमहोदयस्य कथनमत्र स्वारस्यां भजते। Our phonetic categories and terminology owe more than is perhaps generally realized to the influence of Sanskrit phoneticians . - Phonetics in Ancient India, W.S Allen, p.3.

**पाणिनिः**

पाणिनिरेव विश्वस्य सर्वोत्कृष्टो वैयाकारणः। तत्कृताष्टाध्याय्यां सूत्रसंख्या ३६६७ वर्तते। तत्र भाषाशास्त्रसम्बद्धाः सर्वे आपि विषयः समासतः प्राप्यन्ते। ध्वनीनां स्थानप्रयत्नविवेचनं ध्वोनिविज्ञानदृष्ट्या इति महत्वपूर्णम्। तत्र पदजातं सुप्तिङन्तं पदम्'' द्विधा विभज्यते। एतद च विभाजनं भाषाविनज्ञानदृष्ट्या अतीव वैज्ञानिकम् उपयोगि च। पाणिनिरेव सर्वप्रथमं वाक्यस्य महतत्त्वं स्वीकुरूते।

**पाणिनि परवर्तिनो वैयाकरणाः –**

पाणिनि परवर्तिषु वैयाकरणेषु वर्तिककारः कात्यायनः, महाभाष्यकारः पतञ्जलिश्च विशेषत उल्लेखमर्हतः। पाणिनि – कात्यायन–पतंजलयो 'मुनित्रयम्' इत्याख्यया वैयाकरनैः स्तूयन्ते। तत्परवर्तिषु वैयकरणेषु काशिका–वृत्ति–कारौ वामन–जयादित्यौ, वाक्यपदीयकारो भर्तृहरिः, न्यासकारो जिनेन्द्रबुद्धिः, महाभाष्यस्य प्रदीपटीकाकारः कैयटः, महाभाष्यस्य उद्योत–टी काकारः परिभाषेन्दुशेखर–लघुशब्देन्दुशेखर–स्फोटवादादिनां प्रणेता नागेशभट्टः, सिद्धान्तकौमुदीकारः शब्दकौस्तुभप्रौढमनारेमाग्रंथकृद भट्टोजिदीक्षितः, विशेषतः अत्र उल्लेखमर्हन्ति।

**अन्येवैयाकरणाः**

पूर्वोक्तातिरिक्तमपि केचन वैयाकरणा उल्लेखनीयाः सन्ति। रूपमाला–ग्रन्थकृद् विमलसरस्वती, प्रक्रियाकौमुदिकारो रामचंद्रः, वाक्यपदीयटीकाकारा वृषभदेव–पुण्यराज–हेलाराजाः, स्फोटसिद्धिकारो मण्डनमिश्रः, वैयाकरणभूषणकारः कौण्डभट्टः अष्टाध्यायीभाष्यकारो महर्षिर्दयानन्दसरस्वती।

**व्याकरणेतरशास्त्राणि**

व्याकारणेतरग्रन्थेश्वपि भाषाशास्त्रीयम् अध्ययनम् उपलभ्यते। काव्यशास्त्रीयग्रंथेषु शब्दशक्तेः ध्वनेश्च विवेचनं प्राप्यते। तत्रयो उल्लेख्या ग्रन्थाः सन्ति– भरतमुनि – कृतं नाट्यशास्त्रम्, दण्डिकृ

तः काव्यादर्शः, आनन्दवर्धनकृतो ध्वन्यालोकः, अभिनवगुप्तकृतं ध्वन्या लोकलोचनम्, भोजराजकृतं सर स्वतीकण्ठआभरणम्, मम्मटकृतः काव्यप्रकाशः, विश्वोनाथकृतः साहित्यदर्पणः, जगन्नाथकृतो रसगंगाधरश्च।

**आधुनिकसंस्कृतज्ञानां योगदानम्**

यद्यपि भाषाविज्ञानस्य आधुनिकरुपेणाध्ययनं पाश्चात्यविद्वत्साहाय्यामूलकमेव, तथापि केशांचित् भारतीयानामत्र विशेषतो योगदानं प्राप्यते। तत्र मुख्यत्वेन उल्लेख्या विद्वांसः सन्ति – डॉ. सिद्धेश्वर वर्मा – phonetic observations of Ancient Indian Grammarians, डॉ. सूनीतिकुमार चटर्जी Origin and Development of Bengali Language., श्रीतारापोरवाला Elements of the Science of Language ., डॉ. मंगलदेवशास्त्री तुलनात्मकभाषाविज्ञानम, डॉ. कपिलदेव द्विवेदी– अर्थविज्ञान, डॉ. भोलानाथ तिवारी–भाषाविज्ञानम्। अन्ये अपि बहवो पण्डिताः विविधभाषाणां भाषाशास्त्रीये अध्ययने प्रवृत्ताः संलक्ष्यन्ते।

# शिक्षायां साख्यिकी

**तपस्विनी साहु** अनुक्रमाङ्कः – 22

शिक्षाशास्त्रिद्वितीयवर्षः

शिक्षाशास्त्रविधिषु सांख्यिकी शास्त्रस्य विधिनां प्रयोगः भवति। सांख्यिकी इत्यस्य आङ्ग्लभाषायां Statistics इति समानार्थकशब्दः वर्तते। अयं लाटिनभाषायाः "Status" इति शब्दान्निष्पन्नः। अत एव केचन Statistics इति अमुं शब्दम् State एवम् Stick इति द्वाभ्याम् शब्दाभ्याम् निष्पन्नमिति मन्यन्ते।

सम्प्रति अयं Statistics शब्दः संख्याशास्त्रं सांख्यिकी इति वा संस्कृतभाषायां प्रयुज्यते। प्राचीनकाले राजानः जनसंख्या जननमरणानां निष्पत्तिः, राज्यस्य आयः,व्ययः इत्यादिविवरणानि संख्यारुपेण लिखन्ति स्म। एतेषां राजनीतिशास्त्रम् अथवा राज्ञां शास्त्रम् इति व्यवहारः लोकप्रसिद्धः आसीत्। अद्यत्वे दत्तांशस्य संग्रहणव्यवस्थापन – विश्लेषण – निष्कर्षादीनां विज्ञानं सांख्यिकी इत्युच्यते। संख्याशास्त्रमिदं विज्ञाने, गणिते, समाजशास्त्रे, अर्थशास्त्रे, मनोविज्ञाने, शिक्षामनोविज्ञाने च विविधकार्येषु अत्यन्तमुपकरोति। विंशतिशताब्द्यां 'Sir RONALD' 'A Fisher' च नामकः अस्य शास्त्रस्य विशिष्टस्थानम् अकल्पयेताम्।

**परिभाषाः**

- BOWLEY :- Statics may be call the science of counting.
- गणनस्य विज्ञानमेव संख्याशास्त्रम्।
- Croxtion, Cowden, Klein - आङ्किकविवरणस्य संकलनं प्रस्तुतीकरणं विश्लेषणं व्याख्यान–मित्येतत् सर्वं सांख्यिकी इति परिभाषितम्।

**शिक्षाक्षेत्रे साख्यिक्याः प्रयोजनानि**

१. विविधपरीक्षासु छात्रैः प्राप्ताङ्कानां विश्लेषणे व्याख्याने च शिक्षकाय उपकरोति।

२. उपलब्धिपरीक्षाणां निर्माणे प्रामाणिकीकरणे च इयमुपयोगी भवति।

३. विभिन्नविद्यालयेषु छात्राणाम् उपलब्धेः तुलना कर्त्तुं शक्यते।

**दत्तांशस्य सारणीकरणम्**

प्रायः कक्ष्यायां छात्रसंख्या ३० तः ५० पर्यन्तं भवति। शिक्षकः छात्राणां शैक्षिकोपलब्धिः, बुद्धिलब्धिः, भारः, औन्नत्यम् इत्यादिविवरणानि संख्यारुपेण संगृह्णति। मापनमूल्याङ्कनाभ्यां प्राप्तसंख्याः अथवा प्राप्ताङ्कान् दत्तांशः इति कथ्यते। दत्तांशे प्राप्ताङ्कानां योग्यरीत्या व्यवस्थापनं विना छात्राणां सामर्थ्यस्य विवरणं व्याख्यानञ्च कठिनतरं भवति। अतः प्राप्तदत्ताशस्य सारणीकरणम् आपेक्षते। सारणीकरणेन दत्तांशः व्यवस्थितः भवति तथा तस्य विश्लेषणं व्याख्यानञ्च सरलतया संभवति।

**आवृत्तिः**

दत्तांशे कस्यचित् अंकस्य पुनरावृत्तिः कतिपर्यायाः भवति, तत्तस्य आवृत्तिः इति कथ्यते। यथा –१०,१२,१५,१०,१८,२२,१०,१८,२१,१६ इति दत्तांशे १० अङ्कः त्रिवारम् आगतम्। अतः १० अङ्कस्य आवृत्तिः ३ इति कथ्यते। आङ्ग्ल भाषायां आवृत्तिं "७" इति कथ्यन्ते।

**व्याप्तिः**

दत्तांशे उच्चतमाङ्कस्य न्यूनतमाङ्कस्य मध्येविद्यमान भेदः एव व्याप्तिः इति कथ्यते।

व्याप्तिः=उच्चतमाङ्कः – न्यूनतमाङ्कः

Range = Highest Score – Lowest Score

पूर्वोक्तदत्तांशस्य व्याप्तिः = २२–१०=१२ भवति।

**अवर्गीकृतदत्तांशः**

यदि दत्तांशः लघुन्यादर्शात् संगृह्यते तर्हि तस्य वर्गीकरणं विनैव आवश्यकगणनाः सरलतया कर्तुं शक्यन्ते। दत्तांशे प्राप्ताङ्काना ३० तः न्यूनं (N-30)भवति चेत वर्गीकरणस्य आवश्यकता नास्ति।

यथा – १०,१२,१३,११,१५,२२,१८,१६,२१,२०।

वर्गीकृतदत्तांशः – (Grouped Data) –

यदि दत्तांशः बृहत् न्यादर्शात् संगृह्यते तर्हि तस्य वर्गीकरणं कृत्वा सारण्यां लेखनीयम्। इत्थं सारणीकृतदत्तांशः वर्गीकृतदत्तांशः इति कथ्यते। दत्तांशे न्यादर्शस्य संख्या ३० तः अधिकं (N-30) भवति चेदेववर्गीकरणं कर्तव्यम्।

**आवृत्तिविवरणसारणी**

आवृत्तिविवरणसारण्याः निर्माणम् उदाहरणेन परिशीलयामः। संस्कृतभाषायां ४० छात्रैः प्राप्ताङ्काः एवं वर्त्तन्ते।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| २५ | ३४ | ३५ | ३७ | ५५ | २७ | ४० | ३२ |
| ३४ | ३१ | ४४ | ३६ | २३ | ५१ | ३० | २२ |
| ३२ | ४५ | १६ | ३७ | ४१ | २० | २७ | ३६ |
| १६ | २८ | २८ | ३४ | ४७ | १० | १७ | ३३ |
| ४६ | २३ | १६ | २५ | २० | १८ | २४ | २१ |

अत्र पञ्चसोपानानि सन्ति –

१. दत्तांशस्य व्याप्तेः गणना।
(Calculating Range of Scores)
२. वर्गीविस्तारस्य परिमाणम्।
(Size of Class Interval)
३. वर्गविस्ताराणां संख्या।
(Number of Class Intervals)
४. गणनचिह्नानि।
(Tally Marks)
५. आवृत्तीनां गणना।
(Calculating Frequencies)

## शिक्षाक्षेत्रे शिक्षकस्य महत्वम्

**वरुण कुमार महान्ति** अनुक्रमाङ्कः– 24
शिक्षाशास्त्रिद्वितीयवर्षः

शिक्षा शब्दः संकृतस्य 'शिक्ष' विद्योपादाने इति धातुना निष्पन्नः भवति। लैटिन् शब्दस्य एजुकेशन् (Education) अस्य मूलरुपम् एजुकेटम् (Educatum, Educare) अस्ति। शिक्षा कलासु कौशलेषु च वृद्दिं करोति। दर्पणस्वरूपं भवति शिक्षा। शिक्षा मानवजीवनं सुसंस्कृतं कृत्वा जीवनयापनकलां पाठयति। विद्यायाः महिमाविषये संस्कृतसाहित्ये महती प्रशंसा अस्ति। यथा –

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्।।**

अर्थात् विद्याधनमेव एतादृशं धनम् अस्ति, यत् केनापि चोरयितुं नैव शक्यते, राजानोऽपि तद् धनं हर्तुं नैव शक्नुवन्ति, भ्रातापि तस्य धनस्य विभाजनं कर्तुं नैव शक्नोति। अतः मानवजीवने शिक्षायाः महती भूमिका वर्तते।

शिक्षा बालस्य अन्तर्निहितशक्तीनां बहिरानयनप्रक्रिया एव अस्ति। शिक्षया विना व्यक्तेः शारीरिक–मानसिक–भावात्मकानां विकासः भवितुं न अर्हति। अस्मिन् संसारे ते आदरं प्राप्नुवन्ति येषां समीपे विद्याधनं वर्तते। अस्माकं जीवने विद्यायाः महत्वम् अस्ति, कारणं शिक्षा एका आजीवनप्रक्रिया वर्तते। आङ्ग्लभाषायामपि उक्तम् अस्ति– Education is end of class room Not end of life.

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्।।**

विद्या अस्मभ्यं ददाति विनयभावम्। विनयभावेन सुपात्रः भवति। सुपात्र एव धनस्य योग्यः भवति। पुनः धनं भवति चेत् सामान्यकार्यं भवतु वा धर्मकार्यं भवतु सर्वाणिकार्याणि साधयितुं शक्नुमः।

अतः मूला एव भवति विद्या। विद्यादानं/शिक्षादानं कः करोति ? शिक्षादानं केवलं गुरवः कुर्वन्ति। सर्वे जानन्ति गुरवः समीचीनरीत्या, नियमानुसारम्/गुणम्, पक्षपातरहित, समानदृष्ट्यादि रूपेण शिक्षां यच्छन्ति।

**विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।**

विदुषा समानः राजा कदापि भवितुं न शक्नोति। यतः राजानः स्वदेशे आदरं प्राप्नुवन्ति परन्तु विद्वांसः सर्वत्र सम्मानं प्राप्नुवन्ति।

कस्यापि देशस्योन्नतिः तत्रत्यशिक्षणव्यवस्थायां वर्तते। तद्देशीयशिक्षासमुदायस्यापि महत् योगदानं वर्तते । आचार्य देवो भव इति वाक्यम्। शिक्षकः सामाजिकपरिवर्त्तनस्य केन्द्रबिन्दुः। भारतदेशस्य भविष्यं देशस्य कक्ष्याप्रकोष्ठेषु निर्मीयते। बालानां सर्जनात्मकतायाः कल्पनात्मकशक्तेश्च विकासाय क्रियमाणकर्मकौशलम् अध्यापकेषु भृशं वर्तते इति भारतीयशिक्षा आयोगस्य दृढ़विश्वासः।

## शिक्षणे प्रश्नकरणविधेः प्रामुख्यम्

**ओमप्रकाश पण्डा** अनुक्रमाङ्कः – 27
शिक्षाशास्त्रिद्वितीयवर्षः

शिक्षणं हि मानवाभ्युदयकारी किञ्चित्कर्म। अनुदिनं शिक्षते मनुजः। शिक्षणमेतत् औपचारिका–नौपचारिकादिरूपेण भिद्यते। तत्रौपचारिकशिक्षणे अध्यापकः गुरुर्वा, शिष्याः छात्राः वा भवन्ति। शिक्षणं तावत् छात्रशिक्षकयोर्मध्ये पारस्परिकी अन्तःप्रक्रिया भवति। अध्यापकाः पाठ्यांशान् बोधयति नूतनविचारान् शिक्षयति च। अतः शिक्षणे अध्यापकः मूर्धन्यस्थानं भजते। सैव शिक्षकः छात्रान् प्रभावयति यः न केवलं विश्लेषणसामर्थ्ययुक्तः अपितु सुष्ठु संचारणशक्तिपूर्णः भवति। अवसरेऽस्मिन् कविकुलगुरोः श्लोकः स्मर्यते –

**श्लिष्टाक्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां धुरिप्रतिष्ठा पयितव्य एव।।** मा.अ. १/२६

अतः विषयविश्लेषणं तत्सञ्चारणञ्च सुशिक्षकस्य कार्यद्वयम्। अतः अध्यापकः स्वविचारान् आकर्षकं रोचकञ्च कर्तुं तत्सञ्चारयितुं च प्रयतते।

अधुनातनशिक्षणे मनोविज्ञानस्य प्रभावः महान् वरिवर्ती। छात्राः न केवलं पुस्तकीयज्ञानं प्राप्नुयुः किन्तु क्रियाशीलाः अपि भवेयुः। अतः छात्राणामासक्तियोग्यतानुसारेण अध्यापकः शिक्षणाधिगमप्रक्रियायां नूतनविधीनां प्रयोगः कुर्वन् पाठयेत्।

शिक्षणाधिगमप्रक्रियायां प्रयोज्यमानविधिषु अन्यतमः भवति प्रश्नकरणविधिः। प्रश्नकरणविधौ अध्यापकः पाठ्याशं प्रश्नरूपेण विभजति, छात्रान् उत्तरदानार्थं प्रेरयति च। अदत्तोत्तरेषु अध्यापकः स्वयमेव उत्तरति। यदि छात्राः पिपृच्छिषवः तदा तेऽपि यथेच्छं पाठ्यांशमधिकृत्य प्रष्टुमर्हन्ति। एवमुत्साहपूर्णवातावरणं कक्षायामुत्पद्यते प्रश्नकरणविधेः। तदर्थं प्रश्नकरणविधिः उत्तमविधिषु अन्यतमः।

**प्रश्नकरणविधेः स्वरूपम्**

'प्रच्छ'धातोःभावे नङ् प्रत्यये प्रश्न इति रुपं सिध्यति।'अविज्ञातप्रवचनं प्रश्नमित्यभिधीयते'। 'कथनाय प्रेरणे' इत्यमरः। "मस्तिष्कं प्रबोधयितुं चिन्तनशक्तिं जागरयितुम् अवधानं रक्षितुञ्च उपयुक्तं शाब्दिकमाध्यममेव प्रश्नः"– इति जङ्रगी प्रश्नं पर्यभाषयत्।

**प्रश्नकरणस्योद्देश्यानि**

1. छात्राः स्वजिज्ञासोशमनार्थं प्रश्नान् पृच्छेयुः।
2. छात्राणां पूर्वज्ञानानि नूतनज्ञानैः सह संयोजनम्।
3. छात्रेभ्यः चिन्तनस्यावसरप्रदानम्, येन तेषां वैचारिकाभ्यासः वर्धेत।
4. स्वज्ञानस्य प्रयोगाय प्रदर्शनाय च छात्रेभ्य अवसरप्रदानम्।
5. छात्राणां रुचेः अभिवृत्तेः प्रवृत्तेश्च ज्ञानप्राप्त्यर्थम्।
6. छात्राणां वैयक्तिकमसौविध्यं न्यूनत्वञ्चावगन्तुम्।
7. अध्ययनकार्ये छात्राणां सहयोगः।
8. शिक्षणाधिगमस्य मूल्यांकनम्।
9. पाठस्यावृत्तिः पुनरावृत्तिश्च।

**प्रश्नप्रकाराः**

सामान्यतः शिक्षणे प्रश्नप्रकाराः द्विधा विभक्तुं शक्यन्ते। यथा –

१. छात्रप्रश्नः – छात्रप्रश्नः तावत् जिज्ञासापूर्वकः, संशयात्मकप्रश्नश्चेति द्विधा विभक्तुं शक्यते।

२. अध्यापकप्रश्नः – अध्यापकप्रश्नस्तु बहुविधाः भवन्ति। प्रबन्धस्यास्य विस्तरभयात् केवलं नामोल्लेखः क्रियते –

१. प्रस्तावनात्मकप्रश्नः
२. विकासात्मकप्रश्नः
३. विचारात्मकप्रश्नः
४. समस्यात्मकप्रश्न
५. बोधप्रश्नः
६. तुलनात्मकप्रश्नः
७. पुनरावृत्तिप्रश्नः

**उत्तमप्रश्नस्य वैशिष्ट्यम्**

उत्तमप्रश्नः कथं स्यात् ? इति जिज्ञायाम् उच्यते, ये उत्तमाः प्रश्नाः भवन्ति तेषां कानिचन वैशिष्ट्यानि भवन्त्येव। तेषामुल्लेखः सम्प्रति क्रियते।

- प्रश्नः एकवचनात्मकं भवेत्।
- प्रश्नः निश्चितोद्देश्यात्मकः भवेत्।
- प्रश्नः संक्षिप्तः साक्षात् च भवेत्।
- प्रश्नाः क्रमबद्धाः भवेयुः।
- प्रश्नः स्वरचितः एव स्यात्।
- प्रश्नानां श्रेणीविभाजनं भवेत्।

- विचारोत्तेजकाः प्रश्नाः भवेयुः।
- प्रश्नानां स्वरुपे विविधता स्यात्।
- प्रश्नास्योत्तमं वितरणं स्यात्।
- प्रश्नाः सरलाः स्पष्टभाषायाञ्च भवेयुः।
- प्रश्नेन ज्ञानस्य मूल्याङ्कनमपि भवेत्।
- संक्षिप्तोत्तरात्मकः प्रश्नः भवेत्।

इत्यादि उत्तमाः प्रश्नाः भवन्ति। एतेषां प्रश्नानां शिक्षणाधिगमे आवश्यकता नूनं वर्तते।

**दोषपूर्णाः प्रश्नाः**

पूर्वम् अस्माभिः ज्ञातं प्रश्नः कथं भवेत् इति। अतः तस्य विरुद्धतया प्रवर्तनेन प्रश्नाः दोषपूर्णाः भवन्ति। तत्कथम् इति पश्यामः –

- अपूर्णः प्रश्नः न भवेत्।
- सांकेतिकोत्तरात्मकः प्रश्नः न प्रष्टव्यः (यथा–आम्/न)।
- उत्तरसूचकः प्रश्नः न स्यात्।
- अनेकात्मकः प्रश्नः न भवेत्।
- शब्दानामनुचितप्रयोगः तथा अस्पष्टप्रश्नः न स्यात्।
- बृहदुत्तरात्मकः प्रश्नः न स्यात्।

**प्रश्नकरणसमये अवधेयांशः**

१. प्रश्नकरणावसरे सम्पूर्णकक्षायां प्रश्नः वितरणीयः। येन सर्वे छात्राः प्रश्नोत्तराणां विषये चिन्तनं कुर्युः। क्षणात्परं एकस्मात् छात्रात् उत्तरं याचनीयम्।
२. प्रश्नकरणात्परं साक्षादेव उत्तरस्य जिज्ञासा न कर्तव्यः।
३. छात्राणां ध्यानाकर्षणार्थं प्रश्नः कर्तव्यः।
४. यदि कश्चन छात्रः शुद्धमुत्तरं न प्रददाति तर्हि अन्येभ्यः छात्रेभ्यः प्रश्नः कर्तव्यः।
५. प्रश्नकरणे अतिशीघ्रता न करणीयः।
६. प्रश्नकरणस्य स्वरः कक्ष्योचितः स्यात्।
७. प्रश्नः विनम्रतया प्रष्टव्यः। क्रोधपूर्णस्वभावेन प्रश्नकरणमनुचितमस्ति।

अतः 'छात्राणां मस्तिष्कं प्रवोधयितुं चिन्तनशक्तिं जागरयितुं अवधानं रक्षितुञ्च उपयुक्तं शाब्दिकमाध्यममेव प्रश्नः' – इति कथने नातिशयोक्तिः।

# अभिवृद्धिविकासयोः सिद्धान्तः

**दीपक सरकारः** अनुक्रमाङ्कः – 30
शिक्षाशास्त्रिद्वितीयवर्षः

**प्रस्तावना**

अभिवृद्धिविकासयोः विषये बहवः दार्शनिकाः मनावैज्ञानिकाश्च अनुसन्धानं कृतवन्तः।

फलतः अभिवृद्धिविकासयोः प्रक्रिया मानवेषु निश्चितसिद्धान्तानामाश्रित्य प्रवर्तते इति ज्ञायते। एते सिद्धान्ताः अभिवृद्धिविकासयोः सामान्यसिद्धान्ताः इति व्यवह्रयन्ते। शिक्षामनोविज्ञानस्य अध्येतारः एतानवश्यं जानीयुः। यथा –

1. वैयक्तिकविभेदसिद्धान्तः – विभिन्नव्यक्तिषु विकासस्य गतिः भिन्न भवति। प्रत्येकबालकः विशिष्टः वर्तते। अतः सः स्वाभाविकरीत्या विभिन्नक्षेत्रेषु विकासं प्राप्नोति। अतः एव समानवयस्कयोः द्वयोः बालकयोः शारीरिक, मानसिक, सामाजिक, नैतिकविकासादिषु महदन्तरं भवति। कदाचित् शारीरिक–मानसिकसामर्थ्येष्वपि भेदः भवति।

2. विकासः सामान्यतः विशेषं प्रति भवति। विकासस्य विभिन्नावस्थासु सामान्यक्रियायानन्तरं विशिष्टक्रिया उत्पद्यन्ते। यथा नवजातशिशोः रोदनकाले शरीरस्य अङ्गप्रत्यङ्गेषु चलनमुत्पद्यन्ते परन्तु कालान्तरे रोदनेन तस्य वाग्यन्त्रस्य नेत्रयोश्च चलनं भवति । तथैव भाषाविकासेऽपि बालकः सामान्यं ज्ञात्वा विशेषमवगच्छति।

3. निरन्तरतासिद्धान्तः – मनुष्ये अभिवृद्धिविकासयोः प्रक्रियाः मातुः गर्भधारणादारभ्यः मृत्युप्रर्यन्तं निरन्तरं प्रचलति। यथा प्रारम्भिकावस्थासु प्रक्रियेयं तीव्रगतया भवति। ततः परं मन्दं मन्दं प्रचलति।

4. परस्परसम्बन्धसिद्धान्तः – शारीरिकमानसिकसामाजिकसांवेगिकनैतिकविकासानां मध्ये परस्परसम्बन्धः भवति। एतेषु कस्यचित् एकस्य विकासः अन्यान् प्रभावयति।

5. वंशानुक्रमवातावरणयोः अन्तः क्रिया सिद्धान्तः – वंशानुक्रमवातावरणयोः अन्तः क्रियया बालकस्य विकासः भवति। अर्थात् केवलवंशानुक्रमः वा केवलवातावरणं विकाशदिशां न निर्धारयन्ति। उत्तमवंशे जातोऽपि बालकः कुलशितवातावरणे सम्बन्धितश्चेत् विषमयोजनं प्राप्नोति तथा सामान्यकुले जातोऽपि उत्तमपरिवेषे संवर्धितश्चेत् उत्तमपौरः सञ्जायते। इत्थं वंशानुक्रमः परिवेषे बालकस्य व्यक्तित्वं प्रभावयत्।

## पाठयोजना

**शिवं कुमार शुक्ल** अनुक्रमाङ्कः – 32

शिक्षाशास्त्रिद्वितीयवर्षः

कक्षायां गमनात् पूर्वं शिक्षणार्थं क्रियमाणा पूर्वसज्जता एव पाठयोजना। सा पाठयोजना द्विधा–अमूर्तपाठयोजनामूर्तपाठयोजना च।

**अमूर्तपाठयोजना** – पाठनार्थम् अलिखितरूपेण या मानसिकसज्जता क्रियते सा भवति अमूर्तपाठयोजना। इयं तु अभ्यासेन कालक्रमेण सिद्ध्यति।

**मूर्तपाठयोजना** – कक्षायां पाठनार्थं लिखितरूपेण क्रियमाणा सज्जता एव मूर्तपाठयोजना।

**पाठयोजनायाः स्वरूपम्**

पाठयोजनायाम् एकादशसोपानानि भवन्ति। इयं पाठयोजना पञ्चविभागेषु विभक्ता भवति।

**पाठयोजनायाः उद्देश्यानि**

१) समयानुसारं पाठनीयस्य विषयस्य निर्माणम्।

२) पाठनीयविषये सामान्यांशानां विशिष्टांशानां च विवेचनम्।
३) विभिन्नांशानां पाठनाय अपेक्षितानां शिक्षणयुक्तीनाञ्च निर्णयः।
४) छात्राणां स्तरानुसारं मनोवैज्ञानिकरीत्या अध्यापनाय सन्नाहः।

**उद्देश्यानि द्विविधानि भवन्ति**

१) सामान्योद्देश्यानि

अस्य पाठस्य पाठनेन छात्राणां सामान्यतया कीदृशविकासः भवति तदत्र लिख्यते। तत्तु प्रायः समानमेव भवति। यथा–श्रवणभाषणलेखनपठनकौशलानां विकासः। संस्कृतपठने अभिरुच्युत्पादनम्। सामान्योद्देश्यानि प्रायः अष्टौ भवन्ति।

२) विशिष्टोद्देश्यानि

अस्य पाठस्य पाठनेन विशिष्टरूपेण छात्रः किं प्राप्नोति तदत्र लिख्यते।
विशिष्टोद्देश्यानि कतिपयेषु विभागेषु विभक्ताः भवन्ति।

- ज्ञानात्मकानि – अत्र पूर्वश्रुतशब्दाः लिख्यन्ते। इदं पूर्वज्ञानाधारितं भवति।
- भाषागतानि – पाठ्यांशे श्रुतपूर्वशब्दानाम् उल्लेखः अत्र भवति। यानिपदानि छात्रैः पूर्वश्रुतानि सन्ति किन्तु तेषां विषये स्पष्टज्ञानं न भवति तादृशानि अत्र भवन्ति।
- विषयगतानि – पाठ्यांशसम्बद्धं छात्राणां पूर्वज्ञानं किमस्ति तस्योल्लेखः।
- अवबोधात्मकानि – अत्र तेषां पदानाम् उल्लेखः भवति यानि पदानि अश्रुतपूर्वाणि भवन्ति, येषां च विषये छात्राः न जानन्ति (क्लिष्टपदानि)।
- भाषागतानि–पाठ्यांशे विद्यमानानि कठिनपदानि अत्र लिख्यन्ते यानि पाठनार्थं बिन्दुरूपेण स्वीकृतानि भवन्ति।
- विषयगतानि – अस्य पाठस्य पाठनेन छात्रः कीदृशज्ञानं प्राप्नोति तस्योल्लेखः भवति।
- कौशलात्मकानि – अत्र छात्रस्य लेखनवाचनकौशलयोः विकासः सम्पाद्यते।
- लेखनात्मकानि – छात्राणां लेखनकौशलविकासार्थं पाठ्यांशे विद्यमानानां क्लिष्टपदानाम् उल्लेखः अत्र क्रियते।
- उच्चारणात्मकानि – उच्चारणकौशलविकासार्थं पाठ्यांशे विद्यमानानाम् उच्चारणात्मक–क्लिष्टपदानामुल्लेखः अत्र भवति।
- अभिरुच्यात्मकानि –पाठ्यांशे छात्रः कीदृशीमभिरुचिं प्राप्नोति तस्योल्लेखः अत्र क्रियते।
- अनुभूत्यात्मकानि – पाठ्यांशंपठित्वा छात्रः कीदृशमभिरुचिं प्राप्नोति तस्योल्लेखः अत्र क्रियते।
- बोधनोपकरणानि – पाठनावसरे छात्राध्यापकः यानि उपकरणानि प्रयुङ्क्ते तस्योल्लेखः भवत्यत्र। तच्च द्विविधम् – सामान्यानि विशिष्टानि च।
- पूर्वज्ञानम् – छात्राणां पूर्वज्ञानविषयकोल्लेखः अत्र क्रियते।

**पाठयोजनायाः पञ्चस्तम्भाः**

**1) सोपानानि**– अत्र स्वीकृतसोपानानाम् उल्लेखः क्रियते। यथा प्रस्तावना, उद्देश्यकथनम् इत्यादीनि।

**2) पाठ्यवस्तु** – यं बिन्दुं/पाठ्यवस्तुं स्वीकृत्य पाठ्यते तदत्र लिख्यते। सोपानानुगुणं पाठ्यवस्तु–लेखनं भिद्यते।

**3) लक्षिताधिगमविशेषः** – छात्राध्यापकक्रियायां यद् पाठ्यते तस्य मूल्याङ्कनं मूल्याङ्कनकोष्ठके क्रियते। यद् मूल्याङ्कनं क्रियते तेन छात्रः किं प्राप्नोति तस्योल्लेखनमत्र क्रियते। यत्र मूल्याङ्कनं न क्रियते तत्र लक्षिताधिगमविशेषकोष्ठकः छात्राध्यापकक्रियाधारितः भवति।

**4) छात्राध्यापकक्रिया** – छात्राध्यापकेन याः याः क्रियाः क्रियन्ते तासां लेखनं भवत्यत्र। विधीनामुपयोगः अपि अत्रैव भवति।

विधयः – १) प्रत्यक्षविधिः, २) अनुवादविधिः, ३) व्याकरणविधिः (सन्धिः, समासः, व्युत्पत्तिविधिः), ४) तुलनाविधिः, ५)कोषविधिः, ६) पर्यायविधिः, ७) वाक्यप्रयोगविधिः, ८) अभिनयविधिः, ६) विलोमविधिः, १०) प्रसङ्गविधिः, ११) व्याख्यानविधिः।

**5) मूल्याङ्कनम्** – मूल्याङ्कनं पाठप्रवर्धने एव भवति ।पाठितपदस्य मूल्याङ्कनमत्र प्रश्नमाध्यमेन क्रियते।

**सोपनानि**

सम्पूर्णपाठयोजना सोपानाधारिता भवति, शिक्षकस्य सर्वाः क्रियाः सोपानेषु निबद्धाः भवन्ति। शिक्षकेन सोपानमाश्रित्यैव पाठनीयं भवति। तानि सोपानानि एकादश भवन्ति।

१ प्रस्तावना–(5 नि.) पूर्वज्ञानाधारिता भवति प्रस्तावना। प्रस्तावनायाः उद्देश्यं भवति छात्रान् पाठोन्मुखी–करणम्। प्रस्तावनाद्वारा छात्रः पूर्वज्ञानस्य स्मरणं कुर्वन् नूतनज्ञानं प्रति अभिप्रेरितः भवति। प्रस्तावनां त्रिधा कर्तुं शक्यते।

१) प्रत्यक्षद्वारा (चित्रम्, वस्तु, चलच्चित्रम् , साक्षात् प्रदर्श्य आदि)।

२) कथामध्यमेन ३) प्रश्नद्वारा।

**प्रस्तावनायाम् अवधेयांशाः**

- चित्रं स्पष्टं स्यात्। चित्रस्य आकारः सर्वैः द्रष्टुं योग्यः स्यात्।
- प्रश्नाः सरलाः स्पष्टाः च भवेयुः।
- प्रश्नेषु परस्परसम्बन्धः स्यात्।
- प्रायः आहत्य पञ्चप्रश्नाः भवेयुः। तेषु पञ्चमप्रश्नः समस्यात्मकः स्यात्।
- प्रश्नः लघुः, व्याकरणदोषरहितः च स्यात्।
- नकारात्मकाः भ्रमात्मकाः विकल्पात्मकाः(वा खलु) प्रश्नाः नैव भवेयुः।
- कथा सरला पाठसम्बद्धा लघ्वी च स्यात्।

२. उद्देश्यकथनम् –उद्देश्यकथने पाठस्य शीर्षकस्योल्लेखः श्यामपट्टे कर्तव्यो भवति।

३. आदर्शवाचनम् (5.नि) – आदर्शवाचने गति–यति–लयपुरस्सरं कक्ष्योचितस्वरेण शुद्धतया स्पष्टतया च पाठ्यांशस्य वाचनं क्रियते। पृष्ठसङ्ख्या अवश्यं सूचनीया।

४. अनुवाचनम् (5नि.) छात्राणां वाचनकौशलस्य विकासः एव अस्य मुख्योद्देश्यम्। छात्रान् अनुवाचनार्थं सूच्यते निरीक्षणञ्च क्रियते।

५.त्रुटिसंशोधनम् (3नि.) – अनुवाचने जातान् उच्चारणगतदोषान् छात्रसाहाय्येन दूरी क्रियते। पाठ्यांशे क्लिष्टपदानां बोधनं छात्रसाहाय्येन श्यामपट्टमुपयुज्य लेखयित्वा दूरी कार्यते।

६. पाठप्रवर्धनम् (15.नि) – पाठप्रवर्धने प्रायः अष्टक्लिष्टबिन्दून् स्वीकृत्य विविधविधिना बिन्दूनां

विश्लेषणं क्रियते। अत्र क्लिष्टपदानामेव ग्रहणं भवति।
✧ एकं पदं स्वीकृत्य विविधविधिना तस्य पाठनम् क्रियते।
✧ एकस्य विधेः उपयोगः वारत्रयं कर्तुं शक्यते।
✧ प्रतिपदस्य पाठनानन्तरं मूल्याङ्कनमवश्यं प्रश्नमाध्यमेन करणीयम्। स च प्रश्नः मूल्याङ्कनकोष्ठके लिख्यते।
✧ प्रयुक्तविधेः उल्ल्लेखः अवश्य स्यात्।
७. अवबोधप्रश्नाः (3नि).– पाठितपाठ्यांशे छात्राणाम् अवबोधः कियता प्रमाणेन जातः तद्ज्ञानार्थम् अवबोधप्रश्नाः क्रियन्ते। ते प्रश्नाः प्रायः पाठितपदमुपयोज्य एव भवन्ति। अवबोधप्रश्ने प्रश्नाः लघु–सरलाः च भवेयुः। न्यूनातिन्यूनं प्रश्नत्रयम् अधिकाधिकाः पञ्चप्रश्नाः भवेयुः।
८. सारांशकथनम्/ विस्तृतव्यख्यानम् – (5नि.) पाठ्यांशस्य साररूपेण/विस्तृतरूपेण वा कथनं क्रियते। अत्र पाठसम्बद्धम् अन्यं विषयमपि वक्तुं शक्यते। अत्र पाठ्यवस्तुनः सरलीकृतरूपः भवति। पाठ्यवस्तु पद्यांशश्चेत् तस्य तात्पर्यं स्पष्टतया वक्तव्यं भवति।
९. मौनवाचनम् – (2.नि) अनेन छात्राः पाठ्यवस्तुं सम्यक्तया अर्थग्रहणपुरस्सरं पठितुं शक्नुवन्ति। छात्राः मौनेन अर्थग्रहणपुरस्सरं पठितुं संसूच्यन्ते। तेषां निरीक्षणञ्च क्रियते।
१०. पुनरावृत्तिप्रश्नाः (3नि) – पाठितविषयस्य पुनः स्मरणमेव अस्योद्देश्यम्। अत्र न्यूनातिन्यूनं प्रश्नत्रयम् अधिकाधिकाः पञ्चप्रश्नाः भवेयुः। प्रश्नाः चिन्तनात्मकाः भवेयुः। प्रश्नाः क्लिष्टाः भवितुमर्हन्ति। प्रश्नाः विषयसम्बद्धाः स्युः।
११. गृहकार्यम् (2नि.) – प्राप्तज्ञानस्य दृढीकरणं गृहे शैक्षिकवातावरणस्य निर्माणञ्च अस्योद्देश्यम् अत्र त्रयः प्रश्नाः भवन्ति।
✧ प्रथमप्रश्नः विमर्शात्मकः स्यात्।
✧ द्वितीयप्रश्नः चिन्तनात्मकः स्यात्।
✧ तृतीयप्रश्नः कौशलात्मकः स्यात्।
(चित्रादीनां निर्माणम्, शब्दधातुरूपाणां लेखनञ्च)।
पाठयोजनायाः निर्माणावसरे प्रयोगावसरे च अवधेयांशाः
✧ पाठयोजना स्पष्टा शुद्धा च स्यात्।
✧ प्रश्नवितरणावसरे समानभावना पक्षपातराहित्यं च स्यात्।
✧ प्रश्नाः सर्वेषां कृते प्रष्टव्याः उत्तरं तु एकस्मात् एव स्वीकर्तव्यम्।
✧ आदौ प्रश्नस्य प्रदानम् अनन्तरं छात्रस्य निर्देशः उत्तरदानार्थं करणीयः।
✧ प्रश्नाः पाठ्यवस्तुसम्बन्धिताः स्पष्टाः च स्युः।
✧ प्रश्नेषु वा, खलु आदिपदानां प्रयोगः नैव स्यात्।
✧ पाठयोजनायां कुत्रापि आदेशः नैव स्यात् सूचना निर्देशः वा स्यात्।
✧ प्रश्नानां पुनरावृत्तिः न स्यात्।
✧ छात्रद्वारा उत्तरप्राप्तेरनन्तरं साधुवादशब्दैः (शोभनम्, उत्तमम्, साधु) अभिनन्दनीयम्।
✧ स्वीकृत पाठ्यवस्तु नातिदीर्घं नातिलघु च स्यात्।

✧ पाठ्यविषये सम्यक्ज्ञानं प्रभुत्वं च स्यात्, अज्ञातविषयस्य प्रस्तुतीकरणं न स्यात्, दोषरहितं पाठनीयम्।
✧ श्यामफलके स्पष्टं सुन्दरं शुद्धं छात्रावगमनयोग्यं लेखनीयम्।
✧ पाठनावसरे कक्ष्योचितस्वरः स्यात्।
✧ पाठकस्य चलन– हाव दृभावादिकं कक्ष्यायामुचितरूपेण स्यात्।
✧ वृथा सुधाखण्डः मार्जनी च हस्ते न स्वीकर्तव्या।
✧ कक्ष्यायां प्रीतिपूर्णं वातावरणं स्यात्।
✧ आत्मविश्वासेन धैर्येण पाठनीयम्।
✧ छात्रस्य स्पर्शः नैव कर्त्तव्यः।
✧ पदस्यार्थः साक्षात् नोक्तव्यः। छात्रमुखात् आनेतुं प्रयासः कर्तव्यः।
✧ सरलपदानि अध्यापनबिन्दुत्वेन नैव स्वीकर्तव्यानि।
✧ यानि पदानि विशिष्टोद्देश्ये स्वीकृतानि तानि अवश्यं पाठप्रवर्धने पाठनीयानि भवन्ति।
✧ पाठयोजना छात्राणां स्तरम् ऊहित्वा निर्मीयते न तु स्वस्य।
✧ पाठयोजनायाः प्रथमपृष्ठे एव शिक्षकस्य विवरणं लेखनीयं, नाम, कक्षा, अनुक्रमांकः, दिनांकः, वासरः, कालांशः, प्रकरणम् इत्यादीनाम्।
✧ पाठयोजनायाम् एकरूपता स्यात्।

**उपसंहारः**

कक्षायां शिक्षकस्य सर्वोत्तमं मित्रं भवति पाठयोजना, यदि पाठयोजनायाः सज्जता सम्यक् भवति तर्हि कक्षायां पाठनसमये न कोपि क्लेशः अनुभूयते। यद्यपि पाठयोजनायाः निर्माणसमये मतभेदाः दृश्यन्ते। तथापि यथा– एकस्मिन्नेव गृहे विद्यमानानां जनानां रुचिः भिन्ना भवति, एकः भोजने सैन्धवमधिकमिच्छति अन्यः न्यूनं तथापि सैन्धवं तु भवत्येव, तद्वदेव पाठयोजना तु निर्मातव्या।

# शैक्षिकसंघटनम्

**भुवनेश नौड़ियाल** अनुक्रमाङ्कः – 33
शिक्षाशास्त्रिद्वितीयवर्षः

संघटनं नाम व्यवस्था इति वक्तुं शक्यते। आंग्लभाषायां संघटनं नाम Organisation इति वर्तते।

फ्रेञ्चमहोदयस्यमतानुसारम्–संघटनस्य अर्थः इत्थमस्ति–उद्देश्यानां परामर्शेन सह संघटनार्थ–मपेक्षितानां तत्त्वानां व्यवस्थापनम् एतदेका नूतनव्यवस्थायाः प्रकल्पनप्रक्रियापि वर्तते। वस्तुतः एतदेकं पुनः संघटनमस्ति तथापि संघटनप्रक्रिया इति उच्यते। अतोऽस्माभिः पुनस्संघटनमेव संघटनमित्युच्यते। शिक्षायाः वा विद्यालयस्य संघटनात्मकः पक्षः मुख्यतः व्यवस्थया सम्बद्धः वर्तते, या च व्यवस्था निर्धारितान्युद्देश्यानि प्राप्तुं सह करोति।

उत्तमफलप्राप्त्यर्थं भौतिकं मानवीयञ्च तत्त्वं सुव्यवस्थितं करोति सङ्घटनम्। कस्यचित् विद्यालयस्य स्थापना कर्तव्या चेत् तदर्थमुत्तमवातावरणस्य, जलस्य, भवनस्य, उपकरणानां शैक्षिक–सज्जतानां शिक्षकाणां कर्मचारिणाञ्च प्रबन्धं कर्तव्यं भवति। तथैव एतेषां तत्त्वानां समायोजनमपि कर्तव्यं भवति। उदाहरणार्थं चारित्रिकविकासार्थं विद्यालये पाठ्यसहगामिक्रियाणां नैतिकवातावरणस्य सामाजिकक्रियाणाञ्च सङ्घटनं कर्तव्यं भवति, येन बालकस्य चरित्रनिर्माणसमुचितदिशायां भवेत्। विद्यालयसङ्घनं तादृशं कार्यमस्ति यत्र शिक्षकाः, छात्राः, प्रधानाध्यापकाः परिनिरीक्षकाश्च तथा सामाजिकाः विद्यालयस्य कार्यं चालयितुं मिलित्वा कार्यं कुर्वन्ति। भौतिकमानवीययोः तत्त्वयोः समुचितरूपेण व्यवस्थापनमेव विद्यालय सङ्टनमित्युच्यते।

# प्रजातन्त्रायै शिक्षायाः आवश्यकता

**स्वर्णलता मुदुलि** अनुक्रमाङ्कः – 34
शिक्षाशास्त्रिद्वितीयवर्षः

**प्रजातन्त्रस्य अर्थः**

प्रजातन्त्रस्य लोकतन्त्रस्य जनतन्त्रस्य अर्थः प्रजायाः शासनम्, जनानाम् शासनञ्च। प्रजातन्त्रम् अयम् शब्दः आङ्लभाषायाम् "Democracy" इत्युच्यते। अयं ग्रीकभाषायाः डेमोस् (Demos) तथा क्रेटोस् क्रेशिया व (kratosor) शब्दात् निष्पन्नः वर्तते। डेमोस (Demos) शब्दस्य अर्थः भवति जनानाम् (People) तथा क्रेटस् अथवा क्रेशिया शब्दस्यार्थः शक्तिः (Democracy) अर्थात् डेमिक्रेसी (Democracy) शब्दस्य अर्थः भवति जनानाम् शक्तिः। अतः प्रजातन्त्रस्य तात्पर्यं सा शासनप्रणाली यस्यां शासनशक्तिः एकस्मिन् व्यक्तौ अथवा वर्गविशेषे निहितं न भूत्वा जनसाधारणे अथवा जनेषु निहितं भवति।

**परिभाषा**

Abraham Lincoin – "Democracy is a government of the people for the people and by the people" अर्थात् प्रजातन्त्रीय शासनस्य तत् रूपम् अस्ति यत् शासनं जनानां कृतेजनेभ्यः जनैः द्वारा भवति।

Seeley-"Democracy is a government in which everyone has a share" "अर्थात् प्रजतन्त्रीय शासनं तत् वर्तते, यस्मिन् प्रत्येक व्यक्तेः भागग्रहणं भवति।

**शिक्षायाः अर्थः परिभाषा च**

शिक्षाशब्दः संस्कृतस्य "शिक्ष" विद्योपादाने धातोः योगेन निष्पन्नः भवति। यस्यार्थः अस्ति जिज्ञासा। वास्तविकतया शिक्षायाः अर्थः ज्ञानार्जनेन संस्काराणां व्यवहाराणाञ्च उत्तमत्तमनिर्माणम् अस्ति। पुनश्च शिक्षा लेटिन् शब्दस्य एजुकेशन (Education) अस्य मूलरूपं एजुकेटम् अस्ति। व्यक्तेः मनसः परिपूर्णविकाससम्पादनप्रक्रिया एव शिक्षा " Dr. ZakirHussain" महोदयेन उक्तमस्ति शिक्षा व्यक्तेः समाजस्य च विकासं सम्पादयति।

प्रजातन्त्रायैः शिक्षायाः महती आवश्यकता वर्तते। प्रजातन्त्रस्य सफलतायै शिक्षा एवं

राजनीतिकचेतनात्यावश्यकमस्ति। यदि जनाः राजकार्येषु रूचिः न गुह्णन्ति तर्हि ते सामाजिकसमस्याः नावगच्छन्ति तदा प्रजातन्त्रं केवलं नाम्ना भवति। प्रजातन्त्रे ये दोषाः भवन्ति तेषां प्रमुखकारणं शिक्षायाः अभावो वर्तते। शिक्षा एव प्रजतन्त्रे नागरिकान् संयोजयति। तथा राजकीयकार्येषु अभिरूचिं जनयति। अतः प्रजातन्त्रे शिक्षायाः आवश्यकता वर्तते।

अस्मिन् सन्र्दभेश्रीवदकमूमलमहोदयः अकथयत् – "शिक्षायै प्रजातन्त्रस्य निष्ठा एकं सुपरिचितं तथ्यं वर्तते। शिक्षायाः अभावे प्रजातन्त्रं निर्जीवं तथा नमनीयमस्ति। अपि च प्रजतनत्रस्य अभावे शिक्षा शुष्का, नीरसा मृतप्राया भवति " पुनश्च प्रजातन्त्रे एतादृशी शिक्षा भवेत्, यया जनान् सामाजिक सम्बन्धे नियन्त्रणे च व्यक्तिगतरुचिः भवेत्, अपि च तेषु एतादृशस्य मानसिकविचाराणां निर्माणं स्यात्, येन अव्यवस्था उत्पन्नं न भूत्वा सामाजिकपरिवर्तनं सम्भवं स्यात्।

# अनुशासनम्

**रस्मिता बेहेरा** अनुक्रमाङ्कः– 35
शिक्षाशास्त्रिद्वितीयवर्षः

मानवजीवने अनुशासनस्य महती भूमिका वर्तते। अनुशासितजनस्य व्यक्तित्वं सन्तुलितं भवति। अनुशासनं नास्ति चेत् समग्र अपि मानवजीवनं निष्फलं निष्क्रियं च भवति। अनुशासितव्यक्तिः जीवनस्य प्रत्येकस्मिन् अपि क्षेत्रे सफलताप्राप्त्यर्थं समर्थः भवति। अस्माकं जीवनं नियमैः बद्धमस्ति। परिवारस्य, समाजस्य, विद्यालयस्य, संविधानस्य, सेनायाः संसदानमपि केचन नियमाः निर्दिष्टाः सन्ति। एतेषां नियमानां परिपालनमेव अनुशासनमिति कथ्यते। सृष्टिरपि अनुशासनमनुसरति। सूर्यः, चन्द्रः, तारकाः नियमितसमये पंक्तिभूय भूय अनुशासनस्य परिचयं प्रयच्छन्ति। ऋतवः अपि एकस्मिन् मासे नायान्ति ते भिन्नमासेषु आयान्ति। संयमितं, नियमितं, अनुशासितजीवनमेव भवति सार्थकजीवनम्।

अनु इत्युपसर्गपूर्वक शास् धातोः ल्युट् प्रत्यययोगेन अनुशासनम् इति पदस्य निष्पत्तिः भवति। शासनमित्युक्ते विधिः अथवा नियमः इति। अर्थात् शासनं भवति नियमानां नियंत्रणं वा स्वीकरणीयमिति। आंग्लभाषायां अनुशासनं Descipline इति कथ्यते। Desciplina इति लैटिन् शब्दात् अस्य निष्पत्तिः भवति। यस्यार्थपदेन अभ्यासः नियमः व्यवस्था च वर्तते। केषाञ्चन मतानुसारं अस्य शब्दस्य निष्पतिः लैटिन् भाषायाः Discipulum इति शब्दात् भवति। यस्यार्थः गुरोः समीपे शिष्यस्य श्रद्धापूर्वकमादेशपालनम् इति एवं रूपेण Descipline शब्दस्य अर्थः भवति आचरणेषु नियमिततासम्पादनम् इति।

**शिक्षाक्षेत्रे अनुशासनम्**

शिक्षाक्षेत्रे अनुशासनं वैदिककालादपि दृश्यते। वैदिककाले शिक्षा तु गुरुकेन्द्रितमासीत्। यतः शिक्षणार्थं गुरुः सर्वादा स्वतन्त्रः आसीत्। तस्मिन् काले दण्डस्य निषेधः आसीत्। आदरेण अनुशासनं कृतवन्तः। शिक्षकाः शिष्याणामादरभाजः आसन्। ते शिक्षकाः शिष्याणां कृते मातापितृ समानमासन्। यथा मनुस्मृतौ वर्तते।

**या आवृणोत्यवितयं ब्रह्मणा श्रवणावुभौ।**
**स माता स पिता ज्ञेयस्तं न द्रुह्येत्कदाचन**

अयमाशयः महाभारते अपि विद्यते –

**स आवृणोत्यमृतं संप्रयच्छन्**
**तस्मै न द्रुह्येतकृतमस्य ज्ञानम्।**
**गुरुं शिष्यो नित्यमभिवादयति**
**स्वाध्यायमिच्छिच्च सदा अप्रमत्तः।।**

एतादृशोदाहरणेन ज्ञायते यत् वैदिककाले आदरेण श्रद्धया च अनुशासनं प्रचलितमासित्। बौद्धशिक्षायामपि अनुशासनस्य तथा केषाञ्चन नियमानां पालनम् परिलक्ष्यते। आरम्भे भिक्षवः सुप्रतिपन्नः आसन्। अतस्तेषाम् अनुशासनस्य आवश्यकता नासीत्। परन्तु अनन्तरकाले अतिचारप्रसङ्गात् नियमाः निर्धारिताः । प्रति मोक्ष इत्यस्मिन् ग्रन्थे तेषां भिक्षुणाम् कृते 227 नियमाः तथा भिक्षुणीनां कृते 311 नियमाः निर्धारिताः वर्तन्ते। तत्र दशशीलानाम् प्रसिद्धिः वर्तते।

एते दशशीलाः भिक्षुणीनां कृते अनिवार्यतः पालनियाः आसन्। यः नियमानाम् पालनं न करोति तस्मै दण्डः दीयते स्म। एवम् रुपेण बौद्धशिक्षायाम् अनुशासमासीत्। तथैव ब्रिटिशकालेऽपि मद्रास, मुम्बई इत्यादि शिक्षाकेन्द्रेषु दण्डविधानस्य व्यवस्था कठोराः आसीत्। अनुशासनार्थं छात्रेभ्यः कठोरदण्डः दीयते स्म।

आधुनिकदार्शनिकानाम् शिक्षाशास्त्रिणां च मतानुसारं अनुशासनं –

आधुनिक मनोविज्ञानिनः तथा शिक्षाशास्त्रिणः अनुशासनविषये एवं रुपेण तेषामाशयं प्रतिपादितवन्तः। यथा –

1. पेस्टालजीमहोदयस्य मतानुसारं – अनुशासनं नाम न तु नियन्त्रणम्। अनुशासनसम्पादने प्रेमपूर्वकव्यवहारः उचितः भवति।
2. रूसो महोदयस्य मतानुसारं – अनुशसनं प्रकृतेः अनुसारं बालाकानां मार्गदर्शनं भवतु इति।
3. टि.पि.नन् महोदयः कथयति – यत् स्वीयभावनायाः शक्तेः च स्वनियन्त्रणे संस्थापनं येन अव्यवस्था व्यवस्था भवेत्।
4. Board of education द्वारा उक्तमस्ति– यत् अनुशासनं तादृशं साधनमस्ति येन छात्राः व्यवस्थिताः सन्तः उत्तमाचरणे रताः भवेयुः अपि च तेषु निहितसर्वोत्तमगुणानां स्वभावानाम् प्रकृतिनां च प्रापकाः भवेयुः।
5. स्वामिदयानन्दसरस्वतीनां मतम् एवमस्ति अनुशासनं हि नैतिकानुशासनम् भवेत् इति।

**अनुशासनस्य दार्शनिकसिद्धान्ताः**

अनुशासनस्य दार्शनिकसिद्धान्तमाधारीकृत्य एडम्स् महोदयः स्वीय modern devlopment of Education practice इत्याख्ये ग्रन्थे अनुशासनम् त्रिधा वर्गीकरोति। यथा –

1. दमनात्मकानुशासनम्।
2. प्रभावात्मकानुशासनम्।
3. मुक्तानुशासनम्।

**अनुशासनस्य महत्वम्**

जीवनस्य उन्नतिनिमित्तं अनुशासनस्य महती आवशयकता वर्तते। अनुशासनं विना बालकस्य, मानवस्य, शिष्यस्य वा विकासः न भवति। अतः शिष्यस्य सर्वाङ्गीणविकासाय अनुशासनमावश्यकम्। गीतायाम् विद्यमानम् अर्जुनस्य वचनमत्र युक्तियुक्तम्। यथा –

**कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वाम् धर्मसमूढ़चेताः।**
**यच्छ्रेयः स्यान्निश्चितं ब्रूही तन्मे शिष्यस्तेऽहं शाधि मां त्वं प्रपन्नम्।।**

अत्र अर्जुनः श्रीकृष्णम् प्रति अहम् तव शिष्यः भवान् माम् अनुशासयतु इति वदति। शैशवात् आरभ्य वृद्धत्वं यावत् अनुशासनमावश्यकम्। यथा बाल्ये मातापित्रोः विद्यालये गुरोः, गृहस्थजीवने पत्न्याः अथवा पत्युः वृत्तिस्थलेषु उच्चाधिकरिणेः अनुशासनं पाल्यते। अनुशासनं विना पारिवारिकं राष्ट्रियं च सङ्घटनं न भवति। अनुशासनदृष्ट्या एव निर्दिश्यते –

**लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत्।**
**प्राप्तेषु षोडशे वर्षे पुत्रं मित्रवदाचरेत्।।** इति

तैत्तिरीयोपनिषदि अपि दृश्यते यत् – वेदपाठी आचार्यः अन्तेवासिनः अनुशास्ति शिष्यान्। यथा – सत्यं वद, धर्मं चर इत्यादि।

**अनुशासनस्य प्रकाराः**

अनुशासने चत्वाराः प्रकाराः सन्ति –

1. अधिकारिकमनुशासनम्
2. प्राकृतिकमनुशासनम्।
3. सामाजिकमनुशासनम्।
4. स्वानुशासनम्।

**अनुशासनस्थापनोपायाः**

अनुशासनस्थापनार्थं मार्गद्वयं वर्तते। यथा –

1. सकारात्मकमार्गः।
2. नकारात्मकमार्गः।

**1. सकारात्मकमार्गः**

अनुशासनस्य प्रथमोपायः तथा मार्गः भवति सकारात्मकमार्गः। विद्यालये अनुशासनं सदृढीकरणाय क्रीडायाः उचितव्यवस्था आवश्यकी। तथैव अधोलिखितविषयमाध्यमेन अपि छात्राः अनुशासिताः भवन्ति। यथा –

1. पाठ्यसहगामिक्रियाः – छात्राः वादविवादः, कविताप्रतियोगितायाम् इत्यादि प्रतीयोगितायाम् भागं गृहित्वा सामूहिकं जीवनम् सम्पादयन्ति।

2. विद्यालये अध्ययनाध्यापनाय आसनादिव्यवस्था लेखनफलकादीनां व्यवस्था च उचितरूपेण सम्पादनीया। नोचेत् समुचितव्यवस्था अभावे अनुशासनाभावः भवति।

3. छात्राणाम् नैतिकशिक्षायाः विकासः तथा सद्व्यवहारः न्यायशीलतादिशिक्षाप्रधानं करणीयम्।

4. पारितोषकप्रधानेन छात्रान् सत्कार्ये तथा सद्व्यवहारे प्रेरयितुं शक्यते। एवमनुशासनसंरक्षणं

भवति।

**2. नकारात्मकमार्गः**

शिक्षामनोवैज्ञानिकाः विद्यालये दण्डप्रदानविषये भिन्नभिन्नमतानि प्रतिपादयन्ति। तत्र केचन वदन्ति दण्डप्रदानमत्यन्तमावश्यकमिति। विद्यालये विभिन्नाः प्रकारकाः छात्राः भवन्ति। सर्वे समबुद्धयः न भवन्ति। तदा कार्यसम्पादनम् अत्यन्तं कठिनं भवति। तत्र ये नियमोल्लंघनम् कुर्वन्ति तेषां कृते दण्डप्रदानमत्यन्तमावश्यकम्। विद्यालयस्य नियमानुसारं च दण्डप्रदानं करणीयम्। अनुशासनसम्पादने प्रेमयुक्तः स्नेहपूर्वकः व्यवहारः असफलः भवति। अतः सर्वाधा दण्डप्रधानस्य त्यागः कर्तुम् न शक्यते।

**अनुशासनहीनतायाः कारणानि**

1. दोषपूर्णशिक्षाप्रणाली।
2. कलुषितपारिवारिकवातावरणम्।
3. शिक्षकाणां सम्माननस्य पतनम्।
4. कलुषितविद्यालयीयवातावरणम्।
5. राजनैतिकदलानां परीवारे, समाजे, विद्यालये च प्रभावः।

**अनुशासनहीनतायाः निवारणोपायाः**

1. यथा जीवनं सफलं भवति तथा शिक्षाप्रणाली सम्पादनम्।
2. पारिवारिकवातावरणस्य संरक्षणम्।
3. अध्यापकानाम् स्तरोन्नतिकरणम्।
4. विद्यालयीयवातावरणसंरक्षणम्।
5. राजनैतिकदलेभ्यः परिवारात्, समाजात् विद्यालयं दूरे स्थापनम्।

5. छात्राध्यापकयोः मध्ये मधुरसम्बन्धः स्थापनीयः।

**उपसंहारः**

अनेन प्रकारेण शिक्षाक्षेत्रे अनुशासनस्य महत्वं विद्यते एव। निष्कर्षतया एवम् वक्तुं शक्यते यत् अनुशासनं विना जीवनं विशृङ्खलम् भवति। अस्माकं पुरतः ये ये महापुरुषाः दृश्यन्ते। ते सर्वे अपि अनुशासिताः आसन्। अनुशासितः जनः शतप्रतिशतं सफलं भवत्येव। आङ्ग्लभाषायाम् वर्णमालायाः प्रत्येकवर्णम् क्रमेण यथा – A-1,B-2,C-3 योजयामः चेत् DISCIPLINE शव्दस्य आहत्य शतम् भवति । तथा – D I S C I P L I N E

# मह षदयानन्दस्य शैक्षिकविचाराः

**मोहित जोशी** अनुक्रमाङ्कः – 36
शिक्षाशास्त्रिद्वितीयवर्षः

**गोरक्षकञ्चार्यासमाजभूषं वेदप्रचारप्रसारानुरक्तम्**
**वेदोपदेश परं स्तुवन्तं स्वामिदयानन्दमहं नमामि।।**

**जीवनवृत्तम्**

भारतवर्षस्य समाजसुधारकेषु महर्षिः दयानन्दः सर्वोत्कृष्टं स्थानं भजते। जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते इत्यनुसारेण जन्ममूलां जातिप्रथां निरस्य एषः गुणकर्मानुसारं वैदिकशास्त्रसम्मतां वर्णव्यवस्थां उदाघोषयत्। स्वनामधन्यस्य तस्य दयानन्दस्य जन्म गुजरात–प्रान्तान्तर्गते काठियावाड जनपदे टंकारा नाम्नि ग्रामे १८२४ ई. तमे वर्षे अभवत्। अस्य पितुः नाम श्रीकर्षण जी तिवारी इति आसीत्। स च परमः शिवभक्तः आसीत्। दयानन्दस्य जन्मनाम मूला नक्षत्रे उत्पन्नत्वात् मूलशङ्करः इति आसीत्।

स्वीये चतुर्दशे वयसि यदा शिवरात्रौ मूलशङ्करेण शिवलिङ्गोपरि मूषकाः दृष्टाः तदैव सः सत्यं शिवं अन्वेष्टुं प्रतिज्ञां कृतवान्। अन्यच्च कातिपय दिनानन्तरं स्वपितृव्यभगिन्योश्च मरणमपि दृष्टवान्। एतानि सर्वाणि दृष्ट्वा तस्य मनसि वैराग्यभावः आगतः। अतः स्वीये त्रयोविंशतितमे वर्षे गृहं परित्यक्तवान्। स्वामिपूर्णानन्दसरवतीस्वामिभ्यः संन्यासदीक्षां स्वीकृत्य दयानन्दसरस्वती नाम्ना प्रसिद्धोऽभूत्। गुरुविरजानन्दात् शिक्षामधीत्य वेदविद्याप्रसाराय प्रचाराय च कार्यक्षेत्रे अवतरितः। तदनन्तरं वैदिकधर्मस्य प्रचारप्रसारार्थम् १२ अप्रैल् १८७५ तमे वर्षे शनिवासरे मुम्बई नगरे सर्वप्रथमं आर्यसमाजस्य स्थापना विहिता।

महर्षिणा देवदयानन्देन बालकबालिकानां स्त्रीपुरुषाणां, विधवावृद्धानां शिक्षायाः प्रचारविषये अत्यन्तं प्रयत्नो कृतः। अनेनैव वेदानां भाष्यमपि कृतम्। स्वसम्पूर्णजीवनं स्वदेशजातिराष्ट्रकल्याणाय अर्पितं महर्षिणा। अन्ते च आङ्ग्लेयानां इस्लाममतावलम्बिनाञ्च प्रयासेन नन्हीं नामिकायाः वेश्यायाः षड्यन्त्रेण जगन्नाथस्य लोभेन महर्षिदयानन्दः ३० अक्टुम्बर १८८३ ई.तमे वर्षे मङ्लवासरे दीपावल्यां अजमेरनगरे ज्ञानराशियतीश्वरोऽयं भैतिकं शरीरं विहाय पञ्चत्वं गतः। विद्यानिधिः नाम्ना विदुषा महर्षेः जीवनं छान्दोबद्धं इत्थं कृतम्।

तद्यथा–

> **जनिष्टंकारायां शिवरजनि जन्याखु–घटना,**
> **गृहेमृत्योर्दृश्यं विपिनगमनं योगि–मिलनम्।**
> **गुरोरिच्छापूर्तिः प्रस्तुतबहुपाखण्ड् दलनम्,**
> **विषं पीत्वा मुक्तिर्यतिवर दयानन्दचरितम्।।**

**शैक्षिकचिन्तनम्**

वेदोक्तशैक्षिकविचाराणां प्रचारे प्रसारे च बद्धातुरः दयानन्दः नैकात् ग्रन्थान् लिलेख तत्र ऋग्वेदादि–भाष्यभूमिका, सत्यार्थप्रकाशः, संस्कारविधिः, व्यावहारभानुः इत्यादयाः। अन्यच्च व्याकरणशिक्षणार्थम् आख्यातिकः नामकः सन्धिविषयः, पारिभाषिकः इत्यादयः बहवः ग्रन्थाः समाजे शिक्षायाः प्रचार–प्रसारार्थं विरचिताः सन्ति।

दयानन्दवर्येण शिक्षायाः पञ्चलक्षणानि उक्तानि तानि इत्थं सन्ति– विद्याप्रदानम्, सभ्यताप्रदानम्, जितिन्द्रियत्वसम्पादनम्, धर्मात्मसम्पादनम्, विद्यया मुक्तिपथगमनम्।

**महर्षेः शिक्षादर्शनस्याधारभूताः सिद्धान्ताः**

१. पञ्चमे बर्षे बालकस्य, अष्टमे वर्षे बालिकायाः च शिक्षारम्भः करणीयः।

२. बालकस्य बालिकायाः च कृते विद्याकेन्द्रं नगरात् बहु दूरे एकान्तस्थले तथा उभयोर्मध्ये

एकयोजनान्तरेण भवेत्।
३. बालकानां शिक्षाकेन्द्रे सर्वेऽपि कर्मकराः शिक्षकाश्च पुरुषाः भवेयुः, किन्तु बालिकानां शिक्षाकेन्दे अध्यापिकाः भवेयुः।

**स्वामिमते शिक्षायाः अर्थः**

स्वामी दयानन्दवर्यः मनुते यत् – शिक्षा आजीवनं सततं गम्यमाना च प्रक्रिया वर्तते। तेषां दृष्टौ माता एव बालकस्य प्रथमगुरुः भवति। शिक्षेयं गर्भावस्थातः आरभ्य मृत्युपर्यन्तं प्रचलति। तैः उक्तं चारित्र्यनिर्माणमेव शिक्षा इति। एवं महर्षिदयानन्देन अन्येऽपि बहवः विचाराः शिक्षायाः विषये अस्माकं कृते प्रदत्ताः। तन्मते शिक्षायाः स्वरूपं बहुव्यापकं विस्तृतञ्च वर्तते। अत्र केचन विचाराः प्रकटीक्रियन्ते। तद्यथा –

१. शिक्षा मानवे मानवत्वसम्पादनसाधनम् अस्ति।
२. शिक्षायाः माध्यमेन नरः अनुकूलभावानां सम्प्रेषणं प्रतिप्रेषणं च करोति।
३. मानवीयगुणानां व्यवहाराणाञ्च प्राप्तौ शिक्षा सहायतां प्रददाति।
४. धर्माधर्मे विमृश्य शिक्षा धार्मिकताम् आचारितुं प्रेरणां प्रददाति।
५. शिक्षायाः माध्यमेन नरः सत्यासत्यनिर्णयमपि कर्तुं शक्नोति। एवं सद्शक्तिभ्यश्च विकासोऽपि जायते।

**शिक्षायाः आरम्भः**

महर्षिदयानन्दमते तु बालकस्य शिक्षायाः आरम्भः मातृगर्भात् एव भवति। तेषां दृष्टौ माता एव बालकस्य प्रथमगुरुः भवति। मातुः चारित्रेण शिशोः चारित्रं निर्दिष्टं प्रभावितं विनिर्मितञ्च भवति। बालकानाम् उन्नत्यर्थं त्रयः शिक्षकाः भवन्ति। मता, पिता, आचार्यश्चेति। एतैः संयमेन उषितव्यम्। यतो हि मातुः पितुः च भोजनेन शयनेन वार्तालापेन च शिशोः विकासः प्रभावितं भवति। पूर्णपञ्चवर्षीयः एव बालः विद्यालयं प्रेषणीयः। ततः पूर्वं पितृभ्यां सम्यक् उच्चारणार्थं प्रयत्नो विधेयः। सुष्ठु उच्चारणार्थं पिता अक्षर–मात्रा–पदवाक्यादेः मौखिकं ज्ञनमपि कारयेत् इति। अतः बालकस्य शिक्षायाः आरम्भः पित्रोः सकाशात् एव भवति इति मनुते अयं महापुरुषः।

**शिक्षायाः उद्देश्यानि**

स्वामिदयानन्दमते शिक्षायाः केचन मुख्योद्देश्यानि वर्तन्ते तानि अत्र प्रस्तूयन्ते।
१. वैदिकसंस्कृतेः पुनरुत्थानम्।
२. मनुष्याणां विशुध्दचारित्र्यनिर्माणम्।
३. मानवेषु सांस्कृतिकवैयक्तिकतायाः विकासः।
४. मनुष्येषु सदसदः विभेदशक्तेर्विकासः।
५. जनानां मानवीकरणम्।
६. मनुष्येषु राष्ट्रियैकतायाः विश्वबन्धुत्वस्य च भावनायाः विकासः।
७. मनुष्यस्य सर्वाङ्गीणविकासः।
८. शिक्षणविधिः।

दयानन्दोक्तशिक्षणविधिः प्राच्यपद्धत्याश्रितः अस्ति। ते भारतीय आश्रमपरम्परानुयायिशिक्षण–विधीनां चयनम् अकुर्वन्। तद्यथा–

शब्दार्थविधिः, व्युत्पत्तिविधिः, अनुवादविधिः, व्याख्यानविधिः, प्रवचनविधिः, व्याकरणविधिः, कथोपकथनविधिश्च।

**शिक्षायाः माध्यमः**

स्वामिदयानन्दः मातृभाषामेव शिक्षायाः माध्यमरूपेण स्वीकृतवान्। तन्मते बालकस्य प्रारम्भिकी शिक्षा मातृभाषायाः माध्यमेनैव भवेत्। परं सः बालकस्य कृते एकस्याः एव भाषायाः ज्ञानं पर्याप्तं न मनुते स्म। एवम्प्रकारेण स्वामिनो मतमासीद्यत् बालकाय प्रारम्भादेव मातृभाषया सह संस्कृतस्य एकस्याश्च विदेशीयाः भाषायाः ज्ञानं प्रदातव्यम्। इदं मतं प्रतिपादयाता तेन त्रयाणां भाषाणाम् अध्ययनं परमावश्यकं मत्वा त्रिभाषासूत्रस्य प्रतिपादनं कृतमासीत्। एतदेव सूत्रं बहोःकालानन्तरं भारतीयशिक्षाऽयोगेनापि प्रस्तूतीकृतम्।

**शिक्षाशास्त्रिरूपेण महर्षिः**

भारतस्य ये महान्तो विभूतयः स्वकीयेन स्वतन्त्रचिन्तनेन देशस्यास्य शिक्षायाः स्वरूपस्य निर्धारणाय प्रयासं कृतवन्तः, तेषु स्वामिदयानन्दस्य नाम विशिष्टम् अद्वितीयम् अपूर्वञ्च वर्तते। भारतीयसंस्कृतेः हिन्दुधर्मस्य च प्रबलसमर्थकत्वात् सः समकालिकायाः शिक्षापद्धत्याः तीक्ष्णामालोचनां कृतवान्। आङ्ग्लशिक्षां वारयितुं भारतीयशिक्षां स्थापनार्थं बहुप्रयासं कृतवान्। स्वाकियात् प्रयासात् महर्षिः आत्मनः योजनायां प्राचीनानामाधुनिकानां च भारतीयाऽदर्शाणां सुन्दरं समन्वयं कृतवान्।

इत्थं दयानन्दैः स्वीयाः शैक्षिकविचाराः प्रतिपादितः। तदीयाः शैक्षिकविचाराः विशेषतः ऋग्वेदादिभाष्यभूमिकायां सत्यार्थप्रकाशे च समुपलभ्यन्ते। एवं महर्षेः कार्यानुशीलने स्पुटमेतद् अवगम्यते यत् सः क्रान्तदर्शी, निर्भीकः निःस्वार्थी,धर्मापरायणः दीनहीनपलितरक्षकः, भारतोन्नतिसाधकश्च कश्चन महापुरूषश्चासीत् इति।

## प्रतिभावन्तः बालाः तेषां शिक्षा च

**बिप्लबराय** अनुक्रमाङ्कः– 37
शिक्षाशास्त्रिद्वितीयवर्षः

वंशपरम्परायाः प्रतिभाशालिबालाः प्रखरबुद्धियुक्ताः भवन्ति। येषां बालानां बुद्धिलब्धिः १३०, ततोऽधिका वा भवति ते प्रतिभावन्तः इति गण्यन्ते। कालसनिकमहोदयानुसारम् – प्रतिभावतोबालकस्य परिभाषा अनेन प्रकारेण वर्तते। "सः बालकः यः स्व–आयुस्तरस्य बालकेषु कासुचित् योग्यतासु अधिकः स्यात् तथा च अस्माकं समाजाय किञ्चित् महत्त्वपूर्णनवीनतां प्रददाति।"

प्रतिभावतां बालानां विशेषताः

प्रतिभाशालिबाकेषु अधोलिखिताः विशेषताः दरीदृश्यन्ते –

१. प्रतिभावत्सु बालेषु बुद्धिलब्धिः १३०, ततोऽधिका वा भवति।
२. प्रतिभावत्सु बालेषु अधिकाध्ययनस्य योग्यता भवति।
३. एतेषु बालेषु अधिककालं यावत् वस्तुनि अवधानस्य योग्यता भवति।
४. एते बालाः अमूर्तचिन्तने अधिकां रुचिं स्वीकुर्वन्ति।

५. प्रतिभावान्—बालः स्ववातावरणस्य प्रत्येकवस्तुविषये ज्ञानं कर्तुमुत्सुकः भवति।
६. एतेषु बालेषु विशालशब्दभण्डारो भवति।
७. विद्यालयस्य कार्येषु एतेषां बालानाम् उदासीनभावो भवति।

**प्रतिभाशाली बालानां शिक्षा**

**कक्षोन्नतये स्वरूपम्**

प्रतिभाशालिबालाः अधिगमस्य क्रियायां तीव्रगत्या विकासं कुर्वन्ति। अतः प्रतिभाशालिबालानां कृते वर्षे वारद्वयं परीक्षा भवेत्। एतादृशः छात्राणां कृते प्रवेशः शीघ्रं करणीयः। अनेन तेषां योग्यतायाः विकासः सम्यग्रीत्या भविष्यति।

**विस्तृतपाठ्यक्रमः**

केषाञ्चित् विदुषां मतेन वर्षे द्विवारम् उन्नतिप्रदानम्, पृथग् रूपेण च शिक्षणस्य प्रबन्धनमनेकाः समस्याः जनयति। सामान्यविद्यालयेषु अपि प्रतिभाशालिबालानां कृते विस्तृत—विशिष्ट—पाठ्यक्रमस्य निर्माणं करणीयम्।

स्किनरमहोदयानुसारम्— "एतेषां बालानां कृते पाठ्यक्रमस्य निर्माणं इत्थं प्रकारेण भवेत् येन तेषां सामान्यमानसिकयोग्यतायाः, रचनात्मकशक्तेः मौखिक—योग्यतायाः, तर्कस्य, चिन्तनस्य च अधिकतया विकासो भवितुं शक्येत।"

**वैयक्तिकशिक्षणम्**

केषाञ्चित् शिक्षाशास्त्रिणाम् अभिप्रायः वर्तते यत् प्रतिभाशालिबालानां कृते वैयक्तिकरूपेण शिक्षणं कार्येत् तदैव तेषां प्रतिभायामुचितः विकासो भवितुं शक्यते।

**विशेषविद्यालयाः**

प्रतिभाशालिबालानां कृते विशेषविद्यालयानां व्यवस्था करणीया। अनेन क्रमेण पाठ्यक्रमः पाठ्यसहगामिक्रियाश्च बालस्य योग्यतानुसारं पाठ्यक्रमे निहिताः कर्तुं शक्यन्ते। तेषां योग्यतानुसारं अन्यानि सौविध्यानि विद्यालये सरलतया व्यवस्थितानि कर्तुं शक्यन्ते।

**विशेष—कक्षाः**

केषाञ्चित् मनोवैज्ञानिकानां मतानुसारं प्रतिभाशालिबालानां कृते सामान्यबालेभ्यः पृथक्विद्यालयेषु शिक्षाव्यवस्था भवेत्। अन्यमनोवैज्ञानिकाः कथयन्ति यत् अनेन समायोजनस्य गुणस्य विकासः न भविष्यति।

**सामाजिकानुभवानामवसरः**

प्रतिभाशालिबालान् सामान्यबालानां सामाजिकक्रियाभ्यः पृथक् न कुर्यात्। एतासु क्रियासु भागत्त्वेन ते सामाजिकानुभवान् प्राप्नुवन्ति।

**शिक्षकस्य वैयक्तिकाध्यानम्**

प्रतिभाशालिबालान् प्रति वैयक्तिकध्यानमपेक्षितम्। अतः अध्यापकस्य कार्यं वर्तते यत् वैयक्तिकरूपेण ध्यानं दातव्यमिति।

# आदर्शजीवनार्थं दश आधारस्तम्भाः

**सुमन्त पधान** अनुक्रमाङ्कः – 38
शिक्षाशास्त्रिद्वितीयवर्षः

यदा भवनस्य आधारस्तम्भाः सशक्ताः न भवन्ति तदा भवनस्यापि दृढता न सम्भवति। अत एव भवननिर्माणकर्ता स्तम्भान् दृढीकृत्य तस्योपरि अट्टालिकां रचयति। एवमेव गुरवः यदि आदर्श–बालकरूपिभवनस्य निर्माणमिच्छन्ति तदा ततः पुर्वं मूल्याधारितदशस्तम्भान् दृढीकृत्य बालकस्य मनसि सम्यक् निवेशयेयुः। ते आधारस्तम्भाः एवं वर्तन्ते –

१. सदाचारपालनम्।
२. सत्यपरिपालनम्।
३. अहिंसापालनम्।
४. मातृपितृगुरुभक्तिः।
५. पारलौकिकभावनायाः जागरणम्।
६. धर्माचरणम्।
७. परोपकारः।
८. समाजसेवा।
६. विश्वबन्धुत्वभावना।
१०.पुनर्जन्मभावनायाः जागरणम्।

**सदाचारपालनम्**

आचारः परमोधर्मः इति सिद्धान्तमनुसृत्य सदाचारः सर्वोत्तमं तप इत पालनीयः भवति। अस्माकं जीवने यदि किञ्चन शाश्वतरूपेण तिष्टति तर्हि तत् अस्माकं सदाचारः एव। अथवा अस्माकं सद्वृत्तित्वमेव भवति। स्व चारित्र्य पालनेनैव मानावः दैवत्वं प्राप्नोति। अत एव उक्तं महाभारते –

**वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतोहतः।।**

सदाचारपालने ब्रह्मचर्यस्यापि महत्वं वर्तते। ब्रह्मचर्येण तपसा मृत्युमुपध्नत इति अथर्ववेदोक्तरीत्या देवाः अपि ब्रह्मचर्यपालनादेव सुष्टु स्थितिं प्राप्तवन्तः। एवं रीत्या चारित्र्य शीलरक्षणादयः सदाचारपालने महत्वपूर्णस्थानं प्राप्नुवन्ति।

**सत्यपरिपालनम्**

सर्वदा सत्यमेव वदेत्। धर्मस्य मूलमेव सत्यं भवति। सत्यमेव जीवन पथं दर्षयाति। सत्यमेव शाश्वतानन्दं ददाति। तदर्थमेव उच्यते सत्यमेव जयते नानृतम् इति। एवान्स् महोदयः सत्यस्य विषये एवं वदति– सत्यं जगतः संस्थापकरूपेणगुरुत्वाकर्षकरूपेण च प्रतिपादयति। सत्यपरिपालने तु बहुप्रयासः कर्तव्यः तदर्थं सुभाषितकारः वदति – नास्ति सत्यसमं तपः इति।

**अहिंसापालनम्**

सर्वविधहिंसा परित्याग एव अहिंसा। तत्र मनुष्याणाम्, प्राणीनाम्, वा शारीरिक तथा मानसिक क्लेशदानमेव हिंसा भवति। स्वस्योन्नतिनिमित्तं एतत्सर्वं त्यक्तव्यम्। अहिंसायाः परिपालनार्थं

भगवान् बुद्धः, महावीरः, महर्षिदयानन्दः, महात्मागान्धिश्च स्वजीवनं समर्पयामासुः। अहिंसाचरणेन अत्मोन्नतिः राष्टोन्नतिश्च भवति। अहिंसा परमो धर्मः इत्यपि ध्येयवाक्यमस्ति। अतः विद्यार्थिनः अहिंसापालनं कुर्यात्।

**मातृपितृगुरुभक्तिः**

मातुः पितुर्गुरुणां च आदेशं अनवरतं पालनीयं भवति। मानवजीवने ते भगवत् सदृशाः एव भवन्ति। ते एव अस्माकं हितचिन्तकाः मार्गदर्शकाश्च भवन्ति। अत एव तेषाम् अनुज्ञानुसारेणैव व्यवहर्तव्यम्। यथा मातृ देवो भव, पितृ देवो भव, आचार्य देवो भव इति श्रुतिवचनवत् अनुसर्तव्यम्।

**पारलौकिकभावनायाः जागरणम्**

आजगदिदं नश्वरं भवति कीर्तिरेव अविनाशिनी भवति। इमे लौकिककर्मोपभोगाः अन्ते केवलं दुःखमेव ददति। एषामाश्रयेण पतनं सुलभं दुःखाप्तिरपि निश्चिततया भवत्येव। सुखं तु नितरां दुर्लभमेव भवति। अतः धीराः वीराः सुकृतिनश्च कर्तव्यमेव प्रमुखं वर्तते इति विचिन्त्य सुखानि परित्यक्त्या प्राणान् तृणवत् गच्छन्त्यः समरादिषु वीरगतिं प्राप्तवन्तः, एषा भावना छात्रेषु शिक्षया जागरणीया एय भवति।

**धर्माचरणम्**

धर्म एव जीवनस्य सारः। धर्मः जीवनरक्षकः इत्युच्यते। अत एव तस्याचरणं करणीयमेव। यदि वयं धर्माचरणं कुर्मः अर्थात् वयं धर्मरक्षणं कुर्मः तदा सः धर्मः एव अस्माकं रक्षक भवति। अत एव उच्यते धर्मोरक्षति रक्षितः इति। एतस्मात् कारणात् जगति धर्मः एव सर्वोत्कृष्टः भवति। धर्म नाम स्वकर्तव्यपालनं सन्मार्गेण गमनं, परेषां हितमाचरणादिकमेव। तस्मात् वयं लौकिकं तथा पारकौकिक सुखं च प्राप्नुमः। सः धर्मः धर्माचारिणाम् मित्रम् इति बुधाः वदन्ति। तद्यथा–

**एक एव सुहृद धर्मो निधनेऽप्यनुयाति यः।**
**शरीरेण समं नाशं सर्वमन्यस्तु गच्छन्ति।।**

अस्माकं देहत्यागसमयेऽपि स्वयार्जितधनकनकादिकं स्वपत्नीपुत्रादयः नानुगच्छन्ति। परं धर्मं अनुगच्छत्येव। अत एव उक्तं– देहश्चितायां परलोकमार्गे धर्मोनु वो गच्छति जीव एकः इति।

**परोपकारः**

परेषाम् उपकारः परोपकारः इत्युच्यते। मानवः समाजे परेषां हितसाधनार्थं यत् कर्मणा, वाचा मनसा करोति तदेव परोपकारः इति कथ्यते। परोपकारार्थमेव सज्जनाः बहुः त्यागं कृतवन्तः। महाराजः शिबिः कपोतः संरक्षणार्थं स्वमांसं श्येनाय प्रायच्छत। प्रकृतिः अपि जगतः परोपकाराय एव भवति। यथा–

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्।।**

अष्टादशपुराणकर्ता भगवान् व्यासमहर्षि अपि परोपकारः पुण्याय, पापाय परपीडनम् इति उक्तवान्।

**समाजसेवाः**

समाजसेवा इत्यस्य अर्थं समाजे स्थितानां जनानां सेवा इत्येव ज्ञातव्यम्। यदा

समाजस्योन्नतिर्भवति तदा स्वस्यापि उन्नतिर्भवति अत एव समाजस्य हितसम्पादनम्, तस्य संरक्षणार्थं कार्यकरणीयम् अवश्यकमेव भवति। महर्षिदयानन्दः, विवेकानन्दः, सुभाश्चन्द्रबोसः, वीरसावर्करः, सरदार पटेल प्रभृतय; समाजसेवार्थं स्व प्राणान् एव अत्यजन्। एते अस्माकम् आदर्शपुरुषाः भवन्ति। अत एव एषां मार्गमनुसृत्य वयमपि समाजसेवायाम् अभिरुचिं प्राप्नुमः।

**विश्वबन्धुत्वभावना**

जगदिदं सुखदुःखात्मकं भवति। यदि मानवः अन्यमानवान् स्वसम्बन्धत्व दृष्ट्या पश्यति तदा तयोरपि परस्परं बान्धव्यः सिध्यति। तदा दुखं तथा वैमनस्यं च नश्यति। इदं मम, ते मदीयाः, ते न मदीयाः इत्यादि भावनयाः निराकरणं कर्तव्यम्। एतादृशी लघु भावना तु विद्यावतां न भवेदेव। अत एव हितोपदेशे एवम् उक्तम् –

**अयं निजः परो वेति गण्ना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

सर्वेऽपि देशीया विदेशीया वा एकस्यैव परमात्मनः पुत्राः भवन्ति। या व्यक्तिः सर्वान् भूतान् (जीविनां) स्वयमेव इति विजानाति। यः तेषां तथा आत्मनि च उभयोर्मध्ये भेदं न गणायति तेऽपि आत्मानम् इति ज्ञानं भवति तस्य मोहः शोकः वा नास्ति इति ऋग्वेदे उकतमस्ति।

**पुनर्जन्मभावनायाः जागरणम्**

कर्मानुरूपं सर्वस्यापि पुनर्जन्म भवति। गीतायाम् यदुक्तमस्ति तत्– जातस्य हि ध्रुवो मृत्युः ध्रुवो जन्म मृतस्य च। यः जनिं प्राप्नोति तस्य मरणम् अवश्यमेव सम्भवति। मृतस्य प्राग्जन्मनः संस्कारादेव पुनर्जन्म सुनिश्चितं भवति। यः पूर्वजन्मनि यादृशं कार्यं कुरुते, सः अस्मिन् जन्मनि तादृशे एव परिवारे जन्म प्राप्नोति अत एव सत्कर्माचरणं कृत्वा उत्तमकुले जन्म प्राप्तुं मनुष्यः प्रयत्नं कुर्यात्। एवं रीत्या पूर्वोक्तायाः आदर्शजीवनार्थं दश आधारस्तम्भीभूत– मूल्ययुक्तशिक्षणांशान् सर्वेषां छात्राणां कृते बोधनीयाः एव। तदेव सर्वेषाम् अध्यापकानाम् उत्तरदायित्वं वर्तते। अद्यतन मौल्यविहीनसमाजे अस्य आवश्यकता वर्तते।

# व्यक्तित्वम्

**दीपक रातूड़ी** अनुक्रमाङ्कः – 39
शिक्षाशास्त्रिद्वितीयवर्षः

विंशतिशताब्द्याः प्रथमचरणे जे. बि. वाट्सन् महोदयः मनोविज्ञानस्य व्यवहारवादसिद्धान्तं प्रतिपादयामास। तस्य मते मनोविज्ञानं व्यवहारस्य विज्ञानम्। व्यवहारस्य मूल्याङ्कनं वस्तुनिष्ठतया कर्तुं शक्यते। सामाजिकपरिवेषेण व्यक्तित्वम् आचारव्यवहारश्च प्रभाविताः भवन्ति। अतः अत्र व्यक्तित्वविकासः कथं संभवतीति अधीयते। सामान्यतः मानवः यथा व्यवहारं करोति तस्य व्यक्तित्वं तथैव प्रकटितं भविष्यति। अपि च शिक्षोद्देश्येष्वन्यतमं वर्तते सम्पूर्णस्य व्यक्तित्वस्य विकासः। यथोक्तं पञ्चतन्त्रे

**आकारैरिङ्गितैर्गत्या चेष्ट्या भाषणेन च।**
**नैत्रवस्त्रविकारैश्च ज्ञायतेऽन्तर्गतं मनः।।**

व्यक्तित्वमित्यस्य आङ्लभाषायां Personality इति समानार्थकः शब्दः वर्तते। वस्तुतः लेटिनभाषायाः Persona इति शब्दात् Personality शब्दः निष्पन्नः। अस्य लेटिनभाषायां मुखावरणं इत्यर्थः। व्यक्तेः सम्पूर्णव्यवहारस्य दर्शनेन स्थायिव्यवहाराणाम् आधारेण च व्यक्तेः विषये वयम् एकां धारणां निर्मामः सा धारणा एव व्यक्तित्वं वर्तते। गुणानां समन्वितरूपं व्यक्तित्वम् इति गिलफ़ोर्डमहोदयः। वुडवर्तमहोदयः – सामाजिकसमायोजनेन प्राप्तव्यवहारविशेषताः एव व्यक्तित्वं कथ्यते।

भारतीयमनोविज्ञाने संकृतवाङ्मये मानवव्यक्तित्वस्य सिद्धान्तानां विकासः उपनिषत्सु, सांख्य–योगतन्त्रेषु, आयुर्वेदग्रन्थेषु, गीतादिधर्म–नीतिविषयकग्रन्थेषु संस्कृतसाहित्यस्य अन्यान्येषु ग्रन्थेषु च सञ्जातः। व्यक्तित्वसिद्धान्तस्य व्याख्या सर्वप्रथमं वैदिकशास्त्रेषु दृश्यते। उपनिषत्सु व्यक्तित्वस्य केन्द्रं जीवात्मा मन्यते। श्रीमद्भगवद्गीतायां प्रमुखतया व्यक्तेः सर्वाङ्गपूर्णव्यक्तित्वस्य वर्णनमस्ति। अस्यानुसारं गुणाः एव मानवस्वभावस्य आधारभूताः निर्धारकाः भवन्ति। सत्वरजस्तमोगुणानाम् अनुरूपमेव मानवप्रकृतिः जायते। यथोक्तं –

**सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।**
**निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।** (१४/५)

व्यक्तित्वे शरीरिक–मानसिक–सामाजिक–सांवेगिक इत्यादिगुणाः अन्तर्भवन्ति। एतान् गुणान् शरीराकृतिः, ग्रन्थयः, स्वास्थयम्, परिवेषः वंशानुक्रमः इत्यादि कारकाणि प्रभावयन्ति।

# शिक्षा

**तुनुगुंटलभीमशङ्करसायिरामः** अनुक्रमाङ्कः – 40
शिक्षाशास्त्रिद्वितीयवर्षः

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्कमधीत्यैव ब्रह्मलोके महीयते।।**
**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।**

शिक्षा उक्तेषु षड् वेदाङ्गेषु अन्यतमा। शिक्षा इत्यस्य पदस्य अभ्यसनम् इत्यर्थः। अक्षराणां स्थानप्रयत्नोच्चारणान्यधिकृत्य शिक्षायां प्रतिपाद्यते। वेदनया उपदिश्यन्ते स्वरवर्णादयो यत्रासौ = शिक्षन्ते इति सायणाचार्याः शिक्षां ब्रुवते।

शिक्षा येन शास्त्रेण वेदमन्त्राणां शुद्धोच्चारणे सारल्यं साहाय्यं च भवति तच्छास्त्रं शिक्षेति कथ्यते। अर्थात्, स्वरवर्णादीनाम् उच्चारणनियमबोधयित्री विद्या शिक्षेत्यभिधीयते। वेदेषु सर्वत्र

स्वरप्रधान्यं भवत्येव सम्भवात्। इदं स्वरज्ञानं शिक्षाधी–भेदस्वरभेदेनार्थनं भवति। अत एव शिक्षाशास्त्रस्य वेदाङ्गता सुतराम् उपपद्यते यतः अशुद्धोच्चारणेन महाननर्थः भवति।

बहुश्रुतमस्ति आख्यायिकेयं यत् विश्वरूपनामके त्वष्टुः पुत्रे इन्द्रेणाहते सति रुष्टस्त्वष्टा इन्द्रस्य हन्तारं पुत्रम् उत्पादयिषुः आभिचारिकं यागं कृतवान्। तत्र 'इन्द्रशत्रुर्वर्धस्व' इति मन्त्रः ऊहितः, तत्र तत्पुरुषप्रयुक्तान्तोदात्तत्वे कर्तव्ये बहुव्रीहिप्रयुक्तः आद्युदात्तः, ऋत्विजा प्रयुक्तः इत्यर्थान्तरा–भिधानाद् इन्द्रेण सोऽपि हतः। अतः मन्त्रेषु स्वरदोषः वर्णदोषः वा कथमपि न भवेदिति उपस्थापयन् महर्षिः पाणिनिः आह, मन्त्रः इति। स्वरतः स्वरेण, वर्णतः वर्णेन अक्षरेण वा हीनः, रहितः मन्त्रः मिथ्याप्रयुक्तः सन् तम् अभीप्सितम् अर्थं न आह। स मन्त्रो वाग्वज्रं भूत्वा यजमानं हिनस्ति घातयति। अनिष्टावाप्तिं करोतीति। यथा स्वरस्य अपराधात् इन्द्रशत्रुशब्दः "यजमानं हिनस्ति" हिंसितवान् इत्यर्थः। ननु "इन्द्रशत्रुः" सम्यगुच्चारणाभावे ऋत्विजां दोषः इति ऋत्विगादि कृतहोमाद्यजमस्वरादीनां धर्मोत्पत्तिरिव तत्कृतापशब्दप्रयोगाद् यजमाने प्रत्यवायोत्पत्तिरिति स्वीकारात्। शिक्षा नाम यया मन्त्राणां पदवर्णमात्रास्वरादिज्ञानं वर्णोच्चारणविधिपरिज्ञानपूर्वकस्थानादिपरिचयश्च भवति। तदाहु ऋग्वेदभाष्यभूमिकायाम् सायणाचार्याः।

"शिक्षां व्याख्यास्यामः। वर्णःस्वरः मात्राबलं सामसन्तानः इत्युक्तः शिक्षाध्यायः" इति। (१) वर्णोऽकारादिः। स च अङ्गभूतशिक्षाग्रन्थे स्पष्टमुदीरितः "त्रिषष्टिश्चतुः षष्टिर्वावर्णाः सम्भावतौ मताः। प्राकृतौ संस्कृते च अपि स्वयं प्रोक्ताः स्वयम्भुवेत्यादिना। स्वरउदात्तादिः, सोऽपि तत्रोक्तः "उदात्तश्चा–ऽनुदात्तश्चस्वरितश्चस्वरास्त्रयः" इति। मात्राह्रस्वादिः, सापितत्रोक्ता "ह्रस्वोदीर्घः प्लुत इति। कालतोनियमा अचीति। बलं स्थानप्रयत्नौ, तत्राऽष्टौस्थानानिवर्णानामित्यादिनास्थानमुक्तम्। "अचोऽस्पृष्टायणस्त्वीष–दित्यादिना प्रयत्नोक्तः। सामशब्देन साम्यमुक्तम्, अतिद्रुतातिविलम्बितगीत्यादि दोषराहित्येनमाधुर्यादि गुणयुक्तत्वेन उच्चारणं साम्यम्। "गीती शीघ्रीशिरः कम्पीत्यादि न उपांशुदष्टंत्वरितमित्यादिनादोषाः उक्ताः। "माधुर्यमक्षरव्यक्तिरित्यादिना" गुणाः उक्ताः। सन्तानः संहिता, वायवायाहीत्यत्रावादेशः, इन्द्राग्नी आगतमित्यत्र प्रकृतिभावः, एतत् च व्याकरणेऽभिहितत्वात् शिक्षायाम् उपेक्षितम्। शिक्ष्यमाणवर्णादि वैकल्ये बा अधस्तत्रोदाहृतः "मन्त्रोहीनः स्वरतोवर्णतो वा मिथ्याप्रयुक्तः" इत्यादिनाइति।

एवं वेदाऽभ्यासोपकारितया वेदाङ्गत्वं शिक्षादीनामुपपद्यते। तत्र घ्राणं तु वेदस्य मुख्यं व्याकरणं शिक्षा" इत्याद्युक्तदिशा शिक्षायाः घ्राणत्वप्रतिपादनेनाऽतीवावश्यकत्वमङ्गेकृतम् – "स्मृतम् शरीरस्थोच्चास्थानगतं मुखस्थानीयं व्याकरणं तथापि नासिकया मुखोपरि स्थित्या तत्स्थानाऽपन्ना शिक्षैव सर्वोपरिवरीवर्ति पदसाधुत्वमात्रविधायकं व्याकरणम् उच्चारणणादि विधिहीनं सत् नासिकाविरहितं मुखमिव न शोभते इति शिक्षायाः वेदनासिकात्वमाञ्जस्येन सयुक्तिकं सम्पद्यन्ते।

**प्रातिशाख्यानि**

प्रातिशाख्यानि शिक्षाणां पूर्वरूपाणि। किन्तु तानि वेदाङ्गसंज्ञया न व्यवह्रियन्ते। शौनकेन विरचितम् ऋग्वेदप्रातिशाख्यं प्रातिशाख्येषु विशिष्यते। एतत् जर्मनीयैः पण्डितैः मुद्रयित्वा प्रकाशितम् अस्ति। पदप्रकृतानिप्रातिशाख्यानिछन्दसां नियमाः व्याकरण–शिक्षा, एतदतिरिक्तं प्रातिशाख्यग्रन्थेषु, विवेचिताः सन्ति। कस्याः शाखायाः नियमविशेषः प्रातिशाख्यग्रन्थानां इति प्रदर्शनम्। छन्दसां समाहारः एव प्रातिशाख्यग्रन्थः। इमे प्रातिशाख्यः व्याकरण प्रयोजनमस्ति। अर्थात् शिक्षा यजुर्वेदस्य, संहिताभेदेन

शाखाभेदेन वा विभिन्नाः वर्तन्ते। यथा ऋग्वेदस्य ऋक्प्रातिशाख्यम्, वाजसनेयिप्रातिशाखम् तैत्तिरीय–प्रातिशाख्यम् तथा पुष्यसूत्रप्रातिशाख्यं। सामवेदस्य ऋक्तन्त्रम्, अर्थर्ववेदप्रातिशाख्यञ्च सुप्रसिद्धाः प्रातिशाख्यग्रन्थाः सन्ति।

**शिक्षाग्रन्थाः**

शिक्षायाः प्राचीनाः ग्रन्थाः प्रातिशाख्यरूपेण समुपलभ्यन्ते। सर्वेषां वेदानां प्रातिशाख्यग्रन्थाः भिन्नाः सन्ति। तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षाशास्त्रस्य प्रयोजनमुल्लिखितमस्ति" अथ शिक्षां व्याख्यास्यामः अत्र वर्णः अकारादिः इत्युक्तः शिक्षाध्यायः। सन्तान, साम, बलम्, मात्रा, स्वरः, वर्णः, मात्रास्वरस्तु उदात्तादिः ह्रस्वादिकाः बलमुच्चारणस्थानं ताल्वादिकम्।

**अष्टाविंशतिशिक्षाः**

- अमोघनन्दिनी शिक्षा
- अरण्यशिक्षा
- भारद्वाजशिक्षा
- कालनिर्णयशिक्षा
- केशवी शिक्षा
- लक्ष्मीकान्तशिक्षा
- पाराशरीशिक्षा
- सर्वसम्मतशिक्षा
- षोडषश्लोकीशिक्षा
- सिद्धान्तशिक्षा
- स्वरव्यञ्जनशिक्षा
- वर्णरत्नप्रदीपशिक्षा
- याज्ञवल्क्य शिक्षा
- लोमशी शिक्षा
- अपिसाली शिक्षा
- आत्रेयशिक्षा
- चन्द्रशिक्षा
- कात्यायनी शिक्षा
- लघुमोघनन्दिनी शिक्षा
- नारदीयशिक्षा
- प्रतिशाख्यप्रदीपशिक्षा
- शम्भुशिक्षा
- शिक्षासंग्रह
- स्वराष्टकशिक्षा
- वशिष्ठशिक्षा
- व्यास शिक्षा
- गौतमीशिक्षा
- माण्डूकीशिक्षा

यद्यपि पाणिनीयाद्या अनेके शिक्षाग्रन्थाः सन्ति। तथाऽपि तेषामपूर्णत्वादन्यान्यशाखाविशयत्वाच्च सर्वेषां विशेषतो वाजसनेयिनां परमोपकाराय योगियाज्ञवल्क्यमहर्षिभिः प्रणीतैवेयं शिक्षा सर्वाङ्गपूर्णा वरीवर्ति। अस्मिन् ग्रन्थे आदौ मङ्गलाचरणम्, स्वरसंहिताविधिः, हस्तचालनविधिः, अध्ययन्विधिः, वर्णप्रकरणम् इत्यादयाः विभागाः ग्रथिताः।

## भाषणकौशलविकासस्य उपायाः

**पूर्णा डि.एस्.** अनुक्रमाङ्कः – 41
शिक्षाशास्त्रिद्वितीयवर्षः

श्रवणभाषणपठनलेखनमिति चत्वारि भाषाकौशलानि वर्तन्ते। एतानि चत्वारि कौशलानि

भाषायाः अधिगमनार्थं सोपानरूपेण साहाय्यं कुर्वन्ति। एतेषु भाषाकौशलेषु द्वितीयं स्थानं भाषणस्य। सर्वेपि मनुष्याः स्वीयम् आशयं प्रकटीकर्तुं भाषन्ते एव। किन्तु शब्दोच्चारणमात्रं भाषणं न भवति। भाषणे आशयाविष्कारः अत्यन्तं प्रधानः भवति।

अतः छात्राणां भाषणकौशलविकासाय के उपायाः अनुसर्तव्याः इति पृष्टे सति अत्र केचन उपायाः निर्दिश्यन्ते –

**१.सम्भाषणम्**

भाषणकौशलवर्धनस्य सर्वोत्तमः उपायः नाम सम्भाषणमेव। बालाः यावदधिकं सम्भाषन्ते तावत् भाषणकौशलं प्राप्नुवन्ति। अतः बालाः अधिकाधिकं यथा भाषेरन् तथा प्रोत्साहनीयः। कक्षायां, क्रीडाङ्गणे, गृहे चापि ते अधिकं भाषन्तां नाम। 'कक्षायाम् अवसरे अदत्तेऽपि बालाः परस्परं भाषमाणाः कोलाहलं कुर्वन्ति, अवसरः दत्तः चेत् पुनः का कथा भवेत्?' इति प्रश्नः भवितुमर्हति। तस्य समाधानं च एवं– कक्षायामपि मध्ये मध्ये कदाचित् परस्परं सम्भाषणं कर्तुं छार्तेभ्यः अवसरः दातव्यः। परन्तु तस्मिन् अवसरे तु संस्कृतेन एव सम्भाषणं कर्तव्यमिति नियमः करणीयः। तं च नियमं सर्वे बालाः पालयन्तः सन्ति, उत न इति मध्ये मध्ये परीक्षणमपि कर्तव्यम्। सामान्यसम्भाषणं कर्तुम् अपेक्षितान् अंशान् ते इदानीमेव जानन्ति इत्यतः सम्भाषणे क्लेशः न भवति। कदाचित् शब्दाभावः तान् बाधेत। तदा शिक्षकः तेषां सहाय्यं कुर्यात्। छात्राः भाषणे मध्ये मध्ये दोषान् अपि कुर्युः। तथापि प्रोत्साहकवचनैः प्रेरिताः चेत् ते सम्भाषणं कुर्वन्त्येव। पुनः पुनः सम्भाषणेन भाषणे कुशलतां च प्राप्नुवन्ति।

पाठमध्येऽपि शिक्षकः यदा प्रश्नं पृच्छति तदा छात्राः स्वेन ज्ञानम् अंशंधैर्येण यथा वदेयुः तादृशं वातावरणं कल्पनीयम्।

**२.कथाकथनम्**

भाषाशिक्षणे कथानां महत् स्थानमस्ति। श्रवणाभ्यासनिमित्तं शिक्षकः कथाः श्रावयेत् इति पूर्वमेव उक्तमस्ति। भाषणाभ्यासनिमित्तं तेन बालानां मुखात् कथाः वाचनीयाः संस्कृताभ्यासात्पूर्वमपि छात्रैः अन्यभाषासु अनेकाः कथाः श्रुताः पाठिताश्च भवन्ति। ताः कथाः संस्कृतभाषया कथयितुं शिक्षकेण अवसरः कल्पनीयः। यदि कक्षायां छात्रसंख्या अधिका भवति तर्हि छात्रान् गणशः विभज्य प्रतिगणं द्वित्राणां कृते अवसरः दातव्यः। मध्ये मध्ये 'नूतनाः कथाः ज्ञात्वा आगत्य श्रावयन्तु' इति सूचना दत्ता चेत् छात्राः प्रयत्नेन अन्येषां सहाय्येन च नूतनाः कथाः ज्ञात्वा आगच्छन्ति,श्रावयन्ति च। कथाचित्राणां सहाय्येन कथावाचनस्य अभ्यासः अपि कारयितुं शक्यते।

**३.चित्रपठनम्**

किमपि चित्रं प्रदर्श्य तत्सम्बन्धितया शिक्षकः बहून् प्रश्नान् पृच्छन् छात्राणां भाषणस्य अभ्यासं कारयितुमर्हति। बालाः अपि चित्रं दृष्ट्वा परस्परं तद्विषये प्रश्नोत्तरं कर्तुमर्हन्ति।

**४.नाटकाभिनयः**

कञ्चित् प्रसङ्गं छात्राणां पुरतः विव्रीय प्रसङ्गम् अभिनयेन यथा प्रदर्शयेयुः तथा छात्राः प्रोत्साहनीयाः। कः छात्रः किं पात्रं निर्वहेत् इति निश्चित्य तत्सम्बद्धं सम्भाषणमपि यदि सकृत् पाठ्यते तर्हि छात्राः उत्साहेन नाटकाभिनये प्रवृत्ताः भवन्ति।

**५.भाषाक्रीडा**

अनन्त्यकथारचनम्, अपूर्णकथापूरणम् इत्यादीनां क्रीडानां द्वारा अपि भाषणाभ्यासः कारयितुं शक्यते। प्रगतस्तरे तु भाषण्म्, आशुभाषणम् इत्यादिकमपि उपयोक्तुं शक्यते।

# वैदिककाले मानवाधिकारशिक्षा

**संजिता गांधी** अनुक्रमाङ्कः – 42
शिक्षाशास्त्रिद्वितीयवर्षः

वेद शब्दो हि ज्ञानार्थकाद् विद् धातोः निष्पन्नः, विद् सत्तयाम्, विद् विचारणे, विदलृ लाभे विद् चेतनाख्यानिवासेषु इति धातुभ्योऽपि घञि वेदरूपं निष्पद्यते। वेद हि विविधज्ञानविज्ञानराशयः संस्कृतेः आधाररूपाः कर्तव्याकर्तव्यावबोधकाः, शुभाशुभनिर्देशकाः, विश्वहितसम्पादकाः, आचार–सञ्चारकाः, ज्ञानलोकप्रसारकाः, सत्यतायाः सरण्यः कलापाप्रेरकाः सुखशान्ति साधकाश्च सन्ति।

मानवाधिकारशिक्षा भारतवर्षे नूतनो नाऽसीत्। वैदिककाले मानवाधिकारस्य चेतनायाः उन्मेषः अभवत्। मानवाधिकारशिक्षा वैदिकसाहित्ये प्रत्यक्षरूपे नास्ति, किन्तु परोक्षरूपे आसीत्। मानवाधिकारज्ञानं वेदे बहुलकारेण परिदृश्यते। तत्र तु –

**धर्मार्थकाममोक्षं यत् पुरुषार्थत्रयं गताः।**
**साधने मानवास्तेषां स्वभावादधिकारिणः।।**

अर्थात् सर्वेभ्यो धर्म–अर्थ–काम–मोक्षाणाम् अधिकारो भवति। जगति सर्वेषां कृते समानाधिकारः भवेत्। न कश्चन ज्येष्ठः न वा कनिष्ठः, सर्वेऽपि अत्र भ्रातरः इति समानतयाः अधिकारः ग्रहीतव्या।

वैदिकसाहित्ये मानवाधिकाराणां विश्वव्यापी घोषणायां प्रायशः पञ्चानुच्छेदेषु भ्रातृत्व–समता–एकत्वता–स्वातन्त्रादि मानवीयगुणानामुल्लेखम् अभवत्। येषामुपदेश वैदिकऋषिभिः मानवसभ्यतायाः प्रारम्भिककाले प्रदत्तोऽस्ति। तत्र संज्ञासूक्ते आदौ –

**संगच्छध्व संवदध्वं सं वो मनांसि जानताम्,**
**देवभागं यथापूर्वे संजानाता उपासते।**
**समानो मन्त्रः समितिः समानो समाना हृदयानि वः,**
**समानमस्तु वो मनो यथा वः सहासति।।**

तैत्तिरीयोपनिषदि कथितमस्ति– "सत्यं वद। धर्मं चर। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। अतिथिदेवो भव। एषा मनुष्योचिताधिकाराणामुद्घोषणा भवति। अधिकारविषये – अर्थाधिकारः, कामाधिकारः, मोक्षाधिकारविषये परिदृश्यते।

अर्थाधिकारः –

**स्वप्राणरक्षणे चैवं स्वसर्वस्वरक्षणे तथा।**
**तदर्थं सम्यगाजीवे सर्वे स्युरधिकारिणः।।**

अर्थात् सर्वेभ्यो मानवेभ्यो सम्पत्तिजीवन यापनस्तरस्य अधिकारो भवति। कल्याणकरकार्य–सम्पादनाय अधिकारी भवति।

# मनोविज्ञानस्य सम्प्रत्ययः

**सजीव चन्द्र रायः** अनुक्रमाङ्कः – 43
शिक्षाशास्त्रिद्वितीयवर्षः

अथ मनसः विज्ञानं मनोविज्ञानमिति सुखेन वक्तुं शक्यते न तु व्याख्यातुम्। कुतश्चेत् आधुनिकमनोवैज्ञानिकाः मनसः सत्तामेव नाङ्गीगकुर्वन्ति। एते आत्मनः अस्तित्वमपि निराकुर्वन्ति। अतः मनोविज्ञानमिति पदस्य रूढार्थः स्वीकर्तव्य एव। मानवव्यवहारविज्ञानमेव मनोविज्ञानमिति आधुनिकानां राद्धान्तः।

पाश्चात्यास्तु मनोविज्ञानशास्त्रस्य व्यापकत्वं विज्ञाय शास्त्रमिदं विस्तरेण व्याख्यान्ति। तैस्तु मनोविज्ञाय "Psychology" इति शब्दः प्रयुज्यते। अयं शब्दः ग्रीकभाषायाः "Psyche" तथा "Logos" इत्याभ्यां शब्दाभ्यां निष्पन्नोऽस्ति ।"Psyche" इति शब्दस्य चत्वारः अर्थाः प्रसिद्धाः सन्ति। आत्मा(Soul)–मनः (Mind) – चैतन्यम् (Conscious) – व्यवहारञ्चेति (Behaviour) ते प्रसिद्धाः। "Logos" इति शब्दस्य विज्ञानम् अथवा विचारः (Discourse) इत्यर्थः। एवं स्वाभीष्टमर्थं गृहीत्वा नानावादाः मनोविज्ञानिकैः सूपपादिताः सन्ति। आत्मनः विज्ञानमेव (Science of soul) मनोविज्ञानमिति प्रथमः प्राचीनश्च वादः। किन्तु ये आत्मनः सत्तमाङ्गीकुर्वन्ति तेष्वपि ऐक्यमत्यं नासीत्। आत्मनः एकत्वम् अथवा अनेकत्वम्। आत्मशरीरयोर्मध्ये कः सम्बन्धः? आत्मनः रूपवर्णाकारायारादयः समानाः सन्ति। न वा? इत्येते प्रश्नाः पौनः पुन्येन तेषु समुत्पन्नाः। अन्ततोगत्वा आत्मनः विषये सर्वसम्मतः निर्णयः नैव सञ्जातः इत्यतः प्रश्नाः प्रश्नरूपेणैव अवर्तन्त। "अरिस्टाटल" महोदयः अस्य वादस्य प्रबलसमर्थकः आसीत्।

अन्ये केचन ग्रीक्देशस्य दार्शनिकाः मनसः विज्ञानं (Science of the mind) मनोविज्ञानमित्यूचुः। परमयमपि वादः कालान्तरे निरस्कृतः। कुतश्चेत् आत्मनः विषये ये ये प्रश्नाः प्रादुर्भूताः ते सर्वेऽपि प्रश्नाः अत्रापि समुद्भूताः। मनः कतिविधमित्यत्रापि विवादः आसीदेव। एवं मनसः विज्ञानमिदं नास्तीति उत्तरवर्तिभिः निर्णीतम्। ततः इतरे केचन चैतन्यस्य अथवा चेतनायाः विज्ञानं (Science of consciousnes) मनोविज्ञानम् इति आलपितुमारभन्त, चैतन्यदशायाः वर्णनं व्याख्यानमेव वा मनोविज्ञानमिति "विलियम् जेम्स" नामकेन मनोविज्ञानिना प्रोक्तम्। Principles of Psychology इत्यस्मिन् ग्रन्थे तेन अयं विचारः सूपपादितोऽस्ति।

चेतनायाः विज्ञानं मनोविज्ञानमित्यत्रापि विवादः आसीदेव। चेतेना (Conscious) इतीदं द्रव्यं(Substance) काचित् प्रक्रिया (Process) वा ? इत्यत्र ऐक्यमत्यं नासीत्। किञ्च चेतना अथवा चैतन्यमित्येतत् मनसः भागैकमात्रं वर्तते। मनोविज्ञाने तु तस्यैव मनसः अर्धचैतन्याचैतन्यमिति (Subconscious and Unconscious) शिष्टं भागद्वयमधिकृत्य विचारः क्रियते। एवं चैतन्यार्धचैतन्या–चैतन्यमिति त्रयाणां पक्षाणाम् अध्ययनं मनोविज्ञाने क्रियते न तु केवलमेकस्य पक्षस्य अथवा चेतनायाः इति फलितम्। एवं Psyche इति पदस्य आत्मा – मनः – चेतना इत्येते त्रयः अर्थाः विवादग्रस्ताः आसन् इत्यतः उत्तरवर्तिभिः तिरस्कृताः।

आधुनिकाः बहवो हि मनोविज्ञानिकाः Psyche इति पदस्य चतुर्थार्थमेव सहर्षं स्वीकुर्वन्ति। व्यवहारविज्ञानमेव (Science of Behavior ) मनोविज्ञानमिति आधुनिकानां राद्धान्तः। व्यवहारवादिषु

वाट्सन् वर्यः अग्रगण्यः आसीत्। मनोविज्ञानम् अधिकृत्य किमपि लेखनीयं चेत्तर्हि आदौ तद्व्यवहारस्य विज्ञानमिति सर्वैः ज्ञातव्यमिति सः साग्रहम् अवदत्।

"It is possible to write a Psychology, to define it as the Science of behavior." Watson J.B 'behavior'; An Introduction to comparative Psychology

मनोविज्ञानं यावत्पर्यन्तं व्यवहारस्य विज्ञानमिति नोच्यते तावत्पर्यन्तं तृप्तिः नैव लभ्यते इति तत्पूर्ववर्तिना विलस्बरिम्होदयेनापि उक्तम्। तद्वचनं यथा–"sychology may be most Satisfectority defined as the Science of human behavior"

मानवस्य बह्यः व्यवहारः (Covert Behavior) यथा प्रधानः तथा आन्तरिकः व्यवहारः (Covert Behavior) अथवा व्यापारः (Process) अपि प्रधानेव। व्यवहारो नाम केवलम् उद्दीपकानु–क्रियारूपो नास्तीति केचन वट्सन् प्रभृतीनाम् तीक्ष्णव्यवहारवादिनां वादं विमृशन्ति। मानवस्य ज्ञानसम्पादनेन तत्प्रकृतेः ज्ञानमपि संभवति ततः मनोविज्ञानस्य सम्प्रत्ययोपि ज्ञायते एव। अतः मानवप्रकृतेः अध्ययनं मनोविज्ञानम् (Psychology is the study of human nature-E.G. Boling) इति तेषां मतम्। परन्तु मनोविज्ञानं सर्वविधजन्तूनां व्यवहारस्य अध्ययनं करोति न तु मानवमात्रस्य इत्यत्र इदमपि मनोविज्ञानस्य अपूर्णमेव व्याख्यानमिति सुधीभिराकलनीयम्। एवं मनोविज्ञानस्य सर्वसम्मतं निर्वचनं जगतीतले नोपलभ्यते। किन्तु अधिकाधिक नव्याः व्यवहारविज्ञानमेव(Science of Behavior) मनोविज्ञानमिति स्वीकुर्वन्ति इत्यतः गतानुगतिको लोकः इति नयेन अन्येऽपि विद्वांसः एवमेव अर्थं स्वीकुर्वन्ति।

विभिन्नवातावरणेषु स्थितस्य जन्तोः व्यवहारेषु असकृत् परिवर्तनं संभवत्त्येव। जन्तुः वातावरणेन सह सामञ्जस्यसंपादनाय प्रयतेत सदा। भौतिकसामाजिकार्थिक–नैतिकात्धात्मिकशैक्षिकराजनैतिकादिषु वातावरणेषु स्थिताय प्राणिन सर्वदा सामञ्जस्यसंपादनं क्लेशाय कल्पते। अस्यां दिशि मनोविज्ञानं नितराम उपकरोति। मनोविज्ञाने एतादृशस्य सामञ्जस्यसंपादनात्मकव्यवहारस्य विस्तरेण अध्ययनाय अनन्ताः शाखाः सन्ति। समाजमनोविज्ञानम्, अतीन्द्रियमनोविज्ञानम्, पशुमनोविज्ञानम्, असामान्य–मनोविज्ञानम्, सामान्यमनोविज्ञानम्, शिक्षामनोविज्ञानम्, शारीरिकमनोविज्ञानम् इत्येवं शततशः शाखाः सन्ति इत्यलं विस्तरेण।

# मूल्याधारितशिक्षा

**शुभश्री महान्ति** अनुक्रमाङ्कः– 44
शिक्षाशास्त्रिद्वितीयवर्षः

भारतीयशिक्षाऽऽयोगेन राष्ट्रियशिक्षानीत्या च निर्धारितशिक्षोद्देशेषु अन्यतमं शिक्षोद्देश्यमस्ति यत् नैतिकसामाजिकसांस्कृतिकाध्यात्मिकमूल्यानां समुन्नयनम्। वस्तुतः शिक्षोद्देशेषु तुरीयमिदमुद्देश्यम् एव प्रधानमिति वक्तुं युज्यते। अधुनातनकाले सर्वत्र जनस्तीमः भौतिकवादोद्वेगः साम्प्रतिकसङ्कीर्णता–घर्षणानि जीवनसंग्रामः वित्तैषणम् इत्यादि परिस्थितयः मानवजीवनमूल्यानि अपचयं कुर्वन्ति। राष्ट्रियशिक्षानीतिः भारतीयशिक्षायाः सर्वेक्षणफलस्वरुपेणेत्थमवोचत् यत् "अस्माकं बहुवर्गीयसमाजे

शिक्षा सार्वभौमिकमूल्यानामुन्नयनं कुर्यात् भारतीयजनेषु राष्ट्रियैकता भावनां संबर्ध्य साम्प्रदायिक–सङ्कीर्णमनोवृत्तीः दूरीकृत्य उग्रधार्मिकवादं हिंसाचारम् अन्धविश्वासान् अहष्टवादं च समापयेत्। अस्माभिश्चिन्तनीयमस्ति यत् मनुष्यः एकाकी निर्जनवातावरणे उषितं योग्यः प्राणी न वर्तते। तस्य मूल्याधारितशिक्षा तदीयविशिष्टसामाजिकसांस्कृतिकसन्दर्भेण सम्पृक्ता भवेत्। जागतिकस्थायिमूल्यैः सह तस्याः सन्बन्धो भवेत्। वैज्ञानिकदृष्टिकोणः समानता पर्यावरणसंरक्षणं, प्रजातन्त्रं, स्वतन्त्रता, बन्धुत्वं, समाजवादः, धर्मनिरपेक्षतादिमूल्यानि शिक्षायाः सर्वस्मिन् स्तरेऽपि अवश्यं संरक्षणीयानि। प्रारम्भिक स्तरे मूल्याधारितशिक्षा जीवनानुरुपपरिस्थित्याधारिता भवेत्। माध्यमिकस्तरे उच्चस्तरे च विद्यार्थीनः स्वयं मूल्यानि तर्कसङ्कत्या विज्ञाय जीवने क्रियान्वयीकरणं कर्तुं जानीयुः।

इदानीन्तनशिक्षायां मूल्यस्याभावात् शिक्षिताः जनाः सामाजिकसांस्कृतिकाध्यात्मिकगुणोपेताः न जायन्ते, असद्विचारयुक्ताः अलसाः विद्रोहकारिणी लक्ष्यन्ते। अद्य समाजे सार्वजनीनविचारोऽयं यत् यः खलु गुणवान्, परिश्रमी, सत्यवादी, सः मूर्खः इति मन्यते, किमपि फलं तज्जीवने नावलोक्यते, मिथ्यावादिनो जनाः कृत्रिमव्यवसायैः पुष्पिताः फलिताश्च विचरन्ति। परिणामतः सामाजिकधारणामाऽनया शिक्षाक्षेत्रेऽद्य अनुशासनहीनता श्रमविषयेनादरः कर्तव्यस्य विषये अनासक्तिः अनुत्तरदायित्वं मिथ्यालापेरुचिः इत्यादिदुर्विचाराः समधन्ते। परिस्थितिमेनां परिशीलय राष्ट्रस्य नेतारः शिक्षाशास्त्रिणश्च शिक्षां मूलाधारितां कर्तुं उद्युताः सन्ति। प्राचीनकाले शिक्षायां मूल्यानां सर्वाधिकं महत्वम् आसीत् अद्य तस्य पुनः प्रतिष्ठापनं काम्यते। यदि न क्रियते तर्हि अचिरादेव मनुकुलप्रसूतानां मानवानां विध्वंसः सुनिश्चितः तस्माद्यतनयुवानः शोषणहिंसाप्रदूषणादिकमसि यथा न संलग्नाः स्युः तथाऽस्माभिः शिक्षाक्रमस्य निरुपणमवश्यं कार्यम्।

**मूल्याधारितशिक्षायाः महत्वम्**

साहित्यसङ्गीतकलासंस्कृतिदर्शनसदाचारपरम्पराभूयिष्ठोदेशः भारतदेशः इति विश्वेतिहासेषु स्वर्णिमाक्षरगुम्फितमेकत्र दृष्ट्वा गर्विताः भवेम, अन्येत्रेदानी राष्ट्रे सर्वत्र विद्वेषः हिंसा, नास्तिक्यवादः पाश्चात्यसभ्यतायाः अन्धानुकरणं पराम्पराविश्वासः, कृत्रिम् मैत्री, स्वार्थपरायणता इत्यादि दुष्प्रवृत्तयः भारतीय सामाजिकजीवने स्थानापन्नाः दृश्यन्ते। येन भारतीयजीवनमूल्यानि गगनकुसुमायमानानि इवावलक्यन्ते। तथाऽपि स्थगनेन तन्मन्दं चलद् भवति यथा तथाऽत्र यदि सम्पूर्णगतिरोधो भविष्यति तर्हि पतिष्यति। अद्यापि मानवेषु परस्परमनुरागात्मकसम्बन्धोऽस्ति स्त्रीणां सम्माननं गुरुणां वृद्धिनां सेवनं परोपकारबुद्धिश्च अस्माकं समाजे विलसति। इदानीमपि भारतीयः कदाचिद् परम्परागत–मूल्यानामुपरि कदाचित् च आधुनिकभौतिकवादप्रेरितभ्रान्तधारणानमुपरि च डोलायामानौ दृश्यते तस्मादिदानीं मूल्याधारितशिक्षायाः समनुसरणेन नूनमस्माकं प्राचीनं गौरवं यथावत् संरक्षितुं सक्षमाः वयं भवेम, सैव शिक्षाऽस्मान् त्रायते महतो भयात्।

**मूल्यानाम् अपचये मूलकारणानि**

१) आगमप्रामाण्यापेक्षया तर्कस्य प्राधान्यम्।

२) विकासवादिविचारधारया आध्यात्मिकभावनायाः विनाशः।

३) जनसंख्याविस्फोटः।

४) औद्योगिककरणं नगरीकरणं च।

५) शिक्षकाणां संरक्षकाणां च दायित्वहीनमनोवृत्तिः उपयुक्तैः कारणैः मूल्यानां ह्रासः संजातोऽस्ति।

अत एव राष्ट्रियशिक्षानीतौ (१६८३) मूल्यानामुन्नयनं शिक्षोद्देशेषु अन्यतममुद्देश्यिमति निगदितम्।

**मूल्याधारितशिक्षायाः मूलभूतसिद्धान्ताः**

- मूल्याधारितशिक्षा धार्मिकशिक्षायाः भिन्नास्ति। अतः मूल्याधारितशिक्षायां धर्मस्योपरि विशिष्टमवधानं न दद्यात्।
- मूल्यशिक्षेति स्वतन्त्रविषयत्वेन पाठ्यक्रमे स्थानं न दद्यात्। अपि तु सम्मिश्रित पद्धतिमाश्रित्य पाठनं कार्यम्।
- अध्यापकाः स्वयं व्यक्तित्वम् आचरणं च सुष्ठु प्रदर्शयेयुः येन छात्राः स्वतः एव मूल्याधारित–शिक्षामाधिगच्छेयः।
- सामाजिकार्थिकव्यवस्थामाश्रित्य मूल्याधारितशिक्षाव्यवस्था कार्या।

श्रीरामचन्द्रपरंब्रह्मणः जीवनमूल्यानि वाल्मीकिना प्रदर्शितानि अत्र स्मर्तव्यानि, यानि सर्वकालिकमहत्वं विनिर्दिशन्ति।

"यादृशः समाजः तादृशी शिक्षा यादृशी च शिक्षा तादृशः समाजः" इत्युक्तिः सर्वविदितास्ति। शिक्षा समाजस्य निर्माणं करोति, तथैव समाजस्यादर्शं शिक्षा प्रभावयन्ति। यतोहि बालकेषु अनुकरणप्रवृत्तिः जन्मजातास्ति बालकाः किशोरान् किशोराः प्रौढनां प्रौढाश्च राष्ट्रेनेतृन्, धर्माधिकारिणः इत्येवं समाजे सर्वे च परस्परम् अनुकरणं कुर्वन्ति।

दूरदर्शनमाध्यमेन भित्तिचित्रादिद्वारा च परिवारनियोजनं पर्यावरणसंरक्षणं, वैज्ञानिकदृष्टिकोणं मादकद्रव्यपरित्यागं च बोधयितुं शक्यते। एवं समाजस्य परिवेशः जागरुकः निष्कलङ्कः सत्प्रभावयुक्तश्च भवेत् तदा बालकाः जीवनमूल्याशिक्षां प्राप्नुवन्ति।

# मूल्यानि

**रञ्जिता साहु** अनुक्रमाङ्कः – 46
शिक्षाशास्त्रिद्वितीयवर्षः

**मूल्यशब्दस्यार्थः**

भारतीयशास्त्रेषु मानवीयगुणानां परिप्रकाशायशीलः शब्दार्थे प्रयुक्तोऽयं मूल्यशब्दः आङ्ग्ल–भाषायाः Value इति पदात् निष्पन्नम्। Value इति शब्दः लेटिनभाषायाः Valere इति शब्दात् समुत्पन्नमस्ति। यस्य च शब्दस्य अर्थस्तावत् योग्यता (Ability), उपयोगिता (Utility) एवं महत्वम् (Importance) इत्यवबोध्यते। व्यक्तेः वस्तुनः च मूल्यं तादृशः गुणः येन तस्य उपयोगिता महत्वं च प्रकटितं भवति। परन्तु बहुभिः विचारकैः मूल्यशब्दस्यार्थः भिन्नरीत्या प्रतिपादिताः। मानवीय इच्छा यत् तदेव मूल्यं भवति। सद्गुणानां साधनाय मूल्यं साधनं भवति। अतः जगति शीलवतां मूल्यवतां वा न किञ्चित् साध्यम्, तदुक्तम् –

**शीलेन हि त्रयोलोकाः शक्या जेतुं न संशयः।**
**न हि किञ्चित् साध्यं वै लोके शीलवतां भवेत्।।**

**मूल्यस्रोतांसि**

मूल्यानि अधोदत्तस्रोतेभ्यः अन्वेष्टुं शक्यानीति रोकीच् (Rokeach, 1973) महाशयस्य आशयः –

**सांस्कृतिक पृष्ठभूमिः**

अस्माभिः अस्मत्पूर्वजेभ्यः प्राप्तानि मूल्यानि अस्मत्संस्कृतेः मुख्यमूलेभ्यः उद्भूतानि। इमानि च मुख्यमूल्यानि अधोलिखिताः समस्यान् परिष्कर्तुं संस्कृति निर्दिष्टान् मार्गान् दर्शयन्ति।

१) शिशुविकाससम्बद्धाः विश्वासाः सामाजिकनियन्त्रणानि च।

२) प्रकृतिं दैवप्रसादत्वेन स्वीकरणाभिवृत्तिः। अथवा स्वसुखार्थं मानवे प्रकृतेः आक्रमणेच्छा।

३) मानवः वर्तमानार्थमुत भविष्यार्थं जीवेदिति प्रश्नः।

४) प्रयत्नप्रकारो नितरां प्रधानः।

५) पारस्परिकवैयक्तिकसम्बन्धप्रकारः स्पर्धात्मक अहोस्वित सहयोगमयी?

**वैज्ञानिकपृष्ठभूमिः**

वयं मूल्यानामवधारणानां बलेन मूल्यनिर्धारणं कुर्मः। विज्ञानविकासबलेन प्राप्तं ज्ञानं मूल्यपरिवर्तने कारणं भवति।

**धार्मिकपृष्ठभूमिः**

इतिहासः वदति यत् बहूनि मूल्यानि धर्मसम्बद्धानि भवन्तीति। नैकानि मूल्यानि बहुषु धर्मेषु समानानि।

**जीवनानुभवः मानवश्च**

बहूनि मूल्यानि मानवजीवननुभवेभ्यः उत्पन्नानि भवन्ति। मानवाः स्वीयविकाससुखादि प्राप्त्यर्थं सर्वदा स्वजीवने अनुप्रयोज्यमूल्यानां निर्धारणे नैरन्तर्येण प्रयतते।

इमानि मूल्यस्रोतांसि राधाकृष्णन् (1969) महोदयेनापि अङ्गीकृतानि, तेनोक्तं यत् शैक्षिकमूल्यानां मूलानि यद्यपि दर्शने समुपलभ्यन्ते, परं तेषां द्वितीयस्तरीयस्रोतांसि भवन्ति समाजः, प्रजाः, तासामादर्शाः संस्कृतिश्च।

सदाचारपालनम्, सत्यपरिपालनम्, अहिंसापालनम्, मातृ–पितृ–गुरुभक्तिः, परलौकिक भावनायाः जागरणम्, धर्माचरणम्, परोपकारः, समाजसेवा, विश्वबन्धुत्वभावना, पुनर्जन्मभावनायाः जागरणम् उपरोक्त स्रोतांसि मूल्ये अन्तर्भवन्ति।

## संस्कृतपाठ्यक्रमः

**प्राचीपरमिता थाटोइ** अनुक्रमांकः – 47

शिक्षाशास्त्रिद्वितीयवर्षः

पाठ्यक्रमः एकः मार्गः यः छात्रेषु स्वोद्देश्यानां प्राप्त्यर्थम् आवश्यकमस्ति। पाठ्यक्रमस्य उत्पत्तिः लैटिन भाषायाः "करेरी" इति शब्दात् अभवत्। यस्य अर्थः अस्ति – "लक्ष्यं प्रति गमनस्य

'धावनमार्गम्' इति। विद्यालयनियन्त्रणे स्थितस्य शिक्षार्थिनः समस्तानुभवाः पाठ्यक्रमान्तर्गताः भवन्ति। विभिन्नाध्ययन–सङ्घटित–क्रिया–पाठ्यक्रमः–पाठ्यक्रमेतरक्रिया–विद्यालयीय–सामाजिकजीवन–विद्यालयीय–वातावरणादीनि सर्वाणि पाठ्यक्रमे स्वस्वस्थाने लभन्ते। छात्राणां सर्वाङ्गीणविकासाय विद्यालयस्य सम्पूर्णजीवनमेव पाठ्यक्रमो भवति। यः छात्राणां जीवनस्य सर्वान् पक्षान् प्रभावयति तेषां सन्तुलितविकासे साहाय्यं करोति। पाठ्यक्रमे संस्कृतभाषायाः स्थानं कीदृशं भवेत् ? इदं चिन्तनम् आवश्यकमस्ति यत् "संस्कृतम्" न केवलमेका भाषा एव वर्तते अपि तु संस्कृतं तु भारतीयपरम्परा–सभ्यतयोश्च प्रतीकमस्ति। अतः देशस्य सर्वेषु विद्यालयेषु महाविद्यालयेषु च संस्कृतशिक्षायाः समुचिता व्यवस्था स्यात्।

**संस्कृतपाठ्यक्रमस्य प्रकाराः**

संस्कृताध्ययनस्य दृष्ट्या भारतवर्षे प्रायशः द्वयोः पाठ्यक्रमयोः व्यवस्था स्तः।

**१. शास्त्रीयविद्यालयेषु महाविद्यालयेषु च**

प्रथमा (प्रवेशिका) मध्यमा (उपाध्यायः) शास्त्री (स्नातकः) प्रविधिः पाठ्यक्रमः यः साहित्ये व्याकरणे दर्शने आयुर्वेदे ज्योतिषे धर्मशास्त्रे च आचार्यः इति उपाधिं प्रददाति तस्य पाठ्यक्रमे अवश्यं स्थानं भवेत्। विशिष्टदक्षताप्राप्त्यर्थं प्रवीणता–प्राप्त्यथञ्च अनुसन्धानकार्येषु विशेषावधानस्य आवश्यकता अस्ति। विद्यावारिधि (पी.एच.डी.) इति विद्यावाचस्पतिः (डीलिट्) इत्यादि उपाधीनां प्राप्त्यर्थं छात्रेभ्यः आर्थिकसहायता स्यात्।

**२. आधुनिकविद्यालयेषु महाविद्यालयेषु च**

षष्ठकक्षातः संस्कृतस्याध्ययनं मातृभाषायां क्षेत्रीयभाषायाञ्च भवति।

**पाठ्यक्रमनिर्माणस्य प्रमुकसिद्धान्ताः**

- बालकेन्द्रीयतायाः सिद्धान्तः।
- रचनात्मकशक्तेः उपयोगितायाः सिद्धान्तः।
- उपयोगितायाः सिद्धान्तः।
- परिवर्तनशीलतायाः सिद्धान्तः।
- विविधतायाः सिद्धान्तः।
- सहसम्बन्धस्य सिद्धान्तः।
- क्रीडाविधेः सिद्धान्तः।
- वैयक्तिकानुरूपतायाः सिद्धान्तः।
- सामाजिकानुरूपतायाः सिद्धातः।
- अनुभवानां पूर्णतायाः सिद्धान्तः।

**संस्कृतपाठ्यक्रमस्य रचनासमये ध्यातव्याः बिन्दवः**

१. पाठ्यक्रमः पूर्वकक्षास्तरस्य अपेक्षया आगामीस्तरस्य भवेत्।

२. पाठ्यक्रमे छात्राणां स्तरस्य रुचेर्वा पूर्णरूपेण स्थानं स्यात्।

३. पाठ्यक्रमः स्वयंपूर्णः भवेत् यथा– उच्चारणं, वाचनं, शब्दावलीः, रचनाकार्यं, अनुवादः, भाषातत्वं, शब्दरूपाणि, धातुरूपाणि च इत्यादिनां स्पष्टः उल्लेखः भवेत्।

४. पाठ्यक्रमे कथा, कविता, संवादः, गद्यं, पद्यं, रचना, एकाङ्की च भवेयुः।

५. पाठ्यक्रमे सामाजिक–नैतिक–सांस्कृतिक–आध्यात्मिक–वातावरणेन सह सम्बन्धितः यथार्थवादः आधारितः च भवेत्।

६. माध्यमिक–उच्चमाध्यमिक–स्तरयोः मातृभाषा–याः संस्कृतस्य च समन्वितः पाठ्यक्रमेऽपि निर्धारयितुं शक्यते।

७. राष्ट्रियशिक्षानीतीनां निर्धारणसमये संस्कृतं प्रति विशिष्टं ध्यानं देयम्।

## शिक्षायां व्यावसायिकरणस्य महत्वम्

**ईप्सिता दीक्षित** अनुक्रमाङ्कः – 48

शिक्षाशास्त्रिद्वितीयवर्षः

शिक्षा राष्ट्रियविकासस्य सामाजिकपरिवर्तनस्य एकमात्रं साधनम्। शिक्षा जीवनेन सह यथा सम्बन्धिता भवेत् तथैव प्रयासः करणीयः सर्वदा। शिक्षा न केवलं सर्वाङ्गीणविकासं साधयति अपि तु जनानां आवश्यकतानां आकांक्षाणां पूर्तये शिक्षा अनिर्वार्या भवति। मानवः मानवसाधनस्य सदुपयोगं कृत्वा स्वोन्नतिं साधयित्वा राष्ट्रियविकासे योगदानं करोति। मानवसंसाधनेन सह शिक्षायाः सम्बन्धः स्थापनीयः। एतदर्थं शिक्षायाः व्यावसायिकरणम् अत्यन्तमावश्यकमस्ति। अर्थात् मानवसंसाधनसप्रयोगार्थं विद्यालयेषु व्यावसायिकशिक्षा प्रदेया। व्यावसायिकशिक्षायां छात्रेषु "learning by doing" इति प्रवृत्तिः जायते। व्यावसायिकपाठ्यक्रमे सामान्यविषयान् विहाय नूतनविषयाः अपि सम्मिलिताः भवन्ति। यथा हस्तशिल्पशिक्षा, कृषिविषयकशिक्षा, वाणिज्यशिक्षा इत्यादयः। तत्र छात्राः एतान् विषयान् स्वयं कृत्वा एव अधिगच्छन्ति अनुभवं प्राप्नुवन्ति च। "work is worship" इति तैः ज्ञायते। तत्र श्रमस्य महत्वम् अपि दृश्यते।

माध्यमिकशिक्षामाधारीकृत्य छात्रस्य भावीजीवनं परिकल्पितं भवति। अस्यां माध्यमिकशिक्षायां व्यावसायिकशिक्षायाः उपरि महत्वं दीयते। अतः उपयुक्तमार्गदर्शनं निर्देशनं च दत्वा व्यावसायिकशिक्षां प्रति छात्राणाम् उत्साहः वर्धनीयः। माध्यमिकशिक्षायोगेन उक्तम् –

समाजे कुशलव्यक्तिनां निर्माणं भवति। व्यावसायिकशिक्षायाः प्रमुखमुद्देश्यं पठनेन व्यक्तेः केवलं व्यावहारिकशिक्षा न भवति। अपि तु मस्तिष्कस्य मनसः च पूर्णविकासः भवति। व्यावसायिकशिक्षा सामान्यशिक्षाम् आधारिकृत्य भवेत्। व्यावसायिकशिक्षायां कृषिसम्बन्धशिक्षायाः व्यवस्था अवश्यं भवेत्। व्यावसायिकशिक्षार्थं प्राविधिक तथा प्रद्योगिकविद्यालयानां पर्याप्तरूपेण स्थापनं स्यात्। एते विद्यालयाः पृथक्त्वेन अथवा बहुदेशीयविद्यालयस्य आवश्यकता वर्तते। बृहतनगरेषु केन्द्रीयप्राविधिकविद्यालयाः स्थापनीयाः। ये तस्मिन्नेव क्षेत्रे स्थितानां विद्यालयानाम् आवश्यकतानां पूर्तिं कर्तुं शक्नुयुः। पुनः औद्योगिकसंस्थानां समीपे प्राविधिकविद्यालयाः स्थापनीयाः। येन उभयोर्मध्ये परस्परं सहयोगः भविष्यति।

व्यावसायिकरणविषये भारतीयशिक्षायोगेन उक्तम् – माध्यमिकशिक्षायाः व्यायसायीकरणं बृहत् आकारेण भवेत्। व्यावसायिकशिक्षायाः पाठ्यक्रमे छात्राणां नामाङ्कनं विंशतिवर्षाभ्यन्तरे

✧ ज्ञानस्य सञ्चयः

✦ ज्ञानस्य प्रसारः
✦ ज्ञानस्य विकासः

**१. ज्ञानस्य सञ्चयः**

प्राचीनकाले मुद्रणयन्त्रस्याभावात् पुस्तकानि नासन्। तदर्थं शिक्षार्थिनां बहुकष्टमासीत्। परन्तु वैज्ञानिकयुगेऽस्मिन् यन्त्राणाम् आविष्कारेण पुस्तकानि बहु सुलभतया प्राप्तुं शक्यन्ते।

**२. ज्ञानस्य प्रसारः**

Education for all इत्युच्यते। तर्हि ज्ञानस्य प्रसारः शैक्षिकप्रविधिना सुलभः जातः। आधुनिकयुगे आकाशवाणी, दूरदर्शनम्, अन्तर्जालम्, पत्राचारपाठ्यक्रमः इत्यादीनां सहयोगेन दूरशिक्षणं सुलभं जातम्। तेन इदानीं सर्वे जनाः शिक्षायां भागग्रहणं कर्तुं शक्नुवन्ति।

**३. ज्ञानस्य विकासः**

शिक्षाशास्त्रिणां संशोधनस्य फलं भवति ज्ञानस्य विकासः। शिक्षाक्षेत्रे प्रतिदिनं नूतननूतनो–पकरणानि प्रक्रियाश्च आगच्छन्ति। यथा – सङ्गणकं, आधुनिकगणकयन्त्रम्, अन्तर्जालम् इत्यादीनि।

एवं छात्राणां बोधनाय क्रियामाणः यन्त्राणां तन्त्राणाञ्च प्रयोगः एव शैक्षिकप्रविधिः इत्युच्यते।

# गान्धीमहोदयस्य मतानुसारं शिक्षादर्शनम्

**स्मरणिका साहु** अनुक्रमाङ्कः – 807
शिक्षाशास्त्रिप्रथमवर्षः

दार्शनिकस्य राजनीतिज्ञस्य शिक्षाशास्त्रिणः च मोहनदासकरमचन्द गान्धी' इत्यस्य महोदयस्य जन्म गुजरात्प्रान्तस्य कथियावाड् क्षेत्रस्य पोरबन्दे नामके स्थले अक्टोबर मासस्य द्वितीयायां तिथौ १८६६ तमेऽब्दे अभवत्। तस्य पितुः नाम "करमचन्द्रगान्धी" इति तथैव तस्य मातुः नाम "पुतलीबाई" इति च। गान्धीमहोदयः स्वभावेन सरलः आसीत्। सः बाल्यादेव मातृपितृसेवापरायणः आसीत्।

**जीवनदर्शनम्**

गान्धीमहोदयः जीवने समाजे च क्रान्तिमुत्पादितवान्। एतादृशोऽन्यो निदर्शनरूपेण मानवजातेरितिहासे न उपलभ्यते। गान्धेः जीवनदर्शनस्य विश्लेषणेन वयम् चत्वारि महत्त्वपूर्णानि तत्त्वानि प्राप्नुमः। यथा – सत्यम्, अहिंसा, निर्भयता, सत्याग्रहः च इति।

गान्धेः मते मानावानां समाजानाञ्च प्रगतेः आधारो नैतिकता वर्तते। नैतिको जन एव निःस्वार्थभावेन कर्मणि तत्परो भवति। सः स्त्रीपुरुषयोः समानं महत्त्वं स्वीकरोति स्म। श्रमे तस्य विश्वासः अत्यधिकः आसीत्। सः स्वयमपि प्रतिदिनं शारीरिकं श्रमं करोति स्म।

**शिक्षादर्शनम्**

शैक्षणिकविचारेषु तस्य श्रेष्ठं स्थानं वर्तते। तन्मते शिक्षया बालकबालिकासु निहितानां सर्वेषां मानवीयगुणानां विकासः भवेत्। शिक्षयैव मानवस्य शरीरस्य, हृदयस्य, मस्तिष्कस्य, आत्मनश्च सामञ्जस्यपूर्णः विकासः भवेत्। एवं सः शिक्षया बालकस्य सर्वाङ्गीणविकासम् अभिलषति स्म। तन्मते शिल्पकेन्द्रिता शिक्षैव बालकानां सर्वाङ्गीणविकासं कर्तुं शक्नोति। स व्यक्तिसमाजयोः

समन्वयम् अभिलषति स्म। सः मातृभाषामेव शिक्षायाः माध्यमं मनुते स्म।

गान्धीमहोदयस्य शिक्षादर्शने आदर्शवादस्य, प्रकृतिवादस्य, प्रयोगवादस्य, यथार्थवादस्य च समन्वयः प्राप्यते। शिक्षायाः अर्थसन्दर्भे उद्देश्यसन्दर्भे च स आदर्शवादं समर्थयति स्म। बालकस्य स्वाभाविकविकासस्य समर्थनत्त्वात् स प्रकृतिवादी, श्रमस्य महत्त्वं, धर्मनिरपेक्षतायाश्च मतस्य स्वीकरणात् स यथार्थवादी च आसीत्।

**शिक्षायाः अर्थः**

"मानवस्य देहात्ममनोभ्यः उत्तमोत्तमस्य सर्वतोमुखेन बहिरानयनम् एव शिक्षा" इति महात्मगान्धिना प्रतिपादितम्। By education, I mean an all round drawing out of the best in the child and man-body, mind and spirit. वस्तुतः "गान्धिना प्रतिपादितायाः शिक्षायाः बालकानाम् बालिकानाञ्च सर्वेषां मानवगुणानां विकासः भवितुमर्हति। वस्तुतः सा शिक्षा नोचिता या हि बालकान् बालिकाश्च पूर्णं मनुष्यं सुनागरिकञ्च न कारयति" इति।

**शिक्षकस्य स्थानम्**

गान्धीमहोदयस्य विश्वासो बालकेन्द्रितशिक्षायामासीत् न तु शिक्षककेन्द्रितायां शिक्षायाम्। तस्य कथनमासीद्यत् शिक्षको बालकस्य मित्रम्, परामर्शदाता, पथप्रदर्शकश्च भवेत्। स मैत्रीमाध्यमेन बालानां मनोभावं विज्ञायैव पाठयेत्। सः बालनां चिन्तां प्रति कदाप्युदासीनो न भवेत। तान् चिन्तायाः मुक्तेः परामर्शं सर्वदा दद्यात्।

**गान्धीमहोदस्य शिक्षाव्यवस्था**

गान्धीमहोदयः भारतस्य सर्वेषु स्थलेषु भ्रमणं कृत्वा अत्र विद्यमानां न्यूनतां वैशिष्ट्यञ्च ज्ञातुं समर्थोऽभवत्। सः अक्टोबर मासे सृष्टेः १९३७ तमेऽब्दे महाराष्ट्रस्य वर्धाप्रदेशे आयोजितेऽखिलभारतीये राष्ट्रियशिक्षासम्मेलने भारतीयशिक्षायोजनायां एकां रूपरेखां प्रस्तुतवान्। एषा हि वस्तुतः तस्यैव योजनाऽसीत्। एतस्याः अन्यं नाम "वर्धाशिक्षायोजना" इति वर्तते। कालान्तरमेषा आधारभूता शिक्षायोजना 'बुनियादी शिक्षा' 'नई तालीम' इति च नाम्नाऽपि विख्याता वर्तते। ततः डा. झाकिरहुसैन् महोदयस्य आध्यक्षे "वर्धाशिक्षायोजनासमितिः" इत्यस्याः समित्याः घटनमभवत्। अनया समित्या गान्धिना प्रस्तावितायाः रूपरेखायाः आधारेण शिक्षायाः पाठ्यचर्या सत्त्वरमेव विनिर्मिता।

**अस्याः समितेः वैशिष्ट्यानि**

१. सप्तवर्षतः चतुर्दशवर्षपर्यन्तम् आयुष्मतां सर्वेषां बालकानां सर्वासाञ्च बालिकानां कृते निःशुल्का अनिवार्या च शिक्षा प्रदेया। अथवा सप्तवर्षात्मिका अनिवार्या निःशुल्का प्राथमिका च शिक्षा।

२. उद्योगकेन्द्रिता वा स्वावलम्बनपरशिक्षा। शिल्पं हस्तकौशलं वा शिक्षायाः केन्द्रभूतं भवेत्। एतेन बालकेषु परिश्रमस्य महत्त्वं शिक्षितुं शक्यते। एषा शिक्षाऽर्जनकाल एव उत्पादनं कर्तुं प्रभवति। अनेन स आत्मनिर्भरो भवितुमर्हति।

३. शिक्षायाः माध्यमं मातृभाषा एव भवेत्।

४. नैतिकता अहिंसा च शिक्षायाः आधारः।

५. नागरिकगुणस्य विकाससम्पादनम्। गान्धीमहोदयः पाठ्यक्रमः क्रियाप्रधानः स्यात् इति (Activity centred) अभिप्रैति स्म। तस्य परिकल्पनाप्रसूतस्य पाठ्यक्रमस्य वैशिष्ट्यानि यथा –

✧ ज्ञानेन्द्रियाणां विकाससम्पादनम्।

✧ पठनाभ्यासः आदौ, लेखनाभ्यासः तत्परम्।
✧ चित्रम् आदौ वर्णमाला अथवा अक्षराभ्यासः तत्परम्।
✧ स्वाधिगमः।
✧ अनुभवाधारिताशिक्षा।
✧ औद्योगिकशिक्षा।

गान्धीमहोदयस्य मतानुसारं सत्यस्य अथवा ईश्वरस्य प्राप्तिरेव शिक्षायाः चरमोद्देश्यम् वर्तते।

# शिक्षादर्शनम्

**सागरिका पट्टनायक** अनुक्रमाङ्कः – 808
शिक्षाशास्त्रिप्रथमवर्षः

का नाम शिक्षा ?

शिक्षा इत्यत्र "शिक्षा विद्योपादाने" इति धातोः "अजाद्यतष्टाप" इति सूत्रेण टापि कृते शिक्षा इति शब्दः निष्पद्यते।

शिक्षायै आङ्लभाषायां Education इति वदन्ति। अयं शब्दः ल्याटिन् भाषया निष्पन्नः वर्तते। यथा –

१. Educare – बहिरानयनम् – पोषणम्।
२. Educere – अग्रेनयनम् – निष्कासनम्।
३. Educatum – शिक्षणकार्यम् – प्रशिक्षणम्।
४. Educatus – उन्नयनम् – परिपालनम्। सुशिक्षितीकरणम्।
५. Educatio – नवजीवनम् – उन्नयनम् – परिपालनम्।

**शिक्षायाः अन्तर्भूताङ्गानि**

१. शिक्षणम्। २. प्रशिक्षणम्। ३. अनदेशनम्। ४. अधिगमः। शिक्षायाः प्रकाराः भवन्ति। यथा (प्रकार त्रयं भवति)

अ) औपचारिकी शिक्षा – औपचारिकशिक्षयाः नियमः भवति एवं क्रमबद्धता, वस्तुनिष्ठता एवं च अनुशासनम् भवति। उदा – महाविद्यालयः, गुरुकुलम्, इत्यादि।

आ) अनौपचारिकी शिक्षा – अनौपचारिकी शिक्षामाध्ये समयस्य निर्धारणम् न भवति। एवं तत्र विकासानुगुणं आवश्यकतानुगुणं एवं अभिरुच्यनुगुणं पाठः भवति। उदा – कृतकस्वाध्यायकेन्द्राणि, पत्राचार इत्यादि।

इ) निरौपचारिकी शिक्षा – या शिक्षा येन केन प्रकारेण प्राप्नोति सा शिक्षा निरौपचारिकी शिक्षा भवति। यथा – परिवारः, समाजः इत्यादि।

**शिक्षायाः उद्देश्यम्**

तत्र प्रश्नः उदेति किं शिक्षायाः उद्देश्यम् ? बौद्धशिक्षायाः उद्देश्यम् भवति – निर्वाणप्राप्तिः।

न्यायशिक्षायाः उद्देश्यम् भवति – अपवर्गः। वेदान्तशिक्षायाः भवति – मोक्षः इति। तर्हि शिक्षाशास्त्रे शिक्षायाः परम उद्देश्यं भवति – बालकस्य सर्वाङ्गीणविकासः। यथा – मानसिकः, शारीरिकः, आध्यात्मिकः, तार्किकः, लौकिकः वैज्ञानिकविकासश्च।

**शिक्षायाः परिभाषा**

१. मानवस्य देहात्ममनोभ्यः उत्तमोत्तमस्य सर्वतोमुखेन बहिरानयनमेव शिक्षा इति महात्मागान्धिना प्रतिपादितम्।

२. स्वस्थे शरीरे स्वस्थस्य मनसः निर्माणमेव शिक्षा इति आरिष्टाटल् महोदयस्य मतम्।

३. बालकस्य आन्तरिकविकासमेव शिक्षा इति रूसोवर्यः वदति।

४. पूर्वमेव शरीरे सन्निहितायाः पूर्णतयाः प्रकटीकरणमेव शिक्षा इति विवेकानन्दमहोदयस्य उक्तिः।

**शिक्षायाः प्रकृतिः**

१. शिक्षा आजीवनं प्रचलनप्रक्रिया वर्तते।

२. शिक्षा व्यक्तेः समाजस्य च विकासं सम्पादयति।

३. शिक्षा मानवव्यवहारं परिष्करोति।

४. जीवनमेव शिक्षा, शिक्षा एव जीवनम्।

**शिक्षायाः कार्याणि**

१. चरित्र निर्माणम्, नैतिकविकासस्य सम्पादनम्।

२. संस्कृतेः संरक्षणं करोति।

३. सामाजिकभावनायाः विकासं सम्पादयति।

४. व्यक्तित्त्वस्य सर्वाङ्गीणविकाससम्पादनं भवति।

शिक्षादर्शनम् इत्यत्र दर्शनम् नाम किम् ?

दृशिर प्रेक्षणे इत्यस्मात् धातोः ल्युट् प्रत्यये कृते दर्शनम् इति शब्दः निष्पद्यते। दृश्यते अनेन इति दर्शनम् इति व्युत्पत्तिः भवति। एवं च येन साधनेन इदं विश्वम् इदं वस्तु जातम् ब्रह्म जीवात्मा, प्रकृतिश्च यथार्थत्वेन दृश्यते निरीक्ष्यते, परीक्ष्यते समीक्ष्यते, विविच्यते च तद् दर्शनम् इति।

**दर्शनस्य परिभाषाः**

१. दर्शनं ज्ञानस्य विज्ञानं वर्तते।

२. दर्शनं विज्ञानस्य विज्ञानं वर्तते।

३. दर्शनं यथार्थस्य तत्त्व दर्शनं भवति।

**शिक्षादर्शनयोः सम्बन्धः**

१. दर्शनं सैद्धान्तिकपक्षे तिष्ठति शिक्षा तु तस्मै सैद्धान्तिकपक्षाय क्रियारूपं ददाति।

२. शिक्षायाः मूलाधारेषु दर्शनं अन्यतमं वर्तते।

३. शिक्षायाः एवं दर्शनस्य अन्योऽन्याश्रयः सम्बन्धः वर्तते।

**शिक्षादर्शनस्य कार्याणि**

१. शिक्षायाः विभिन्नपक्षाणां समस्यानाञ्च दार्शिनकदृष्ट्या अध्ययनं विश्लेषणञ्च वर्तते।

२. शिक्षायाः मूलभूतसिद्धान्तानां उद्देश्यानां च निर्धारणम्।

३. जीवनरहस्यस्य उद्घाटनम्।
४. प्राचीननवीनानां दर्शनानां मूल्यानां च मध्ये समन्वयसम्पादनम् इति।

## समाजे शिक्षायाः भूमिका

**प्रमिला कुजूर** अनुक्रमाङ्कः – 809
शिक्षाशास्त्रिप्रथमवर्षः

विस्तृतप्रपञ्चेऽस्मिन् विविधप्रकारकाः जीवाः निवसन्ति। विविधप्राणिपक्षिणः जनाश्च विशिष्ट–पद्धत्या विशिष्टरूपेण अपि शोभन्ते। शिक्षा नाम सामाजिकी प्रक्रिया भवति। मानवानां समूहः समाजः इति कथ्यते। वास्तविकार्थः तु विनयशीलता, बुद्धिमत्ता, नैपुण्यं, शान्तस्वभावता इत्यादि समीचीनगुणाः येषु वर्तन्ते, तेषां समूहः एव समाज इति व्यवहारः। सच्चिदानन्द–उडुपमहोदयैः लिखिते पुस्तकेऽपि – समीचीनगुणभूयिष्ठः इत्येव अर्थः समाजस्य।

हीनदुराचारगुणयुक्तानां जनानां प्राणिनां समूहः एव समाज इति उल्लिखितम्। यदि मानवाः अपि दुर्जनाः भवन्ति, तर्हि तत्र समाजः इत्येव व्यवहार इति ज्ञायते। अनेन सामाजिकान्तःक्रियाणां ज्ञानेन विना शिक्षोद्देश्यं निर्धारयितुं न शक्यते। सामाजिकपरिवर्तने नियन्त्रणे च शिक्षायाः महत्वमस्ति इति वर्तते। अतः शिक्षाः नाम सामाजिकप्रक्रिया इत्युच्यते। सामाजिकपरिवर्तने शिक्षायाः दायित्वमस्ति इति शिक्षकः प्रथमं जानीयात्। भारतीयसमाजस्य स्वरूपज्ञानं प्रथमं तस्मिन् भवेत्। अस्माकं भारतीयसंस्कृतेः जीवनमूल्यानाञ्च ज्ञानं यदि तस्मिन् स्यात्तर्हि सः शिक्षकः समाजानुगुणं शिक्षां प्रदातुं शक्नोति।

शिक्षासमाजयोः सम्बन्धः सामाजिकव्यवस्था तथा सामाजिकप्रगतेश्च विज्ञानमस्ति। मानवः समाजस्य आधारो भूत्वा समाजे मम अधिकारः कः? इति ज्ञात्वा सर्वविधरूपेण प्रोन्नत्यै स्वकीयं जीवनमर्पयति। सः चिन्तयति यत् सामाजिकव्यवहारान् भाषा, विचारः, अनुभवः, क्रिया, इत्यादिरूपेण कुर्वन् अहमपि समाजे सदस्यरूपेण अस्मि, मयापि शिक्षया समाजानुगुणं परिवर्तनं कर्तव्यं, सहयोगः कर्तव्यः इति।

अधुना भारतं महत्याः संस्कृत्याः उत्तराधिकारी अस्ति। किन्तु दौर्भाग्यवशात् सम्प्रति भारतं समुचितशिक्षितराष्ट्रं नास्ति इति शिक्षायोगेन उक्तम्। यावत्पर्यन्तमस्माकं राष्ट्रं शिक्षितं न भवति तावत्पर्यन्तमात्मानमाधुनिकमिति अवगन्तुं न शक्नुयाम। अतः ज्ञातव्यं यत् शिक्षायां सामाजिकपरिवर्तनं, सामाजिकपरिवर्तनप्रभावश्चास्तीति। डॉ. राधाकृष्णन् महोदयैः उक्तं यत् शिक्षा परिवर्तनस्य साधनमस्ति। समाजे शिक्षायाः स्थानं मूर्धन्यं भजते। समाजमुखेनैव ज्ञातुं शक्यते यत् तस्मिन् परिसरे शिक्षायाः प्रभावः कथं वर्तते? कीदृशाः जनाः सन्ति? इति तुलनामपि कर्तुं शक्यते। अतः समाजः अपि उन्नतिपथे परिदृश्यते इति।

समाजे स्थायिसमाजः गत्यात्मकसमाजः इति द्वौ प्रकारौ स्तः। यः मन्दगत्या एधते सः समाजः स्थायिसमाजः। इत्युक्ते अत्यल्पगतिमान् भवति स्थायिसमाजः तन्नाम प्राचीनसमाजः इति।

द्रुतगत्या यत्र परिवर्तनं भवति सः भवति गत्यात्मकः समाजः इति। तन्नाम आधुनिकसमाजे यदि शिक्षितः पुरुषः स्वगृहं गत्वा कार्यं करोति चेत् तत्रापि तस्य स्थानमौन्नत्ये तिष्ठति। अत्र व्याप्य–व्यापकसम्बन्धः वर्तते। किन्तु समाजे एवं परिदृश्यते यत् शिक्षायाः व्याप्यं नास्ति व्यापकस्थानमेव अलङ्करोति इति। कालिदासः अपि उत्तमकाव्यं रचितवान्। यदि सः शिक्षितः न स्यात्तर्हि तस्य नवनवोन्मेषशालिनी प्रतिभा व्यर्थतां गच्छति स्म।

भगवद्गीतायां चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः इति स्मर्यते। पूर्वं वेदाधिकारः यस्य कृते भवति स एव वेदादीन् पठति स्म। देवतासम्बन्धिकार्यं करोति स्म। यः शिक्षणं प्राप्य कर्म करोति तद्द्वारा तस्य समाजे स्थानं लभ्यते स्म। शङ्कराचार्येण कर्ममीमांसा असत्या, ब्रह्मजिज्ञासा एव सत्या इति प्रतिपादितम्। मण्डनमिश्रस्य गृहं परितः स्थितौ द्वावपि शुकौ मीमांसाविषये जानीतः इति वयं जानीमः एव। तदर्थं समाजस्य निर्माणार्थं शिक्षायाः आवश्यकता महती वर्तते। विज्ञानक्षेत्रे, वाणिज्यक्षेत्रे, अणुक्षेत्रे सर्वेषु क्षत्रेष्वपि शिक्षायाः योगदानमस्ति एव। शिक्षा अस्ति चेत् गृहं, परिवारं, समुदायं, समाजं, भारतश्च तदनुगुणं परिवर्तयितुं शक्नुमः।

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्**
**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।**
**विद्या वन्धुजनो विदेशगमने विद्या परा देवता**
**विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।**

इत्यादि सुभाषितं शिक्षामहत्वं ज्ञातुम् अवश्यं सहकरोति। व्यक्तेः व्यवहारः कथमस्ति ज्ञानं कथं वर्तते इत्यादिकं पश्यति समाजः। अतः नैतिकमानसिकसामाजिकवैज्ञानिकादिज्ञानं प्राप्तुं समाजे शिक्षायाः महत्वमुत्तमोत्तमरूपेण वर्तते।

## मातृभाषा में शिक्षा

**तुषार रञ्जन् प्रधान्** अनुक्रमाङ्कः – 810
शिक्षाशास्त्रि प्रथमवर्ष

प्रतिवर्ष २१ फरवरी को अंतर्राष्ट्रीय मातृभाषा दिवस मनाया जाता है। दुनिया कें अन्य देशो में मातृभाषा की क्या स्थिति है मातृभाषा के संरक्षण, उसकी समृद्धि के लिए कहां क्या हो रहा है, यह तो दुनिया भर में घूमने वाले बेहतर ढंग से बता सकते हैं। हमारे देश में मातृभाषा को किस तरह से, चलन से, गायब कर अंग्रेजी को मातृभाषा बना दिया जाए, इसकी जोरदार कोशिश की जा रही है। सरकारों से लेकर (हर पार्टी की सरकार) कार्परेट और कार्परेट–हित–साधक अखबार, उसके प्रवक्ता बनकर लिखने वाले सब इस जगत में हैं कि मातृभाषा शब्द हो मानस से, बुद्धि से बाहर हो जाए। पूछेंगे तो रटा रटाया और हर काम की तरह यहां भी भ्रम में डालने वाला उत्तर मिल जाएगा कि मातृभाषा के विकास में हमारी सरकार भरपूर मदद कर रही है। लेकिन एकदम् उल्टा हो रहा है। हम इस झूठ, फरेब पाखंडकाल में अपनी ही वस्तुएं नष्ट होते देख रहे

है। सरकार की कथनी और करनी में इतनी चौडी खाई इससे पहले कभी नहीं हुई।

शिक्षा में इस बात को लेकर बहस होती है कि प्राथमिक शिक्षा मातृभाषा में ही दी जाए । तमाम बाल मनोवैज्ञानिकों, शिक्षाविदों, विद्वानों की गुहार को, दरकिनार कर सरकार ने कक्षा एक से अंग्रेजी पढाना शुरु कर दिया। यह सिद्ध हो चुका है कि मातृभाषा मे शिक्षा बालक के उन्मुक्त विकास में ज्यादा कारगर होती है। अलग अलग आर्थिक परिवेश के बालकों में विषय को ग्रहण करने की क्षमता समान नहीं होती। अंग्रेजी में पढाए जाने पर और कठिनाई होती है। जिनका पूरा परिवेश अंग्रेजी भाषामय हो ऐसे परिवार देश में कम ही है। मातृभाषा के माध्यम से जब पढाया जाता है, तो बालकों के चेहरे उत्फुल्लित दिखाई देते है। एक तो अंग्रेजी सीखनी पडती है, लेकिन सरकारों ने ठान लिया है कि बच्चों को अंग्रेजी के माध्यम से ही पढाना है। भाषा सीखनी अच्छी बात है और गुणकारी भी है। भाषा हमें एक नये संसार में प्रवेश कराती है। लेकिन मातृभाषा की उपेक्षा कर शिक्षा के माध्यम से उसे हटाकर जिस तरह के भाषा–संस्कार डाले जा रहे है, वह खतरनाक है। बालक न अंग्रेजी जान पा रहा है न मातृभाषा। एक खिचडी भाषा वह भी अधजली का संस्कार मिल रहा है।

प्रायः हर पालक की शिकायत है कि उसका बच्चा छत्तीस नहीं समझता थर्टीसिक्स बोले तब ही समझता है। उन्यासी कहो तो पूछता है – यह क्या होता है। सेवन्टी नाइन कहो तब कहेगा तो ऐसा बोलो ना किसी भाषा का कोई शब्द जो पूरा अर्थ दे, अपनी भाषा में लेना गलत नहीं है। दुनिया की हरभाषा इसी तरह ग्रहण कर समृद्ध होती चली है। हिन्दी में उर्दू, फारसी, संस्कृत सहित लोकभाषाओं के ढेरों शब्द है। अपनी इस लम्बी यात्रा में हिन्दी ने बाहर से खूब ग्रहण किया है। अंग्रेजी के भी ढेरों शब्द है। मोटर, रेलगाडी, रोड, टाईम ये शब्द हिन्दी के हो गए है। काफी समय हो गया पिछली पीढी पढने के लिए अपना गांव छोड शहर में आई तो बाल बनवाने के लिए उसका परिचय हेयर कटिंग सेलून से हुआ है, और वह बाल बनवाने नही कटिंग करवाने जाता है। इन सबसे हिन्दी समृद्ध हुई है। आज मोबाइल के साथ मिस काल आया और गांव–गांव में बस गया। एक ठन मिस काल मार देबे आम अभिव्यक्ति है। ई–मेल, इन्टरनेट, कम्प्यूटर, ल्यापटाप, फेसबुक आदि शब्द हिन्दी के प्रचलन म अ गयें। इनका हिन्दी में अनुवाद करना हास्यास्पद होता है। यह भी विचार करना चाहिए कि किसी और भाषा से शब्द लेना एक बात है, लेकिन खिचडी वाक्य बनाना मूर्खता है। समस्या यह है कि हमारे हिन्दी के कुछ समाचार पत्र ऐसी भाषा लिखने लगे है जो हास्य एपिसोड् में तो काम आ सकती है, परन्तु भाषा की गम्भीरता का मजाक बनाती है। ऐसे अखबारों ने कार्पोरेट् होने का भ्रम पाल रखा है।

आज ऐसे लोग पूरा भाषा–संस्कार भ्रष्ट कर रहे है। शब्द लेना ठीक, लेकिन हमारी भाषा के सर्वनाम, संज्ञा, क्रिया और तो और पूरा वाक्य विन्यास का सत्यनाश करने में तुल गए हैं। स्टुडेंटस् ने फेस्टीवल एन्जाय किया यह कैसी भाषा है। लिखित और बोलने के वाक्य में फकर होता है। दरअसल न तो इन्हें मातृभाषा आती हैं न ही अंग्रेजी ६ बहुत पहले जब अंग्रेज आए तो उनके नौकर जो भाषा बोलते उसे बटलर भाषा कहा जाता। अगर समाज में कोई ऐसी भाषा बोलता तो उसका मजाक उडाया जाता कि क्या बटलर भाषा बोल रहे हो। अगर हम हिन्दी की

ही बात करें तो कार्पोरेट उसकीं व्यावसायिक उपयोगिता समझता है। केन्द्र सरकार ने अपने कार्यालयों में हिन्दी में कामकाज को बढावा देने का उपक्रम किया है। हर साल १४ सितम्बर को हिन्दी दिवस मनाया जाता है। लिकिन कार्पोरेट में हिन्दी का कामकाज के लिए कोई जगह नहीं है। हिन्दी उनके उत्पाद के व्यापार के लिए स्वीकार्य है। अंग्रेजी माध्यमों के विद्यालयों में जिस तरह अंग्रेजी की शिक्षा दी जा रही है वह केवल सेल्समैन पैदा करने के काम आ रही है। पुराने मेट्रिक पास अच्छी अंग्रेजी लिखा करते थे। ऊंची से ऊंची नौकरी पाने के लिए, ज्ञान अर्जित करने के लिए अंग्रेजी सीखना, अंग्रेजी में निष्णात होना बहुत अच्छी बात है, जरूरी भी है; लेकिन मातृभाषा की कीमत पर अंग्रेजी नहीं सीखी जा सकती ऐसा करने पर आधा तीतर आधा बटेर की स्थिति होगी।

अंग्रेजी माध्यम के कुछ विद्यालयों में तथा विद्यालय परिसर में हिन्दी या मातृभाषा में बात करते पाए जाने पर दंडित किया जाता है। कुछ विद्यालय तो एकदम आगे हैं, वे माता–पिता की शैक्षणिक योग्यता को बच्चों के प्रवेश का आधार बनाते है। बहरहाल एक बडा वर्ग मातृभाषा की उपयोगिता समझता है। जालंधर की एक खबर छपी है। वहां तमाम सरकारी स्कूलों और अंग्रेजी माध्यम के स्कूलों ने सामूहिक रूप से २१ फरवरी को मातृभाषा दिवस मनाया। बच्चो ने, विद्यालय समितियों ने एक स्वर से पंजाबी बोलने पर जोर दिया। इनमें कुछ कुछ ऐसे विद्यालय भी शामिल हुए जिनके विद्यालयों में पंजाबी बोलना प्रतिबंधित था। आज सब ने मातृभाषा का महत्त्व समझा। लेकिन अंतर्राष्ट्रीय मातृभाषा दिवस पर और किसी राज्य में कोई कार्यक्रम हुआ ऐसा पढने में नहीं आया। दरसल शिक्षा को अधिकार का सवाल मातृभाषा में शिक्षा के साथ जुडा है। अपनी भाषा में शिक्षा प्राप्त करना बच्चे का अधिकार है, उस पर दूसरी भाषा लादना देना उसके स्वाभाविक विकास में बाधा डालना भी है।

# भारतीयसंस्कृतिः

**मोनालिसा साहु** अनुक्रमाङ्कः – 811
शिक्षाशास्त्रिप्रथमवर्षः

भारतीयदर्शनस्य धर्मस्य संस्कृतेश्च महत्वम् अनिर्वचनीयम् अस्ति। बौद्धिक–भावात्मक–आध्यात्मिक–कालात्मकनिष्पत्तेः स्रोतरूपा निरन्तरधारारूपा संस्कृतभाषा मानवजीवनस्य अन्तर्वाहिनी वर्तते। अस्माकं भारतीयसंस्कृतेः स्रोतः संस्कृतभाषा वर्तते। भारतस्य प्रतीष्ठे द्वे संस्कृतं संस्कृतिस्तथा इत्युक्तिः प्रसिद्धा एव। सम् इति उपसर्गपूर्वक – धातोः स्त्रियां क्तिन् प्रत्यये सति संस्कृतिशब्दः निष्पद्यते।

**संस्कृतेः स्वरूपम्**

का नाम संस्कृतिः? परिष्करणं संस्करणं वा संस्कृतिरिति। अस्माकं संस्कृतिः स्वातन्त्र्यस्य संस्कर्त्री सद्भावनां भावयित्री, दमस्य दात्री, गुणगणस्य ग्राहयित्री, सदाचारस्य संचारयित्री च वर्तते।

विविधाचारविचारवादव्याकुले विश्वस्मिन् सैव संस्कृतिरुपादेयतामाप्स्यति। या समेषां स्वान्ते सद्भावपुरस्सरं विश्वहितं, विश्वबन्धुत्वं, विश्वोपकरणं कुर्यात्।

**भारतीयसंस्कृतेः वैशिष्ट्यम्**

भारतीयसंस्कृतेः काश्चन मुख्याः विशेषा अत्र प्रस्तूयन्ते –

१. धर्मप्राधान्यम् – जगतः मूलसंस्कृतेः नियामकतत्त्वं भवति। यत्र जगद्धारकत्वं तत्र धर्मत्वम्। मानवेषु धर्म एव तान् व्यवच्छेदयति पशुभ्यः। अतः उक्तम् –

**'धर्मो हि तेषामधिको विशेषो धर्मेण हीनः पशुभिः समानः'**

महाभारतकर्तृणा व्यासेन जगत् धारकत्वं तत्वनां धर्मः इति समाख्या व्यधायि। धारणात् धर्मः इत्याहुः धर्मो धारयते प्रजाः। यः स्यात् धारणसंयुक्तः सः धर्मः इति। वैशेषिकदर्शनकृता कणादेन प्रतिपाद्यते यत् येन लौकिकी पारलौकिकी च समुन्नतिः संजायते स एव धर्मः। धर्मः जीवन रक्षकः, अतः धर्मः आश्रयणीयः।

२. आध्यात्मिकी भावना – जीवनमेतत् न केवलं भोगार्थमेव अपितु आत्मोन्नतेः प्रमुखं साधनं भवति। आध्यात्मिकभावना मानवस्य देवत्वं प्रापयति। समग्रमपि प्राणिजातम् तत्रैकत्वमनुभवति। जगत् इदं परमात्मना व्याप्तम्। तदुक्तम् –

**ईशावास्यमिदं सर्वं यत् किं च जगत्यां जगत्**

ईशोपनिषद्

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।**

ईशोपनिषद्

**यस्मिन् सर्वाणि भूतान्यत्मैवाभूद् विजानतः**
**तत्र कः मोह कः शोकः एकत्वंमनुपश्यतः।**

ईशोपनिषद्

आध्यात्मप्रवृत्या जीवनमुन्नतं भवति। उपनिषत्सु गीतायां च अस्याः भावनायाः वर्तते विविधं महत्वम्।

**सदाचारपालनम्**

सताम् आचारः सदाचारः। सज्जनाः विद्वांसः यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशीकृत्य सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। सदाचारस्य सत्ता एव संसारे जनोन्नतिं करोति। देशस्य समाजस्य जनस्य च उन्नतौ सदाचारस्य महती आवश्यकता वर्तते। सदाचारेणैव जनाः ब्रह्मचारिणो भवन्ति। सदाचारेणैव शरीरं परिपुष्टं भवति। संसारे सदाचारस्य एव महत्वं दृश्यते। महाभारते प्रोक्तम् –

**वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च**
**अक्षीणो वित्ततःक्षीणो वृत्ततस्तु हतो हतः इति।**

यः सदाचारेण हीनो अस्ति सः वस्तुतः पतितोऽस्ति। ब्रह्मचर्यस्य वेदेऽपि महिमा वर्णितोऽस्ति' ब्रह्मचर्येण तपसा देवामृत्युमुपाघ्नत। अतः सर्वैः स्वोन्नत्यै सदाचारः पालनीयः।

**आश्रमव्यवस्था**

ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासश्च चत्वारः एते आश्रमाः। आपञ्चविंशतिः वर्षं ब्रह्मचर्याश्रमः। विद्याध्ययनम्, तपोमयजीवनयापनं, सर्वविधगुणानां संग्रहाश्च आश्रमेऽस्मिन् प्रधानं कर्तव्यम्। आपञ्चाशत् वर्षम् गृहस्थाश्रमः। भौतिकशारीरिकमानसिकसमुन्नतिः। दाम्पत्यं जीवनयापनं वंशप्रतिष्ठायै सन्तानो–त्पत्तिश्चाश्रमेऽस्मिन् विशिष्टं कर्म। पञ्चाशत् वर्षानन्तरम् वानप्रस्थाश्रमे प्रवेशः सपत्नीकेनेश्वराराधनम् संयमपालनम् योगादिकर्मसु विशिष्टा प्रवृत्तिश्च तत्र प्रमुखं कर्म। षष्ठिवर्षानन्तरं यदैव वैराग्यभावना समुत्पद्यते तदैव संन्यासाश्रमः आश्रयणीयः।

समग्रे भारतवर्षे संस्कृतस्यैव प्राधान्यं दृश्यते। संस्कृतभाषाध्ययनेन मेक्समूलर वत् ईसाई जनाः भारतं ईसाई देशं निर्मातुं स्वप्नं पश्यन्ति स्म, परन्तु ते स्वयं भारतीयसंस्कृतेः सभ्यतायाः पूर्णभक्तरुपेण परिगण्यन्ते। यथा मूलं विना पत्राणि सरसानि न भवन्ति तथैव संस्कृतिं सरसान् विदधातुं संस्कृतस्यावलम्वनं नितराम् आवश्यकम्। सर्वाधिकप्राचीनभाषा भूत्वाऽपि सा शतसहस्र–वैदेशीकाक्रमणानन्तरमपि हिमाद्रिवत् इदानीमपि अनन्ततारुण्येन अक्षय्यतेजसा च विद्यमाना अस्ति।

यत्र भारतीयसंस्कृतेः आदर्शः "सा विद्या या विमुक्तये" तत्र पाश्चात्यसंस्कृतेःआदर्शः "eat drink and be marry" अर्थात् पिबत भुंक्ष्व रमस्व इति। एतत्सर्वं न शोभते।

## भाषाध्ययनस्य चत्वारि कौशलानि

**स्वर्णमन्दारः** अनुक्रमांक – 812
शिक्षाशास्त्रिप्रथमवर्षः

भाषव्यक्तायां वाचि इत्यस्मात् धातोः भाषा इति पदं निष्पन्नं भवति। येन भावाभिव्यक्तिः भवति। मानवसभ्यतायाः संस्कृतेश्च विकासे भाषायाः महत्त्वपूर्णं योगदानं विद्यते। भाषा मानवानां भावनायाः अभिव्यक्तेः उत्कृष्टं साधनं विद्यते।

**भाषाशिक्षणम्**

भाषायाः शिक्षणं नाम केवलं व्याकरणस्य अधिगमनमात्रं न, तदन्तर्गतानां सूत्राणां ज्ञानमपि न। भाषायाः स्वरूपस्य वैशिष्ट्यस्य अवगमनमात्रमपि न भवति। अपि तु भाषाशिक्षणं नाम श्रवण – भाषण – पठन – लेखनाख्येषु चतुर्षु अपि कौशलेषु दक्षताप्राप्तिः एव इति। एतां दक्षतां प्राप्यैव कश्चन काञ्चित् भाषां स्वाधीनां कर्तुं समर्थः भवितुं शक्नोति। अतः एतानि चत्वारि कौशलानि भाषायाः अधिगमार्थं सोपानरूपेण साहाय्यं कुर्वन्ति।

L-S-R-W = Language

श्रवणम् – भाषणम् – पठनम् – लेखनम् = भाषा

Listening - Speaking - Reading - Writing = Language

**श्रवणम्**

भाषाशिक्षणस्य प्रथमं कौशलं श्रवणम् एव वर्तते। प्राचीनकाले तु मौखिकपद्धतिः एव आसीत्। अस्माकं "श्रुतिपरम्परा" इति असकृत् प्रयुज्यमानम् अस्माभिः श्रूयते। षोडशशताब्दिपर्यन्तं

तु केवलं मौखिकपद्धत्या एव वेदाध्ययनं भवति स्म। भाषायाः ग्रहणं प्रायेण श्रवणेन एव भवति। बालकः शब्दान्, श्रुत्वा बुद्धौ स्थापयति ततः उच्चारणं करोति पुनः भावसङ्ग्रहणं कृत्वा लेखितुं समर्थः भवति। अतः सम्यक् श्रवणं समीचीनभाषणे, निर्दुष्टपठने, उत्तमलेखने च साहाय्यं करोति।

समेषां जनानां कृते मातृभाषा सरला भवति। तस्यां भाषायाम् अभिव्यक्तिः सम्यग्रूपेण कर्तुं समर्थः भवति। कारणमस्ति यत् बालकः तान् शब्दान् असकृत् केवलं श्रुत्वा एव क्रमशः सहजतया, निर्दुष्टतया, निर्भीततया स्वभावनायाः अभिव्यक्तिं कर्तुं समर्थः भवति। श्रवणकौशलस्य विकासार्थम् अध्यापकस्य भाषणक्रमे ध्वनीनां सावधानेन श्रवणं करणीयम्। बालगीतानि शिशुगीतानि च श्रोतव्यानि।

**भाषणम्**

भाषाकौशलेषु द्वितीयं स्थानं भाषणस्य विद्यते। इह जगति मानवानां स्वाभिव्यक्तिं प्रकटयितुं प्रायः सामान्यरूपेण भाषा एव माध्यमं वर्तते। भाषायाः सम्यक् विकासार्थं भाषणकौशलस्य विकासः आवश्यकं वर्तते। अतः अस्य कौशलस्य विकासः तु भाषणेन एव जायते। भाषाशिक्षणे पदानां साधूच्चारणमपि अनिवार्यं भवति। अत एव बालकेभ्यः अधिकाधिकभाषणस्य अवसरः दातव्यः। सम्भाषणशिबिरस्य आयोजनं कृत्वा भाषणस्य प्रोत्साहनं दातव्यम्। कक्षायां चित्रं प्रदर्शयित्वा तं विषयमधिकृत्य किञ्चित् भाषणस्य अवसरः दातव्यः। एतदतिरिच्य कक्ष्यायां गणनिर्माणं कृत्वा परस्परं भाषणप्रतियोगितायाः आयोजनं तथा नाटकादीनाम् अभिनयमाध्यमेन भाषणस्य अवसरः दातव्यः। अनेन अन्तर्मुखिनः छात्राः अपि बहिर्मुखिनो भवन्ति। चित्रद्वयं प्रदर्शयित्वा वाक्यरचनायाः अवसरः दातव्यः। अनेन परस्परं प्रतिस्पर्धा भविष्यति तथा छात्राणां चिन्तनकौशलस्य विकासः अपि भविष्यति। सरलकथामाध्यमेन अपि बालकानां भाषणकौशलस्य विकासः जायते।

**वाचनम्**

भाषायाः विकासार्थं वाचनकौशलस्य विकासः अपि आवश्यकः वर्तते। लिखितरूपे विद्यमानम् अंशं मनसि पठित्वा तद्गतभावग्रहणमेव वाचनमुच्यते। वाचनप्रकाराः प्रायशः निम्नलिखितरूपेण वर्तन्ते। (अ) आदर्शवाचनम् (आ) अनुकरणवाचनम् (इ) मौनवाचनम् तथा विस्तारवाचनम्। अत एव प्रारम्भिकावस्थायाम् एव शिक्षकः कक्षायां वाचनकौशलस्य विकासं कर्तुं प्रयत्नं करोति। एतद्रीत्या एतस्य कौशलस्य विकासार्थं प्रयत्नानुसारेण वर्णानामुच्चारणं स्पष्टं तथा शुद्धं भवेत्। ह्रस्वदीर्घादीनाम्, अल्पप्राणमहाप्राणादीनां साधूच्चारणे वाचनक्रमे अवधानं दातव्यम्। वाचनकौशलस्य विकासार्थं शिक्षकाणाम् आदर्शवाचनं सम्यग्रूपेण, स्पष्टं तथा शुद्धम् अवश्यमेव भवितव्यम्। त्रुटिसंशोधन – (वाक्यसंशोधनं) माध्यमेन अपि वाचनकौशलस्य विकासः भवति। आदर्शवाचनक्रमे अल्पविरामपूर्णविराम–प्रश्नार्थक–आश्चर्यवाचक–उद्धरणचिह्नानि यत्र उपयुक्तानि भवन्ति तत्र तदनुसृत्य अर्थानुसन्धानपूर्वकं वाचनं करणीयम्। छात्राणां वाचनकौशलस्य विकासार्थं शिक्षकैः आदर्शवाचनावसरे भावानुकूलां मुखाकृतिं दर्शयेत्। वाचनक्रमे भावपूर्णवाचनस्य अत्यधिकं महत्त्वमस्ति। अनेन माध्यमेन बालकः अपि तदनुसरणं वाचनाभ्यासं करोति। पाणिनिशिक्षायां पाठकस्य षड्गुणानां वर्णनं वर्तते।

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थं च षडेते पाठकाः गुणाः।।**

वाचनक्षमतायाः विकासार्थं वर्णानां स्पष्टता, पदानां स्पष्टविभाजनं, सुस्वरः, धैर्यं तथा लयबद्धता तु आवश्यकं वर्तते।

**लेखनम्**

स्वविचारस्य प्रकाशनाय लिपिम् आश्रित्य क्रियमाणः अक्षरविन्यासः एव लेखनं भवति। परन्तु अक्षरविन्यासः एव लेखनार्थं पर्याप्तं न भवति। अर्थबोधनाय वर्णानां पदानां वा सम्यक्, क्रमबद्धः, सुव्यवस्थितः समायोजनम् आवश्यकं वर्तते। लेखनकौशलस्य विकासार्थं प्रथमस्तु शिक्षकस्य लेखनं सुन्दरं भवितव्यम्। श्यामफलकस्य अधिकाधिकः प्रयोगः यदि भविष्यति तर्हि बालकाः अपि अनुसरणं करिष्यन्ति। अनेन माध्यमेन बालकानां लेखनकौशलस्य विकासः भविष्यति। बालकेभ्यः मित्रं प्रति पत्रलेखनस्य अभ्यासः, लघुनिबन्धलेखनम्, आवेदनपत्रलेखनम्, दिनचर्यालेखनम् इत्येतेषां कृते अवसरः असकृत् दातव्यः। अनेन माध्यमेन लेखनक्षमतायाः सम्यक् विकासः भवितुं शक्नोति।

# व्यक्तित्वम्

**तोतारामः** अनुक्रमाङ्कः – 813
शिक्षाशास्त्रिप्रथमवर्षः

व्यक्तित्वाय उपयुज्यमानः चमतेवदंसपजल इति शब्दः ल्याटिन् भाषायाः चमतेवदं इत्यस्य रूपान्तरं वर्तते। यस्यार्थः भवति मुखावरणम्।

व्यक्तित्वं नाम न केवलमेकः गुणः धर्मो वा अपि तु बहूनां प्रकृतिविशेषाणामधिगमक्षमतानाञ्च समुदायात् निष्पन्नः कश्चन भावविशेषः। मनोविज्ञानिभिः एतादृशाः प्रकृतिविशेषाः प्रदर्शिताः द्य उत्साहः, कारुण्यम्, स्थिरचित्तत्त्वम्, मृदुस्वभावः, मैत्री, उत्तरदायित्त्वम्, धैर्यम्, संशयशीलत्त्वम्, कल्पनालोकस्य सञ्चारित्त्वमित्यादयः गुणविशेषाः एव स्वकीयविषयभेदेन मात्राभेदेन च मानव व्यक्तित्त्वं निर्धारयन्ति।

जनाः व्यवहारे तु सर्वदा व्यक्तित्त्वशब्दात् स्थूलशरीरेण सह परिधानमपि स्वीकुर्वन्ति। व्यक्तेः सम्पूर्णव्यवहाराणां दर्शनेन स्थायिव्यवहाराणाम् आधारेण च व्यक्तेः विषये वयम् एकां धारणां मनसि निर्मामः। सा धारणा एव व्यक्तित्त्वं वर्तते। व्यक्तित्त्वं नहि जडम् अपितु गतिशीलं निरन्तरं परिवर्तमानं परिमार्ज्यं च वर्तते।

सिग्मण्ड् फ्रैड् महोदयानुसारम् – स्वमनोविश्लेषणात्मकसिद्धान्ते कृतानि कार्याणि नियन्त्रितानि भवन्ति। मनः एव निर्धारयति व्यक्तित्त्वम्। प्रैड् महोदयेन मनसः त्रिविधं साधनम् उक्तम्। येन व्यक्तिः मूलप्रवृत्तिभिः जायमानानां मानसिकसंघर्षाणां सफलतां प्राप्नोति इति।

अ) उपाहम् :– उपाहमिति जैविक–दुष्ट मूलप्रवृत्तयः सन्ति। यथा – कामुकता, असामाजिकता, आक्रमणता, अनैतिकता इत्यादयः। उपाहमिति तत्त्वेन व्यक्तिः विवेकाविवेके, सामाजिका सामाजिके, नैतिकानैतिके, उचितानुचिते च न जानाति। सर्वदा सुखमेव इच्छति।

आ) अहम् Ego – अहमिति तत्त्वं वास्तविकताम् आधृत्य भवति। अहमिति तत्त्वे चेतनाचेतनानां विषयाः विद्यन्ते।

इ) पराहम् Super Ego पराहमिति तत्त्वेन व्यक्तेः दोषाणामभावः नियन्त्रितं निर्देशितञ्च भवति। अर्थात् "नचमत म्हव द्वारा व्यक्तिः सिद्धान्तवादीनीति।

"एब्राहम् मैशलोमहोदयानुसारम्" आवश्यकता एव निर्धारयति व्यक्तेः व्यक्तित्त्वम्। महोदयेन

पञ्चस्तराणाम् आवश्यकतानां वर्णनं कृतम्। एताः आवश्यकताः पदक्रमेण व्यक्तिः प्राप्नोति।

१. जैविकीयावश्यकता
२. सुरक्षायाः आवश्यकता
३. सामाजिकतायाः आवश्यकता
४. सम्मानस्य आवश्यकता
५. आत्मानुभूतेः आवश्यकता

**व्यक्तित्त्वस्य विकासं प्रभावयन्ति कारकाणि**

व्यक्तेः सुदृढव्यक्तित्वस्य कृते आधारभूतानि कारकाणि अपि सुदृढानि भवेयुः। तदैव व्यक्तेः व्यक्तित्त्वमुभयं भवितुमर्हति।

**वंशानुक्रमस्य प्रभावः**

वंशानुक्रमः महत्त्वपूर्णकारकः अस्ति। वंशानुक्रमेणैव स्वपितृभ्यां मानसिकयोग्यता संवेगात्मक–शक्तिः, व्यावसायिकशारीरिकशक्तिः च प्राप्यते। एताः सर्वशक्तयः प्रभावयन्ति व्यक्तित्त्वम्।

**वातावरणस्य प्रभावः**

व्यक्तित्त्वस्य विकासाय अपरः महत्त्वपूर्ण कारकः भवति वातावरणम्। वातावरणम् अर्थात् समाजस्य प्रभावेण, संस्कृत्याः प्रभावेण, संगत्याः प्रभावेण च नितरां प्रभावितं सत् व्यक्तित्त्वस्य विकासे अहं भूमिकां निर्वहति।

# भारतीयशिक्षापद्धतौ परिवर्तनस्यावश्यकता

**जयश्री बारिक्** अनुक्रमाङ्कः – 814
शिक्षाशास्त्रिप्रथमवर्षः

शिक्षाक्षेत्रे यदा किमपि कार्यक्रमः अनष्ठीयते तदानीं ये ये मन्त्राः उच्चार्यन्ते ते मन्त्राः असत्यात् सत्यं प्रति, अन्धकारात् आलोकं प्रति  मरणात् अमरत्त्वं प्रति मार्गं प्रदर्शयन्ति। त एव मार्गाः शिक्षायाः मनोद्देश्यानि वर्तन्ते। परन्तु आधुनिकभारतीयशिक्षाप्रणालीं दृष्ट्वा केनाऽपि कविना आर्यभाषायां वर्ण्यते यत् –

**चलोजलाएं दीप वहां जहां अभी भी अन्धेरा हैं**
**शिक्षा पाक शिक्षा मात्रे युवजन खाएं थर्क साज**
**आजादीका स्वप्न दिखाकर पाखंण्डी करते हैं राज**
**भ्रष्ट व्यवस्था ने भी डाला अब यहां तेरा हैं।**
**चलो जलाएं दीप वहां जहां सभी भी अन्धेरा हैं।**

वयं शिक्षायाः वास्तविकं लक्ष्यं तथा शिक्षायाः फलितां शिक्षां न अवगच्छामः। वयं सर्वेऽपि पाठयामः। श्यामपट्टः स्वच्छः भवति चेत् तदा किमपि नूतनवार्तां लेखितुं सरला भवति, परन्तु श्यामपलके असमीचीना वार्ता लिखिताऽस्ति चेत् तां वार्तां निष्कास्य तत्र समीचीनां वार्तां लिखामः। तथा अस्माकं भारतवर्षे सार्धपञ्चवर्षीयं असमीचीनं पाठ्यक्रमं निष्कास्य सम्यक्पाठ्यक्रमस्य

निर्माणार्थं सम्प्रति अपि सीमितमाध्यमेन आन्दोलनं प्रचलति। तथा च न्यासमाध्यमेन कार्यशिक्षासंस्कृतेः उत्थानं आरभ्यते। अस्माकं देशशिक्षायामपि एतत् आवश्यकं वर्तते। अस्माकं शिक्षापद्धतौ एतादृश्यः विकृतयः सन्ति। एतेषां मूलकारणानि वर्षादनन्तरम् अपि प्रचलितानि वर्तन्ते।

आङ्ग्लाः अस्मान् अपश्यन् यत्– आर्याः विदेशात् आगताः द्राविडान् च निष्कासिताः। अमुं मिथ्याविषयं आङ्ग्लेयाः भारतीयानां चित्तभित्तौ संस्थाप्य तेषां कार्यं सम्पादितवन्तः। अत एव तैः शताधिकं वर्षाणि भारते राजतन्त्रं कर्तुं साध्यमभवत्। परन्तु सम्प्रति अपि एतदेव पाठ्यते। लोकमान्यतिलकप्रभृतीनां महापुरुषाणां नाम्ना बहवः संस्थाः सन्ति।

एकत्र शास्त्रीद्वितीयवर्षस्य पाठ्यक्रमे रामायणस्य पात्राणां विषये विरूपिताः वार्ताः पाठ्यन्ते। एषां सर्वासामपि वार्तानां राष्ट्रीयस्तरे – अन्ताराष्ट्रियस्तरेऽपि षड्यन्त्रेण अनुष्ठानं क्रियते। भारतस्य संस्कृतिः धर्मपरम्परा च सर्वश्रेष्ठा वर्तते। यदि रामायणस्य पात्राणां विषये विरूपितं पाठं पाठयामः चेत् देशस्य विद्यार्थिनः रामादीनां सम्माननं कथं करिष्यन्ति ? प्रायः १५० वर्षात् एतादृशाः पाठाः पाठ्यन्ते।

यदि अस्माकं देशस्य विद्यार्थिनः पृच्छामः तर्हि, भारतस्य प्रथमाङ्ग्लेय व्यवस्थापकः कः आसीत् ? प्रप्रथमः मुगल्शासकः कः आसीत् ? एतादृशानां प्रश्नानां उत्तरमपि सारल्येन उत्तरितुं प्रवृत्ताः भवन्ति। परन्तु ते चतुर्णां वेदानां नामानि अपि न जानन्ति। किमर्थम् इत्युक्ते एतादृशाः वार्ताः पाठ्यक्रमे निर्धारिताः न वर्तन्ते। एतत् भारतीयस्वाभिमानम् अपहातुं षड्यन्त्रमेवास्ति। यदा बालकानां मनसि एतदवगमनं न भविष्यति तावत्पर्यन्तम् अस्माकम् देशवासिनः संस्कारहीनाः, अशिक्षिताः एव भवन्ति। एवं चेत् ते देशस्य विषये गर्वं कथम् करिष्यन्ति ?

कस्यापि देशस्य विकाराः तस्य देशस्य शिक्षाप्रणाल्याः उपरि नकारात्मकत्त्वेन प्रभावं जनयति। किमर्थं इत्युक्ते देशस्य विकासार्थं प्रत्येकं मानवः कारणं वर्तते। तथा च देशः मानवसम्पन्मूलस्य उत्कृष्टज्ञानसंस्कारेण पाठे च पराकाष्ठां प्राप्तुं शक्यते। अद्यत्त्वे अस्माकं देशः विभिन्नाः समस्याः सम्मुखीकुर्वन्नस्ति। यथा आतङ्कवादः, भ्रष्टाचारः, क्षेत्रवादः तथा च साम्प्रदायिकता प्रमुखतया वर्तते।

सर्वकारीयविद्यालयनियमानुगुणं प्रायशः भारतवर्षे ६०% जनाः अशिक्षिताः। परन्तु एतेषु बहवः सम्यग्रूपेण स्वकीयाभिष्टानां लेहितुं न जानन्ति। अद्यतनसर्वकारीय विद्यालयीयां स्थितिं सर्वे जानन्ति। विभिन्नविद्यालयेषु हिन्दीभाषाध्यापकाः विज्ञानविषयं पाठयन्ति। समीचीनशिक्षायाः सौविध्यं नष्टं चेत् विद्यालयेषु भविष्यं कथं निर्मातुं शक्यते।

अद्यत्त्वे देशे एतादृश्याः वार्तायाः उपरि बलं दीयते यत् किं विचारयामः इति परित्यज्य कथं विचारयामः इति। विद्यालयेषु जिज्ञासाया उपरि बलं न दीयते। शिक्षकः विद्यालये यत् पाठयति तं पाठं छात्राः रटनं कुर्वन्ति। तथा एव परीक्षायां लिखन्ति। जनानां मुख्योद्देश्यं ज्ञानं प्राप्तव्यम् इति न भवति। अपितु अङ्कं प्रापणीयम् भवति। अस्माकं देशस्य गौरवार्थम् ज्ञानम् अत्यावश्यकं वर्तते। अङ्कान् सर्वे प्राप्नुवन्ति। परन्तु सम्यक् ज्ञानं कतिपयानां पार्श्वे भवति। देशेऽस्मिन् जायमान अपराध आत्महत्या इत्यादीनां मूलं कारणम् अशिक्षा एव वर्तते। शिक्षितज्ञानस्य अभावसत्त्वे एतादृशकार्यं जायते। मातृपित्रोः इच्छा भवति यत् मम पुत्रः इञ्जिनीयर भविष्यति तथा च चिकित्सकः भविष्यति इति। यदि पुत्रस्य इच्छा नास्ति चेत् किं इदं निष्फलम् – ? कदापि न कदापि .......!

# बौद्धशिक्षायाः स्वरुपम्

**यज्ञदत्त स्वाइन** अनुक्रमांकः – 815
शिक्षाशास्त्रिप्रथमवर्षः

बुद्धस्य जन्मनः आरभ्य १२०० वर्षं यावत् बौद्धशिक्षायाः कालः अङ्गीक्रियते। वैदिकशिक्षा बौद्धकाले क्षीणा सञ्जाता। वैदिकशिक्षायाः परं भारते बौद्धशिक्षायाः प्रादुर्भाव अभवत्। पूर्ववैदिककाले शिक्षा जीवनेन सह सम्बद्धा आसीत्। किन्तु शनैः शनैः शिक्षायां धर्मस्य अत्यधिकमहत्वमभवत्। वैदिककाले शिक्षायाः मुख्योद्देश्यं व्यक्तेः आध्यात्मिकविकासः आसीत्। मूलतः नारीणां शूद्राणाञ्च कृते शिक्षायाः उपेक्षाभावः प्रदर्शयन्ति। एतस्मिन् परिस्थितौ महात्मा गौतमः बौद्धधर्मस्य संस्थापनमकरोत्। महात्मबुद्धस्य जन्म कपिलवस्तु स्थाने अभवत्। एतस्य बाल्यनाम सिद्धार्थः इत्यासीत्। सिद्धार्थस्य पिता शुद्धोधनः शाक्यगणराज्यस्य अधिपतिः आसीत्। एकस्मिन् दिवसे नगरस्य भ्रमणकाले जरा, मृत्युः इत्यादीनि दृश्याणि अवलोक्य सिद्धार्थस्य अन्तःकरणे बहु दुःखम् अभवत्। तेन चिन्तितं यत् सम्पूर्णं जीवनं दुःखमयमस्ति अत एव दुःखस्य निवारणं करणीयम्। एतद् विचिन्त्यैव सः गृहस्थजीवनं परित्यज्य संन्यासीजीवनं इष्टवान्। सः शरीरेण कठोरतपः कृत्वा आत्मज्ञानं प्राप्तवान्। महात्मबुद्धः स्वप्रथमोपदेशं वाराणस्याः समीपस्थसारनाथस्थाने प्रचारितवान्।

**शिक्षायाः उद्देश्यानि**

बौद्धकालीनशिक्षा उत्तरवैदिकशिक्षायाः प्रतिक्रिया रूपासीत्, अस्मिन् काले या शिक्षा प्रचलितासीत् सा शिक्षा वैदिकशिक्षाया सदृशी आसीत्। अस्याः शिक्षायाः प्रमुखमुद्देश्यं बौद्धधर्मस्य प्रसारः प्रचारश्चास्ताम्। छात्राणां जीवने कर्तव्यपालनम्, मधुरस्वभावः शुद्धाचरणम्, पवित्रता कर्तव्यनिष्ठा च गुणाः सन्निहिताः आसन्।

- छात्राणां नैतिकचरित्रस्य निर्माणम्।
- छात्राणां व्यक्तित्त्वस्य विकासः।
- जीवनस्य कृते सन्नद्धता।
- अष्टाङ्गमार्गस्य अनुसरणम्।
- बौद्धधर्मस्य प्रचारः प्रसारश्च।

बौद्धकाले शिक्षायाः माध्यमं पालीभाषा आसीत्। अस्मिन् काले छात्रान् पाठयितुं बहवः विधयः आसन्। यथा – स्वाध्यायविधिः, अनुकरणविधिः, संवादविधिः, कक्षानायकविधिः, प्रश्नोत्तरविधिश्च। बौद्धकाले शिक्षायाम् उत्तमप्रशासनस्य व्यवस्था आसीत्।

# बुद्धिः

**रेखाराणि पात्रा** अनुक्रमाङ्कः – 816
शिक्षाशास्त्रिप्रथमवर्षः

वस्तुतः अस्मिन् संसारे यः कोऽपि जनः पूर्णरूपेण नान्यतुल्यः भवति। वर्णे, शारीरिकरचनायां, धनसम्पत्तिविषये, ज्ञाने, स्वभावे, धर्मे, वंशे इत्यादि अनेकविषयेषु व्यक्तिः अन्यस्मात् भिद्यते।

वैयक्तिकविषमतायाः बुद्धिः मुख्यकारणं विद्यत। बुद्धिभेदेन प्राणिनः भिन्नाः सन्ति। बुद्धिरेव मानवं पशुभ्यः पृथक्करोति। भारतीयदर्शने बुद्धिः प्रकृतेर्विकासस्य प्रथमं चरणमिति महत्वरूपेण निरूपितो वर्तते। बुद्धिः इत्युक्ते किम् ?

✧ क्लिष्टतमपरिवेशस्य स्वानुकूलकरणसामञ्जस्य सम्पादनात्मिका शक्तिः बुद्धिः इति Spencer महोदयेन उक्तम्।

✧ भावात्मकविचाराणामनुरूपं चिन्तनक्रियायाः योग्यता बुद्धिरिति तर्मन् महोदयेन उक्तम्।

ज्ञानार्जन क्षमता बुद्धिः वैशिष्ट्यम् – १. बुद्धिः मानवस्य योग्यता विद्यते। २. बुद्धिः जन्मजाता अस्ति। ३. स्ववातावरणेन समन्वय स्थापनयोग्यता बुद्धिः विद्यते।

प्रकाराः – बुद्धिर्नाम न केवलं एकमेव सामान्य चिन्तनं, सामर्थ्यम् अपितु बुद्धेः त्रयः प्रकाराः वर्तन्ते।

**१. अमूर्तबुद्धिः।** **२. मूर्तबुद्धिः।** **३. सामाजिक बुद्धिः।**

✧ यदा वयं मूर्त विषयेषु स्थूल विषयेषु वा कार्यं कुर्मः तदा मूर्तबुद्धेः साहाय्यं स्वीकुर्मः।

✧ सम्यक् आलोचयितुं समुचित परिष्कार मार्गम् अन्विष्य इतरेभ्यः संसूचनानि दातुं बुद्धिः उपकरोति।

✧ विभिन्न स्वभाववतां मनुष्याणां मध्ये वर्तमानं परस्परसम्बन्धं विज्ञाय तं सम्बन्धं सम्यक् अवगत्य उचितरीत्या व्यवहारप्रदर्शनं भवति सामाजिक बुद्धिः। न्यायमते बुद्धिः द्विधा वर्तते नित्या अनित्या च। ध्वंस अप्रतियोगित्वं भवति नित्यत्वम्। ध्वंस प्रतियोगित्वं भवति अनित्यत्वम्।

वेदान्तिनां मतानुसारं बुद्धिः अन्तः करणवृत्तिः विद्यते अन्तः करणस्य चत्वारः प्रकाराः सन्ति। तानि –

✧मनसः करणं भवति संशयः।

✧बुद्धेः करणं भवति निश्चयः।

✧अहङ्कारस्य करणं भवति गर्वः।

✧चित्तस्य करणं भवति स्मरणम्।

वेदान्तानुसारं बुद्धेः त्रय प्रकाराः सन्ति। तानि –

✧सात्विकी बुद्धि।

✧राजसिकी बुद्धिः।

✧तामसिकी बुद्धिः।

# शिक्षायां शिक्षकस्य स्थानम्

**समीरमेहेर** अनुक्रमाङ्कः – 817

शिक्षाशास्त्रिप्रथमवर्षः

शिक्ष् विद्योपादाने इति धातोः अजाद्यष्टाप् इति सूत्रेण टाप् प्रत्यये शिक्षा इति रुपं भवति। शिक्षा इत्युक्ते आंग्लभाषायां मकनबंजपवद इति उच्यते। E इत्युक्ते अन्तस्थः Duco इत्युक्ते बहिरानयनम्, अर्थात् अन्तस्थशक्तिनां वहिरानयनम् इति। स्वस्थशरीरे स्वस्थमनसः निर्माणमेव शिक्षा इति अरिष्टाटल् महोदयेन उक्तम् ।

समान्यतया शिक्षा त्रैविध्यं भवति। अधिगमः, प्रशिक्षणम्, अनुदेशनञ्च। शिक्षा नाम एका अजीवन प्रचलन्ती प्रक्रिया वर्तते। शिक्षा एका अधिगमप्रक्रिया वर्तते। अत्र शिक्षायाः वहवः विषयाः सन्ति। वैदिकशिक्षा, योगशिक्षा, स्त्रीशिक्षा, मूलशिक्षा इत्यादयः। पुरातनकाले शिक्षकः इति शब्दः आचार्यः, गुरुः इति पदेन व्यपदिश्यते स्म, परन्तु सम्प्रति आधुनिकयुगे शिक्षकः इति शब्दः पदवाच्यो भवति। शिक्षयति इति शिक्षकः। तर्हि शिक्षकः कथं भवेत् इति जिज्ञासायां शिक्षकः आदर्शवान्, सदाचारी, प्रामाणिकः, सुशीलः, सुविचारी, विषयज्ञाता, विधेयज्ञाता, सिद्धान्तज्ञाता, मनोविज्ञानी च भवेत्। वैदिकयुगे शिक्षकस्य स्थानम् "आचार्य देवो भवः" इति देवतूल्यं प्रतिपादितम्।

आदर्शवादे शिक्षकस्य स्थानम् अध्यापकेन विना छात्रस्य उन्नतिः असम्भवा। आत्मज्ञानार्थं अध्यापकस्य आवश्यकता नितरां वर्तते। अध्यापकः एकाधारेण मार्गनिर्देशकः भवति। प्रोबेल् महोदयः विद्यालयम् उद्यानेन, बालकं पुष्पेण तथा अध्यापकम् उद्यानपालकत्वेन तोलयति। प्रकृतिवादे शिक्षकस्य स्थानं गौणं भवति। प्रकृति एव बालकस्य उत्तमशिक्षकः इति एतेषामशयः। अत्र तु बालकः स्वयं प्रकृत्या स्वानुभवेन शिक्ष्यते। रूसो महोदयेन उक्तं यत् शिक्षकस्य स्थानं रङ्गमञ्चस्य सन्नाह सम्पादकवत् भवति। न तु स्वयं नटवत् इति।

## स्वामिविवेकानन्दस्य शैक्षिकं योगदानम्

**खुशिराम काटा** अनुक्रमांङ्कः— 818
शिक्षाशास्त्रिप्रथमवर्षः

स्वामिविवेकानन्दः भारतस्याऽऽमरासु विभूतिषु अन्यतम आसीत्। स स्वगुरुणा स्वामिरामकृष्ण— परमहंसेन प्रभावित आसीत्। तेषां गुरुणां कृपयैव स ज्ञानं तपस्तेजश्च प्राप्तवान्। भारतीयस्य वेदान्तदर्शनस्य विशिष्टं ज्ञानं स धरति स्म। वेदान्तो मानवे असीमितानां सम्भावनानां घोषणां विदधाति। अत एव मानवस्य विकासः स्वाभाविको भवति। यत्किमपि तस्यान्तः प्रदेशे वर्तते तस्यैवाभिव्यक्तिः बहिर्भवति। स्वामिनां मते प्रत्येकं मानव आत्मनि पूर्णो वर्तते। एतस्याः पूर्णताया अभिव्यक्तिः शिक्षया सम्भवति। एवं रीत्या पूर्णतायाः प्राकट्यमेव शिक्षा इति वर्तते। यस्मिन् मानवे यावत्पर्यन्तं पूर्णतायाः प्रकटनं भवति तावत्पर्यन्तमेव स शिक्षितो मनुते।

ज्ञानं हि सर्वेषामन्तस्तिष्ठति। परमेतदज्ञानेन आवृतो वर्तते। एतस्यानावरणमावश्यकं भवति। एतस्य अनावृत्तेः प्रयास एव शिक्षेति वर्तते। शिक्षैव ज्ञानस्य अभिव्यक्तिवर्तते। शिक्षा हि पूर्णतायाः प्रकटीकरणस्य प्रक्रिया नाम। स्वामिववेकानन्द आन्तरिके बाह्ये च जीवने अभेदं मनुते स्म। यतो हि बाह्यस्त्वन्तर्जीवनस्यैव अभिव्यक्तिर्वर्तते। अत एव स्वामिविवेकानन्दः श्रद्धया ज्ञानेन सेवाभावनया च अन्तर्जीवनस्य सन्तृप्तिं कामयते स्म। सः सामाजिकानां प्राकृतिकानाञ्च विज्ञानानाम् अध्ययनेन बाह्यजीवनस्य विकासस्य विस्तारस्य चापि प्रबलः समर्थकः आसीत्। सः उपनिषदां परायाः अपरायाश्च विद्यायाः प्रसारणं वाञ्छति स्म।

स्वामिविवेकानन्दः सर्वानेव जनान् प्रभोः सन्ततिं मनुते स्म। ये सन्ति शिक्षायाः विकासेभ्यश्च

वञ्चितास्तेषां विकासाय कृतभूरिपरिश्रमाः आसन्। सेवाव्रतं सः सर्वदा पालितवान्। सत्संस्कारैर्निमितं सच्चारित्र्यवन्तं जनमेव स सुशिक्षितं मनुते स्म। सः शिक्षायाः प्रमुखमुद्देश्यं मानवनिर्मितमेव पक्षं स्वीकरोति स्म। सः पुस्तकीयं ज्ञानमात्रमेव शिक्षेति न मन्वते स्म। शिक्षया सः स्वातन्त्र्यस्य विकासं वाञ्छति स्म। तन्मते शिक्षयैव जनः स्वकीयानां सकलानां समस्यानां समाधानं कर्तुं प्रभवति।

स्वामिविवेकानन्द अध्यात्मसमन्वितस्य पाश्चात्यज्ञानस्य समर्थक आसीत्। स भारते परिव्याप्तानां समस्यानां समाधानाय यथासम्भवं प्रयासं कृतवान्। स संस्कृतभाषायाः शिक्षणम् आवश्यकं मनुते स्म। यतो ह्येतस्मिन् अस्माकं संस्कृतिर्निहिता वर्तते। शिक्षायाः माध्यमरूपेण स मातृभाषायाः शिक्षणं वाञ्छति स्म। एवं स्वामिना प्रतिपादिता पाठ्यचर्चा आध्यात्मिकी, लौकिकी, कलात्मिका, रुचिकरा, व्यावहारिकदृष्ट्या चोपयोगिनी वर्तते। एतादृशी पाठ्यचर्या 'समग्रा' इति वक्तुं शक्यते।

ज्ञानार्जनाय स्वामिविवेकानन्दो विविधानां मनोवैज्ञानिकानां शिक्षणविधीनां प्रयोगस्य पक्षपाती आसीत्। एकाग्रतां प्रतिपादयता तेन स्वाध्यायचिन्तनम्, मननम्, व्याख्यानम्, प्रश्नोत्तरम्, पर्यटन–प्रभृतिविधयः सर्वथोपयुक्तत्त्वेन स्वीकृताः। स्वामिना प्रतिपादितानां शिक्षणविधीनामनुप्रयोगो वर्तमानासु शिक्षणसंस्थास्वपि प्राचुर्येण क्रियते।

# शिक्षायाः स्वरूपम्

**संजीव प्रधान** अनुक्रमांङ्कः – 819
शिक्षाशास्त्रिप्रथमवर्षः

शिक्ष विद्योपादाने इति धातोः "अजाद्यतष्टाप्" इत्यनेन टाप् प्रत्यये कृते शिक्षा इति रूपं निष्पद्यते। शिक्षा इत्यस्य शिक्षणम् अथवा अध्ययनम् इत्यर्थः। आङ्गलभाषायां Education इत्ययं शब्दः शिक्षायाः अर्थे प्रयुज्यमानः वर्तते। अयं शब्दः ल्याटिन् भाषायाः अधोलिखितमूलशब्देभ्यः निष्पन्नो वर्तते। यथा –

1. Educare  2. Educere  3. Educatum  4. Educates  5. Educatio

**समाजशास्त्रम्**

मानवानां समूहः समाजः तत्संबद्धं शास्त्रं समाजशास्त्रमिति।

परिभाषाः – शैक्षिकप्रणाल्याः वैज्ञानिकविश्लेषणमेव शिक्षासमाजशास्त्रमिति वुकोवर्येण उक्तम्।

शिक्षासमाजशास्त्रस्य विकासः – शिक्षासमाजशास्त्रे बालकस्य राजनैतिक – सामाजिक – आर्थिक विकासश्च भवति।

**राजनैतिकविकासः**

शिक्षा समाजे राजनैतिकविकासे च महत्वपूर्णं योगदानं ददाति। सर्वदा एतत् ध्यातव्यं यत् मानवानां सांसारिकाणां विभिन्नराजनैतिकविचारधाराणां च ज्ञानं शिक्षामाध्यमेन संभवति। शिक्षायाः साहाय्येन मनुष्यः स्वीयदेशस्य राजनैतिकविचारधारान् अपरदेशस्य राजनैतिक– जागरूकतां च

प्रसारयति। तथैव व्यक्तिः स्वीयकर्तव्यानाम् अधिकाराणाञ्च ज्ञानं प्राप्नोति। ये जनाः शिक्षिताः भवन्ति ते एव राजनैतिकविचारधारायाः रक्षणे विकासकरणे च समर्थाः भवन्ति। अत्र स्पष्टं भवति यत् शिक्षा समाजस्य राजनैतिकविकासं करोति।

**आर्थिकविकासः**

शिक्षा समाजस्य आर्थिकविकासं करोति। एतस्य कार्यस्य संपूरणार्थं शिक्षा स्वक्रिया व्यवसायिकोद्देश्यम् अधिकृत्य अग्रसर भवति। शिक्षा बालकेभ्यः व्यवसायोद्योगेषु दक्षताम् प्रददाति। फलस्वरूपं च बालकः स्वीययोग्यतानुगुणं विभिन्नक्षेत्रेषु उत्पादनेन समाजस्य आर्थिकं विकासं करोति।

**सामाजिकविकासः**

शिक्षा सामाजिकविकासं करोति। एषा वार्ता मनसि ध्यातव्या यत् समाजः शिक्षायाः व्यवस्था केवलम्। बालकः समाजस्य प्रचलितान् नियमान् सिद्धान्तान् च कथम् अनुसरेत् इति जानीयात्। किञ्च सः बालकः एतदपि इच्छति यत् सः शिक्षितः भूत्वा सामाजिककृतीनां ज्ञानं प्राप्नुयात्। तस्याः आलोचना कर्तव्या तथा च आवश्यकतानुसारं सुधारणमपि कर्तव्यं येन समाजः उचितदिशि प्रति विकसितो भवति।

## भाषा

**भुवनेश्वरदासः** अनुक्रमाङ्कः – 820
शिक्षाशास्त्रिप्रथमवर्षः

भाषणात् भाषा। भाषव्यक्तायां वाचि इत्यस्मात् धातोः गुरोश्च हलः इति सूत्रेण अ प्रत्यये कृते भाषा इति पदं निष्पन्नं भवति। भाषाशब्दस्य आन्लभाषायां संदहनंहम इति पदं समानार्थकं भवति। language इति पदं लाटिन् भाषायाः सपदहनं इति पदात् सिद्धं , यस्य अर्थः भवति जिह्वा।

**आहारनिद्राभयमैथुनं च समानमेतत् पशुभिर्नराणाम्।**
**भाषा हि तेषामधिको विशेषःभाषाविहीनाः पशुभिः समानाः।।**

मानवस्य यथा जलभोजनादिकम् आवश्यकं तथैव भाषणमपि अतीव आवश्यकम्। अत एव सम्भाषणाय प्रधानविषयाः न भवन्ति चेदपि अप्रधानान् विषयान् आश्रित्य, अधिकृत्य वा सम्भाषते मानवः।

**भाषापरिभाषाः**

१) डा. वी.पी.गुणेमहोदय अकथयत् यत् – language in its widest sense means, therefore the sum total of such sings of our thoughts and feelings as are capable of external perception and as could be produced and repeated at will.

२) भाषा, अर्थसहितध्वनिप्रतीकानां तादृशी व्यवस्था – यथा प्रयोक्ता श्रोता च परस्परं विचाराणाम् आदानप्रदानं कुरुतः।

**भाषाप्रयोजनानि**

भाषाप्रयोजनानि द्विप्रकारकाणि – 'सामाजिकम्। 'वैयक्तिकम्।

१) सामाजिकम् – सामाजिककार्यसम्पादने भाषा एकं मुख्यं दृष्टं च साधनम्। समाजः परम्परानुगतम् इतिहासं, संस्कृतिं च भाविसमाजं प्रापयति।

२) वैयक्तिकम् – इदं पुनः द्विप्रकारकम्। साङ्केतिकप्रयोजनम्, उद्दीपनप्रयोजनम्।

(अ) साङ्केतिकप्रयोजनम् – अक्षराणि, पदानि च सङ्केताः इति वक्तुं शक्यन्ते। अस्मिन् प्रयोजने केवलं ज्ञानप्राप्तिरेव परं – प्रयोजनम्। न तु आनन्दप्राप्तिः।

(आ) उद्दीपनप्रयोजनम् – कवित्वादिसारस्वतकलासु उद्दीपनस्य महत्वपूर्णं स्थानं वरीवर्ति। सहृदय–हृदयगम्यं साहित्यं, कला च सर्वेषां मनांसि रञ्जयित्वा रसनिष्पत्ते हेतुः भवति। भाषायाः परमं प्रयोजनं भवति भावविनिमयः, अर्थात् भावग्रहणं भावाविष्कारणञ्च। भाषाप्रयोजनानि एवं प्रकारेण संक्षेप्तुं शक्नुमः –

- भावग्रहणं, भावाभिव्यक्तिकरणं च करोति।
- चिन्तनशक्तिं वर्धयति।
- मनोभावनायाः रुपं कल्पयति।
- व्यवहारज्ञानं सम्पादयति।
- व्यक्तित्वं विकासयति।
- संस्कृतिं सभ्यतां च परिरक्षति च।

## शिक्षामनोविज्ञानस्य आवश्यकता प्रयोजनश्च

**प्रशान्तः** अनुक्रमाङ्कः – 821
शिक्षाशास्त्रिप्रथमवर्षः

आधुनिकयुगे शिक्षामनोविज्ञानस्य विकासः भूयोभूयः दरीदृश्यते। शिक्षायाः सम्प्रत्यये, शिक्षायाः उद्देश्यानां पाठ्यक्रमस्य च निर्णये, शिक्षणपद्धतीनाम् उपकरणानाञ्च चयने, शिक्षाक्षेत्रसम्बद्धानां सर्वसमस्यानां वैज्ञानिकपरिष्कारे शिक्षामनोविज्ञानम् अत्यन्तमुपकरोति। फलतः बालकेन्द्रितशिक्षा, प्रौढशिक्षा, साकल्यसशिक्षा, विशिष्टशिक्षा, मार्गदर्शनं, मन्त्रणम्, मापनं, मूल्याङ्कनम् इत्यादिविषयैः शिक्षाक्षेत्रस्य दिशानिर्देशं करोति शिक्षामनोविज्ञानम्। सम्प्रति प्राथमिकशिक्षातः उच्चशिक्षापर्यन्तम् अस्य प्रयोगः क्रियते। शिक्षाक्षेत्रेण सह सम्बद्धेभ्यः सर्वेभ्यः जनेभ्यः शिक्षामनोविज्ञानम् अत्यन्तमुपकरोति। तद्यथा –

**शिक्षकाय मनोविज्ञानस्य आवश्यकता**

विद्यालये शिक्षकः अनेकानि कार्याणि निर्वहति। कक्ष्याशिक्षणात् अतिरिच्य साहित्यिकस्पर्धाः, क्रीडास्पर्धाः, ललितकलाः इत्यादि कार्यक्रमान् निर्वहति। सर्वेष्वेतेषु कार्येषु तस्मै शिक्षामनोविज्ञानम् अत्यन्तमुपयोगी भवति। यथा –

**1. शिक्षाप्रकियायाः अवगमनम्**

विविधाः दार्शनिकाः, समाजशास्त्रिणः, राजनीतिज्ञाः, अर्थशास्त्रिणः शिक्षायाः स्वरूपस्वभावानां विषये स्वीयाभिमतानि अवोचन्। शिक्षामनोविज्ञाने शिक्षाक्षेत्रस्य वैज्ञानिकरीत्या विश्लेषणं व्याख्यानञ्च क्रियते। एतेन अध्यापकाः शिक्षायाः स्वरूपभावान् ज्ञातुं शक्नुवन्ति।

**2. पाठ्यक्रमस्य निर्माणम्**

शिक्षामनोविज्ञाने पाठ्यक्रमनिर्माणस्य सिद्धान्ताः प्रतिपादिताः। अनेन बालकस्य शारिरिक–मानसिकसामर्थ्यानि ज्ञात्वा शिक्षोद्देश्यानामाधारेण योग्यपाठ्यक्रमस्य निर्माणं विकासं च कर्तुं शक्यते।

**3. शिक्षणाधिगमपद्धतीनाम् उपकरणानाञ्च चयनम्**

शिक्षामनोविज्ञाने शिक्षणाधिगमयोः नियमाः, सिद्धान्ताः, सूत्राणि च सविस्तरं प्रतिपादिताः। एतेषामाधारेण शिक्षाशास्त्रिणः विविधशिक्षापद्धतीनां विकासमकुर्वन्। कस्यचिद्विषयस्य अध्यापने योग्यपद्धत्याः उपकरणानाञ्च चयने शिक्षकाय साहाय्यमाचरति शिक्षामनोविज्ञानम्।

**4. अध्येतुः (छात्रस्य) अवगमनम्**

सम्प्रति शिक्षा बालकेन्द्रिता वर्तते। अतः शिक्षकः प्रत्येकं छात्रस्य इच्छाः, अभिरूचयः अभिवृत्तयः सामर्थ्यानि न्यूनताश्च जानीयात्। तस्य शारिरिकमानसिकस्वास्थ्यम्, सामूहिकव्यवहारः, अभिप्रेरणस्तरः इत्यादीन् ज्ञातुं मनोविज्ञानं सहकरोति।

**5. विशिष्टबालकानाम् अभिज्ञानम्**

यद्यपि कक्ष्यायां छात्राः प्रायः समवयस्काः भवन्ति, तथापि तेषु वैयक्तिकविभेदाः भवन्ति। कक्ष्यायां प्रतिभावन्तः (Gifted) पराङ्मुखाः (Backward), मन्दबुद्धयः (Mantally retarded), विकलाङ्गाः (Handicapped), वञ्चिताः (Deprived), विषमयोजिताः (Maladjusted), अपराधिनश्च (delinquent) छात्राः भवेयुः। अध्यापकः एतानभिज्ञाय, तेषां समस्यानां कारणानि अन्विष्य निवारणोपायान् चिन्तयेत्। तदर्थं शिक्षामनोविज्ञानं साहाय्यमाचरति।

**6. शिक्षकस्य व्यक्तित्वविकासः**

शिक्षकः मनोविज्ञानस्य साहाय्येन स्वकक्ष्याकार्याणां मूल्याङ्कनं स्वयं कर्तुं शक्नोति। एतेन सः स्वस्य गुणदोषविवेचनं कृत्वा स्वव्यवहारे परिवर्तनमानेतुं शक्नोति। सेवापूर्व–सेवारत–प्रशिक्षणकार्यक्रमैः शिक्षके वृत्तीयकौशलानां विकासः संभवति। न केवलं शिक्षकेभ्यः, अपि तु शिक्षाक्षेत्रेण सह सम्बद्धसर्वव्यक्तिभ्यः तत्कार्येषु शिक्षामनोविज्ञानस्य महद्योगदानं वर्तते।

## Genesis of Modern Science in Sanskrit

**Sri Sudarshan Bhat** Roll No - 822
S. S. Ist Year

The term modern science is very difficult to define. We all know science. Science is the systematic body of knowledge. If it is a systematic body of knowledge how can we

say there is modern and old science, because science points out the truth of the universe. Truth is always beyond temporal limitation. So we cannot make any difference between modern and old science because science is eternal.

Sanskrit is a rich language and the language itself scientific. The main aim of Sanskrit language is to unearth the four values of human beings known as purusharthas dharma, artha, kama, moksha. It always highlights on the right knowledge.

What is the right knowledge? Right knowledge is the knowledge where it understands the thing as it is. So in the knowledge system four points are very important. They are:

- One is the means of knowledge, which is known as pramana.
- The object of the knowledge, which is known as prameya .
- The possession of the knowledge, which is pramata.
- The knowledge itself, which is known as prama.

So the shastraic texts and the Vedic texts try to understand each and every aspect of knowledge. This is scientific analysis of the universe. The modern science any how addresses technology. Technology may be modern but never the science becomes modern because it is eternal. The modern science as we say identify the water as $H^2O$ in which two molecules of hydrogen and one molecule of oxygen makes water. This is the modern invention but origin of this truth is already mentioned in the Vedas:

In the Veda we hear "अग्निषोमौभिभ्रत्याप:" in a flavor language they have invited the different aspect of the water अग्नि refers to the oxygen and षोम refers to the hydrogen. And अग्नियागर्भन्धदिरे directly refers to where the fire is hidden in the water and it identifies "light "or electricity as अभिन्धनम् दिव्यम् विद्युदादि " in *Tarkasangraha*. अप् is the water इन्ध नम् is the fuel so the electricity is invented in the Veda and to which, we refer to modern science. The gravitational power is invented in the modern science. It is recognized as the third law of the Newton but the Vaisheshika directly refers to the gravitational power as गुरुत्वाकर्षणा defined आद्यपतन असमवायि कारणम् गुरुत्त्वम्. And if we go in deep ''तैत्तिरीयोपनिषत्' ''एको अश्वो वहति सप्तनाम'' "this sentence focus on the invention of sunrays.

Likewise Sanskrit itself is abundant treasure of knowledge. In that, it has veritable sources of science.

# Technology In Education

**Raghavendra Danageri** Roll No - 823
S. S. I$^{st}$ Year

In the world that we currently live in, technology is a very vital factor. With each passing day a new software or gadget is being brought into the market that serves to

improve our lives in one way or another and make it much easier and also to advance an already existing software or gadget. Howeverit is important to note that despite the fact that technology plays a big role in making our lives easier, it is not the only role it has.

Technology is increasingly growing its importance in the education sector.The more technology advances, the more benefits it provides for students at every education level.

**Ten fundamental reasons for technology in education**

**01.Expansion of time and place**

In a typical high school a student has access to a teacher 40 minutes per day. That means he has access to that teacher 5% of his/her waking day and even that time is shared with 25 classmates. He has access to the internet 100% of the time. Technology is so substitute for an inspiring teacher. However, online materials are far more available. Twenty times more using the "textbook plus classroom" approach, the places where learning can occur are limited. On the other hand, a wireless laptop has access to the teachers' course materials and the entire internet almost anywhere. This technology allows learning anywhere, anytime, not just in one particular classroom for 40 minutes a day.

**02. Depth of understanding**

Interactive simulations and illustrations can produce a much greater depth of understanding of a concept. When visual manipulatives are used in a classroom setting they can go far beyond chalk and talk. Using a projector, the teacher can conduct onscreen investigations and demonstrate concepts far more easily than with just words and arm waving.

Because the students have access to the same tools over the web, they can reinforce the ideas by experimenting with the simulations themselves, anytime, anywhere.

**03. Learning and teaching**

Technology allows the tables to be turned. Instead of teaching, students can be given projects that require them to necessary material themselves. Key to this the ability to get the information they need anytime, anywhere, without being in the physical presence of a teacher. This project based pull approach makes learning far more interesting for the students.

**04. New media for self expression**

In the old days, students could write in a notebook, and what they wrote was seen only by the teacher. Using technology they can make a power point presentation , record/ edit spoken word, do digital photography ,make a video, run a class newspaper, run a web based school radio or TV station, do acdamations, compose digital music on a synthesizer ,make a website ,create a blog. Students learn best when they create things, not when they just consume information.

**05. Collaboration**

A vital skill in the new digital era is the ability to work collaboratively on projects with others who may not be physically close. This can be done using modern computer tools such as the web, email, instant messaging and cell phone. Rather than labouring alone

on homework, students can work in small groups wherever they happen to be and at anytime. Many university projects are undertaken by teams spread around the world.

**06.Going global**

The worldview of the student can be expanded because of the zero cost of communicating with other people around the globe. The internet permits free video conferencing which permits interaction in real time with sister schools in other countries. From an educational viewpoint, what could be more important than understanding other cultures through direct dialog and collaboration.

**07.Individual pacing and sequence**

Students are of course, all different. Information technologies can permit them to break step with the class and go at a pace and order that suits that student better.Without disrupting the class , they can repeat difficult lessons and explore what they find interesting. With time, it will become more like having a private tutor rather than being lost in a large class.

**08.Weight**

Four textbooks and three binders easily weight over 15 kg. A laptop computer weights about 3kg and provides access to infinitely more material via its own storage and the internet. A 40gb hard drive can hold 2 million pages with illustrations ; the web is unfathomably large. Right now, students are getting back injuries lugging around a tiny subset of what they need on 15kg of paper and it's just static, boring text.

**09.Personal productivity**

Students need productivity tools for the same reasons they need to write, read, communicate, organize, and schedule .A student's life is not much different from any knowledge worker and they need similar tools. Even if they are never used in the classroom, computers and smart phones will make a student's life more effective.

**10.Lower cost**

In community colleges ,where books are purchased by the student, they can cost more than the tuition itself. Though the use of open, free education tools on the web, the dependence on expensive paper text books can be reduced. There is a growing movement to create and publish this type of material through Organizations such as OER commons.OER means Open Educational Resources and the idea is to follow the open source model made popular by software projects such as Linux. Material is created by the educational community itself then freely shared.

**For example**: One memory card prize is Rs 450/- equal to one book. We stores lot of books in that card.

If education is about knowledge and intellectual skills, then information technology lies at the heart of it all...

# स्वामिविवेकानन्दस्य शैक्षिकविचाराः

**गणपतिभट्टः** अनुक्रमाङ्कः – 824
शिक्षाशास्त्रिप्रथमवर्षः

"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति ईशावास्योऽपनिषदुक्तिः। भारतीयाः पूर्वमनीषिणः प्रत्येकमपि मनुष्यस्य विद्यायाः आवश्यकता कीदृशी अस्ति इति जानन्तः विद्याविषये बहुधा बहुत्र प्रावोचन्। अत एव भारतस्य प्राचीनेषु सर्वप्रकारेषु सन्दर्भेषु शिक्षायाः महत्त्वं दरीदृश्यते। शिक्षैव मनुष्ये मनुष्यत्त्वं सम्यक् संस्थापयति नैतिकबलं च ददाति। तस्मिन् उन्नतविचारानपि जनयति। अतः सर्वस्यापि मूला भवति शिक्षा। विषयममुं सम्यक् जानन्तः अस्माकं पूर्वर्षयः उत्तरकालीनाः प्रायशः सर्वेऽपि सर्वान् अपि विद्याप्रकारान् शिक्षायामेव अन्तर्भावम् अकार्षुः। अतः शिक्षेयं नूनं दर्शनपदमधितिष्ठते इत्यत्र नास्ति संशयलेशः।

तादृशेषु भारतीयपूर्वपण्डितेषु शिक्षां प्रतिपादितेषु अग्रगण्याः भवन्ति स्वामिविवेकानन्दवर्याः। तेषां मते शिक्षा इत्युक्ते भारतीयो वेदान्तः एवं उपनिषत् च। ते एवं उक्तवन्तः "मानवान्तर्निहितपूर्णतायाः दैवात्माभिव्यक्तिरेव शिक्षा"। इत्युक्ते उपनिषत्सु श्रूयमाणं यत् आत्मज्ञानं वर्तते तदेव निरूपितवन्तः। स्वामिवर्याणाम् अयं विश्वासः यत् सर्वप्रकारकं सामान्याध्यात्मिकं ज्ञानं मानवस्य मनसि भवति। एतस्य आच्छादनम् यदि निष्कासयामः तदानीं वक्तुं शक्यते अस्य अधिगमः जातः इति। तेषामनुसारं काचित् व्यक्तिः अपरां व्यक्तिं न शिक्षयति। अपि तु तस्य स्वयमेवाधिगमः भवति। बहिस्थः शिक्षकः केवलं प्रस्तुतिं करोति (बोधयति) येन आन्तरिकशिक्षकम् अधिगन्तुं प्रेरणा लभ्यते। तेषां समये या शिक्षा आसीत् तां शिक्षां ते तिरस्कृतवन्तः। एवं उक्तमपि केवलं पुस्तकीयं ज्ञानं व्यर्थं भवति। अस्माकं कृते तादृशी शिक्षा आवश्यकी – "यथा चारित्र्यनिर्माणं जायते मस्तिष्कस्य शक्तिः वृद्धिः भवति, बुद्धिः विकसिता जायते, यां शिक्षां प्राप्य व्यक्तिः स्वावलम्बिनी भवेत्" इति। उपर्युक्तविवेचनेन स्पष्टं भवति यत् स्वामिवर्याणां शिक्षायाम् अत्यन्तं विस्तृतं दृष्टिकोणमासीत् इति। ते भारतस्य स्वातन्त्र्यानन्तरम् अत्रत्यनागरिकान्, पाश्चात्यशास्त्राणां च अध्ययनं कारयित्वा तान्त्रिकशिक्षायाः ज्मबीदवसवहल व्यवस्था अपि कल्पनीया इति अवदन्। तस्मात् उद्योगाः विकसिताः भवन्ति। पुनश्च अस्माकं देशः धनधान्येन परिपूर्णः भविष्यति। अस्मिन् अवसरे ते भारतीयजनान् काले काले उपदेशं एवं कृतवन्तः यथा – कार्यस्य प्रत्येकमपि क्षेत्रं व्यवहारिकं भवेत् सिद्धान्ते एव भवति चेत् सम्पूर्णं देशं नश्यतीति।

स्वामिवर्यः शारीरिक–मानसिक–नैतिक–आध्यात्मिकविकासार्थं चारित्र्यनिर्माण – आत्मविश्वास – श्रद्धा–आत्मत्यागभावनासु च बलं दत्वा उक्तवन्तः "उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत" इति। तेषाम् अनुसारं धार्मिकविकास एव शिक्षायाः प्रमुखम् उद्देश्यं वर्तते। ते मनसः पुनश्च हृदयस्य प्रशिक्षणे बलं दत्तवन्तः। एवं यया शिक्षया बालकस्य जीवनं पवित्रं भवेत्, तादृशी शिक्षा देया। एतदर्थं समाजसेवा कार्या। अपि च महापुरुषाणाम् एवं महर्षिणाम् अनुकरणाय आदर्शाणां स्वायत्तीकरणाय तस्मिन् क्षमता च उत्पादनीया। जीवनस्य परमं लक्ष्यं भवति आध्यात्मिकविकासः। शिक्षकस्य विषये एते वदन्ति यत् शिक्षकः दार्शनिकः मित्रम् एवं पथदर्शकः वर्तते, यः बालकं अग्रे

सर्तुं साहाय्यं करोति। रवीन्द्रनाथठागोरवर्येणापि उक्तं "यदि भवन्तः आत्मानं ज्ञातुमिच्छन्ति तर्हि विवेकानन्दं पठन्तु" इति। अनेन वाक्येन अवगन्तुं शक्यते यत् तेषां ज्ञानं कीदृशमासीत् इति।

स्वामिविवेकानन्दवर्याणां शिक्षादर्शने प्रकृतिवादः आदर्शवादः, एवं प्रयोजनवादः इत्यादि दार्शनिकविचारधारणां अन्तर्भावः वर्तते। ते हृदयेन आदर्शवादिनः आसन्। स्वामिवर्याः सर्वप्रथमं आध्यात्मिकविकासाय द्वितीयस्तरे भोजनादि समस्यानां निवारणाय बलं दत्तवन्तः। आहत्य तैः पूर्वपाश्चात्यशैक्षिकविचाराः ये निरूपिताः सन्ति ते अद्यापि जगति मान्याः सन्ति। अत एव विवेकानन्दवर्याः अपि प्रातस्मरणीयाः अभूवन्।

# अभिवृद्धिः विकासश्च

**रूपेश महान्त** अनुक्रमाङ्कः – 825
शिक्षाशास्त्रिप्रथमवर्षः

मानवानां विकासस्य अध्ययनं मनोविज्ञानस्य महत्वपूर्णमङ्गं वर्तते। कुशलः अध्यापकः बालकस्य शारीरिक – मानसिकविकासावस्थाः, तासां विशेषतानां विषये अवश्यं जानीयात्। एतेन सः शिक्षाक्षेत्रे विभिन्नकार्याणां योजनानाञ्च कार्यान्वयनं समर्थतया कर्तुमर्हति। अभिवृद्धिविकासयोः प्रक्रिया व्यक्तेः गर्भाधानात् मरणपर्यन्तं निरन्तरं प्रचलति। तत्र विविधावस्थाः सन्ति। सामन्यतः अभिवृद्धिः – विकासशब्दयोः प्रयोगः पर्यायत्वेन क्रियते। परन्तु तत्र परिमाणात्मकपरिवर्तनं अभिवृद्धिः इति। गुणात्मकपरिवर्तनं विकासः इति सामान्यतः वक्तुं शक्यते।

**अभिवृद्धेः अर्थः**

मानवस्य जन्मतः प्रौढावस्थापर्यन्तं शारीरिकाङ्गेषु जायमानपरिवर्तनमेव अभिवृद्धिः (Growth) इति वक्तुं शक्यते। अत्र हस्तपादाः, शिरः, उदरम् इत्यादिबाह्यावयवानां, हृदयं, जीर्णाशयः, मस्तिष्कम्, नाडीमण्डलम् इत्याद्यन्तरवयवानाञ्च वृद्धिरप्यन्तर्भवति। सामान्यः जीवे कोशीयवृद्धिः अभिवृद्धि इति कथ्यते। विभिनोपकरणैः बाह्यावयवानाम् मापनं कर्तुं शक्यते। अतः अभिवृद्धिः केवलं शारीरिकी भवति। प्रारम्भावस्थायाम् इयमत्यन्तं वेगेन भवति। स्त्रीषु २० वर्षपर्यन्तम् अभिवृद्धिः सम्भवति।

**विकासस्य अर्थः**

व्यक्तौ जायमानानि समस्तपरिवर्तनानि विकासः इति वक्तुं शक्यते। अत्र शारीरिक – मानसिक – सामाजिक – साम्वेगिक – संज्ञानात्मक – नैतिकपरिवर्तनादीनि अन्तर्भवन्ति। अतः अभिवृद्धेः अपेक्षया विकासः इति अस्य भावना व्यापकः वर्तते। अभिवृद्धिस्तु विकासस्य एकमङ्गं वर्तते। शरीरस्य विभिन्नसंरचनानां तथा कर्याणां संगठनात्मिका संकीर्णप्रक्रियैव विकासः इति वक्तुं शक्यते। अतः विकासस्य विविधपक्षाणां मापनं मूल्याङ्कनञ्च कठिनतरं भवति। विकासः शारीरिकपरिवर्तनानि, तैः उत्पन्नमनोवैज्ञानिकप्रक्रियानां मध्ये समन्वयं संपाद्य व्यक्तौ नूतनसामर्थ्यानां विकासं करोति।

**अभिवृद्धिविकासयोः भेदः**

| अभिवृद्धिः | विकासः |
|---|---|
| 1. व्यक्तौ जायामानपरिमाणात्मकवृद्धिः अभिवृद्धिः इति कथ्यते। यथा–भारः, स्थौल्यम्, औन्नत्यम् इत्यादयः। | 1. व्यक्तौ जायमानानि समस्तपरिवर्तनानि विकासः इति कथ्यते। यथा – बालकस्य कार्यक्षमता, व्यवहारः इत्यादिषु प्रगतिः। |
| 2. अभिवृद्धिः शरीरस्य बाह्यान्तरिकावयवेषु सीमिता वर्तते। | 2. विकासः अतिविस्तृतभावना वर्तते। अस्मिन् शारीरिकवृद्धिः अपि अन्तर्भवति। |
| 3. अभिवृद्धिः परिपक्वतापर्यन्तं भवति। बालिकाः २० तमे वयसि, बालकाः २२ तमे वयसि च परिपक्वतां प्राप्नुवन्ति। | 3. विकासः अतिविस्तृतभावना वर्तते। विकासः जन्मतः मरणपर्यन्तं प्रचति। |
| 4. अभिवृद्ध्या जायमानपरिवर्तनं विशेषप्रयत्नं विनैव दृष्टिगोचरः भवति। अतः एतस्य मापनं सरलतया कर्तुं शक्यते। | 4. विकासे कार्यक्षमता, कार्यकुशलता इत्यादि–गुणात्मकपरिवर्तनानि भवन्ति। एतानि दृष्टि–गोचराणि न भवन्ति। अतः एतेषां मापनं कठिनतरं वर्तते। |
| 5. अभिवृद्ध्या साकं सर्वदा विकासः भवतीति वक्तुं न शक्यते। यथा – शारीरिकवृद्ध्या व्यक्तिः स्थूलः भवति चेत् तस्य शारीरिकसामर्थ्यानि न्यूनानि भवन्ति। | 5. विकासेन साकं सर्वदा अभिवृद्धिः भवतीति वक्तुं न शक्यते। यथा – केषुचित् बालकेषु शारीरिकवृद्धिः स्थगिता भवति, परन्तु तेषां सामाजिक–मानसिक–सांवेगिक–विकासेषु प्रगतिः दृश्यते। |

इत्थमेतावुभौ जन्मतः मरणपर्यन्तं निरन्तरं प्रचलतः। व्यक्तेः प्रारम्भावस्थासु शारीरिकवृद्धिः वेगेन संभवति। ततः परं व्यक्तेः विकासे प्रगतिः अवलोक्यते। शारीरिकवृद्धेः प्रभावः विकासे भवति। यथा – षण्मासात्मकशिशुः धावितुं न शक्नोति यतः तस्मिन् धावनानुकूलरीत्या शारीरिकाङ्गानां विकासः नैव जातः। कदाचित् विकासस्य विविधपक्षाणां प्रभावः शारीरिकवृद्धावपि भवति । अतः एव अभिवृद्धिविकासयोः परस्परं परिपूरकौ इति वक्तुं शक्नुमः।

## बालस्य पुरतः परिसरः

**रामकृष्ण गांव्कर** अनुक्रमाङ्कः – 826
शिक्षाशास्त्रिप्रथमवर्षः

वयं जानिमः बालाः अनुकरणशीलाः इति। यथा बालस्य पुरतः परिसरः भवति तथा एव बालः विकासं प्राप्नोति। नवजातशिशुः यं कमपि विषयं पूर्वं न जानाति। तदर्थमेव छात्राः (बालाः) देवसमानाः इति सज्जनाः वदन्ति। बालः पूर्वं परिवारे अनौपचारिकीशिक्षां प्राप्नोति। तत्र गृहे यथा वातावरणं भवति तदनुगुणं तान् दृष्ट्वा अनुकरणं कृत्वा शिक्षणं प्राप्नोति। गृहजनाः सज्जनाः तथा

च उत्तम संस्कारवन्तः चेत्तादृशी बुद्धिः बालस्य भवति।

**"काचः काञ्चनसंसर्गात् धत्ते मारकतीं द्युतिम्"**

एतद्वाक्यं हितोऽपदेशे उक्तमस्ति। अस्यार्थः काचः काञ्चन संसर्गात् मरकतमणिः इव दृश्यते इति। तथा एव उत्तमस्य परिवारस्य संस्कारः बालाय लभ्यते चेत् सः अग्रेऽपि उत्तमः नागरिकः भवितुं शक्नोति।

यस्य बालस्य अनौपचारिकीशिक्षा, संस्कारश्च सम्यक् न भवति इत्युक्ते परिवारे अथवा बालस्य पुरतः परिसरः सम्यक् नास्ति तर्हि सः दुष्टः एव भवति न तु शिष्टः।

एकां कथां श्रावयामि एका माता, तस्याः द्वौ पुत्रौ स्तः। एकः पुत्रः एकेन चोरेण चोरितः। चोरः बालकाय चौर्य विद्याम् अदात्। सः तस्य परिसरप्रभावेण चोरः अभूत्। माता तथा तस्याः परिवारः उत्तमः संस्कारेण युक्तः आसीत्। तदर्थं माता सह यः पुत्रः अस्ति सः वैद्यः अभूत्। माता एका, पुत्रः एकः एव चेदपि बालस्य पुरतः विद्यमानपरिसरप्रभावेण तस्य तस्य विकासः अभूत्। तदर्थं बालस्य अनौपचारिकीशिक्षा बहुमुख्यं भजते। गृहे सर्वदा परिवारजनाः क्रोशन्ति, द्रान्ति चेत् बालः तान् दृष्ट्वा एतदेव अनुकरणं करोति। यथा –

**शिशौ प्रविशतः प्रायः प्रतिमेशि गुणागुणौ।**
**गन्धोऽन्यसन्निधिरेव संक्रामति समीरणे।।**

तथा च

**यथा विहंगाः तरुमाश्रयन्ति, नद्यो यथा सागरमाश्रयन्ति।**
**यथा तरुण्यः पतिमाश्रयन्ति सर्वेगुणाः शिक्षामाश्रयन्ति।।**

अवश्यं एकैकः एकैकं वस्तु वा, जन्तून् आश्रयति। स एव जगतः नियमः वर्तते। बालः अनौपचारिकी शिक्षाम् आश्रयति इति अस्य अर्थः।

तथा च एकः बालः दुष्टपरिसरे विकासं प्राप्य उत्तमपरिवारे आगत्य तत्रैव समययापनं करोति चेत् सः उत्तमः मनुष्यः भवितुं शक्नोति। यथा –

**"चिन्तामणिस्पर्शेण लोहोऽपि सुवर्णं भवति"**
**"मानससरोवरं गत्वा काकोऽपि राजहंसो भवति"**
**"गुरोरनुग्रहेण मुर्खशिष्योऽपि पण्डितो भवति"**

तथा – अनौपचरिकी शिक्षणेन बालस्य विकासो भवति। बालः अनौपचरिकीशिक्षां परिवारे प्राप्य यदा विद्यालयं प्रति औपचरिक शिक्षणं प्राप्तुं आगच्छति तदा विद्यालयस्य परिसरं शिक्षकान् च दृष्ट्वा तथैव अनुकरणं कर्तुमारभते। विद्यालये उत्तमाः विषयाः भवन्ति चेत् तान् विषयान् गृण्हाति। अनुत्तमाः विषयाः दृश्यन्ते अथवा दुष्टमित्राणां सङ्गं करोति चेत् सः बालः दुष्टकार्याणि एव कर्तुं आरभते। यथा –

**यथा देशः तथा भाषा यथा राजा तथा प्रजाः।**
**यथा भूमिः तथा तोयं यथा वृक्षः तथा फलम्।।**

बालस्य यदा कदापि अनुकरणशीलाबुद्धिः एव भवति। तदर्थं तस्य पुरतः विद्यमानः परिसरः सर्वदा सम्यक् भवेत्। औपचरिकीशिक्षां ददाति यः शिक्षकः सः उत्तमगुणान् स्वस्य आत्मनि, बुद्धौ

स्थाप्य शिष्यस्य कृतेऽपि तानेव उत्तमगुणान् दाद्यात्। शिक्षकः अबद्धं भणति चेदपि छात्रः गृहं गत्वा तदेव सम्यक् इति प्रतिपादयति पठति च। किमर्थं चेत् गुरुः कदापि अबद्धं न गदति इति छात्रस्य विश्वासः भवति। तदर्थम् उत्तमसमाजस्य उत्तमः शिक्षकः, उत्तमः परिवारः च बालस्य पुरतः भवेत्। बालेषु कथं व्यवहरेत् इत्युक्ते –

**लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत्।**
**प्राप्ते तु षोडशेवर्षे पुत्रं मित्रवदाचरेत्।।**

यदि वयं बालं सम्यक् पालयामः तर्हि सः अग्रे उत्तमः नागरिकः भूत्वा समाजाय किमपि उत्तमं कर्तुं योग्यः भविष्यति। शिक्षकस्य परिवाराणां च व्यक्तित्वं समाजे कीदृशं भवेत् इत्युक्ते,

**नरस्याभरणं छनकप ।ौंत.14रुपं रुपस्याभरणं गुणाः।**
**गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा।। इति**

समाजे भवन्ति उत्तमाः जनाः चेत् एकैकः बालः उत्तमः नागरिकः किमर्थं न भवति ? निश्चयेन भवति।

## ಗುರಿ – ಗುರು

**ರಮೇಶ ಬಸಪ್ಪ ಚಿತ್ತಾಪುರ**
ಅನುಕ್ರಮಾಂಕ – 827
ಶಿ.ಶಾ. ೧ನೇ ವರ್ಷ

ಗುರುರ್ಬ್ರಹ್ಮ ಗುರುರ್ವಿಷ್ಣು ಗುರುರ್ದೇವೋ ಮಹೇಶ್ವರಃ ।
ಗುರುಸ್ಸಾಕ್ಷಾತ್ ಪರಂಬ್ರಹ್ಮ ತಸ್ಮೈ ಶ್ರೀ ಗುರುವೇ ನಮಃ ॥

ಗುರಿ–ಗುರು ಇವೆರಡೂ ಮನುಷ್ಯನ ಜೀವನದಲ್ಲಿ ಅತಿ ಮುಖ್ಯವಾದ ಅಂಗಗಳು. ಗುರಿಯಿಲ್ಲದ ಮನುಷ್ಯ ಏನನ್ನೂ ಸಾಧಿಸಲು ಸಾಧ್ಯವಿಲ್ಲ. ಹಾಗೆಯೇ ಗುರುವಿಲ್ಲದೇ ಗುರಿಯನ್ನು ತಲುಪಲು ಸಾಧ್ಯವಿಲ್ಲ. ಒಳ್ಳೆಯ ಗುರಿ ಮತ್ತು ಮಾನವೀಯ ಮೌಲ್ಯ ತುಂಬಲು ಪೋಷಕರು ಮತ್ತು ಗುರುಗಳು ಕಾರಣಕರ್ತರಾಗಿರುತ್ತಾರೆ. ವಿದ್ಯಾರ್ಥಿಗಳ ಕಣ್ಣ ಮುಂದೆ ಸ್ಪಷ್ಟ ಗುರಿ ಇದ್ದಾಗ ಹಾದಿ ತಪ್ಪುವ ಸಂಭವ ಕಡಿಮೆ. ಹಾಗೆಂದು ಈ ಹಾದಿ ಸುಗಮವಲ್ಲ. ಯಾರನ್ನೋ ಒಬ್ಬನನ್ನು ಮಾದರಿಯಾಗಿಸಿಕೊಂಡಾಗ ಒಂದು ಕೀಳರಿಮೆ ಕೊರಗು ಸಹಜ. ಮಾದರಿಯವರಂತೆ ತಾನಾಗಲು ಅಸಾಧ್ಯ ಎಂಬ ಕೊರಗು ಸದಾ ಕಾಡುತ್ತದೆ. ಮಾದರಿಯಾಗಿರುವವರ ಸದ್ಗುಣ ಕೈಗೂಡದೆಂಬ ಭಾವನೆಗಳು ಸದಾ ಉಂಟಾಗುತ್ತವೆ. ಇದೇ ಕಾರಣದಿಂದ ಗುರಿ ತಲುಪುವ ಹಾದಿಯಲ್ಲಿ ತೊಡಗದಿರುವ ಭಯವೇ ಹೆಚ್ಚು.

ಗುರುವನ್ನು ಆರಾಧನಾ ಸಂಸ್ಕೃತಿಯಿಂದಲೇ ನೋಡಿದರೆ ಗುರಿ ತಲುಪುವುದು ಸಲೀಸು. ಇಲ್ಲಿ ಆರಾಧನೆ ಎಂದರೆ ಕೃತಜ್ಞತಾಮನೋಭಾವ, ಧನ್ಯವಾದವನ್ನು ಸಲ್ಲಿಸುವ ಅರ್ಪಣಾ ಮನೋಭಾವ. ಇದು ಅದ್ಭುತ ವಿಧಾನ. ನಮ್ಮ ಒಳಗಿರುವ ಚೇತನವನ್ನು ಜಾಗೃತಗೊಳಿಸಿ ವಿಸ್ತರಿಸಿಕೊಳ್ಳುವ ವಿಧಾನವಿದು. ಮಾದರಿಯೊಂದನ್ನು ಇರಿಸಿಕೊಳ್ಳುವುದು ವಾಸ್ತವದಿಂದ ದೂರ ಸರಿಯುವ ಪಲಾಯನವಾದವೆನಿಸಬಹುದು. ಆದರೆ ಮಾದರಿ ಇಲ್ಲದೇ ಇರುವುದು ಖಿನ್ನತೆಗೆ ಕಾರಣ. ಅಂಧಕಾರದಲ್ಲಿ ತಡಕಾಡುವ ಬದುಕದು. ಶಾಲಾ ಕಾಲೇಜುಗಳ ವಿದ್ಯಾರ್ಥಿಗಳಿಂದು ಕೊರಗುವ ಹಾದಿ ಹಿಡಿಯಲು ಮಾದರಿ ಇಲ್ಲದಿರುವಿಕೆ ಕಾರಣ. ಮಾದರಿ ಗುರಿ ಇಲ್ಲವೆಂದರೆ ಮುಂದುವರಿಯುವ ಹಾದಿ ಇಲ್ಲ. ನದಿಯ ಹರಿಯುವಿಕೆಗೊಂದು ದಿಕ್ಕು ಇರುವಂತೆ ವಿದ್ಯಾರ್ಥಿಯ ಬದುಕಿನ ಸಾಗುವಿಕೆಗೆ ತಂದೆ–ತಾಯಿ ಹಾಗೂ ಮುಖ್ಯವಾಗಿ ಗುರುವಿನ ಸ್ಪಷ್ಟ ನಿರ್ದೇಶನ ಹಾಗೂ ಸಹಾಯ ಸಿಗಬೇಕು. ಸದಾಕಾಲ ವಿದ್ಯಾರ್ಥಿಗಳು ತಮ್ಮ ಉಪಾಧ್ಯಾಯರನ್ನು ತಮ್ಮ ಮಾದರಿಯಾಗಿ ಆಯ್ದುಕೊಳ್ಳುವುದು ಸಹಜ. ಹಾಗೆಂದು ಪ್ರತಿ ಗುರುವೂ ತನ್ನ ವಿದ್ಯಾರ್ಥಿಗಳೆಲ್ಲರನ್ನೂ ತನ್ನ

ಹಾದಿಯಲ್ಲಿ ಸಾಗಬೇಕೆಂದು ಬಯಸಲಾಗದು. ಆದರೆ ವಿದ್ಯಾರ್ಥಿಗಳು ಗುರುಗಳನ್ನು ತಮ್ಮ ಆದರ್ಶ ವ್ಯಕ್ತಿತ್ವವೆಂದು ಗುರುತಿಸಿ ಆರಾಧ್ಯಮೂರ್ತಿಯಾಗಿರಿಸಿಕೊಂಡು ಅದೇ ಹಾದಿಯಲ್ಲಿ ಸಾಗಬೇಕೆಂಬ ಅಪೇಕ್ಷೆ ಪ್ರತಿ ವಿದ್ಯಾರ್ಥಿಯಲ್ಲಿ ಒಡ ಮೂಡಿಸಬೇಕಾದ್ದು ಇಂದಿನ ಅನಿವಾರ್ಯತೆ. ಆರಾಧನೆ ಎಂದರೆ ನಮ್ಮೊಳಗಿನ ಅಂತಃಶಕ್ತಿ. ಅದರಿಂದ ಕೃತಜ್ಞತಾ ಮನೋಭಾವ, ಪ್ರೀತಿ, ಧೈರ್ಯ, ನಂಬಿಕೆಗಳ ಸಂಗಮ. ಕೃತಜ್ಞತೆ ತೋರಲು ಗೌರವ ತೋರ್ಪಡಿಸಲು ಆರಾಧ್ಯ ಮನೋಭಾವ ಅಗತ್ಯ. ಪರಸ್ಪರ ಗೌರವಿಸದ ಅರಿತುಕೊಳ್ಳಲೆತ್ನಿಸದ ವಿದ್ಯಾರ್ಥಿಗಳು ಗುರುವಿನ ಹಿತಶತ್ರುಗಳು.

ಗುರುವನ್ನು ದೇವರ ಸಮಾನದಲ್ಲಿ ಪೂಜಿಸಿದರೆ ನಮಗೆ ವಿದ್ಯೆ ಒಲಿಯುತ್ತದೆ. ವಿದ್ಯೆಯೆಂಬುದು ಮುಖ್ಯ, ಅದೇ ರೀತಿ ವಿನಯವೂ ಮುಖ್ಯ. ವಿನಯವಿದ್ದರೆ, ಒಳ್ಳೆ ಗುಣವಿದ್ದರೆ ವಿದ್ಯೆ ತಾನಾಗಿಯೇ ತಲೆಗೆ ಹೋಗುತ್ತದೆ. ಅದೇ ರೀತಿ ಪ್ರತಿನಿತ್ಯ ಮಾತೆಯನ್ನು ದೇವರೆಂದು ಪೂಜಿಸುವ ಆರಾಧನಾ ಮನೋಭಾವ ಪೂರ್ವದೇಶಗಳಲ್ಲಿ ಬಲು ಸಾಮಾನ್ಯ. ಮಾತೃದೇವೋಭವ ಪಿತೃದೇವೋಭವ ಆಚಾರ್ಯದೇವೋಭವ ಅತಿಥಿದೇವೋಭವ ಎಂಬ ಪ್ರಸಿದ್ಧ ವಾಕ್ಯಗಳೇ ಹೇಳುತ್ತವೆ. ಹೆತ್ತ ತಂದೆ–ತಾಯಿ, ಅತಿಥಿಗಳು ಹೇಗೆ ಮುಖ್ಯವೋ ಅದಕ್ಕಿಂತ ಹೆಚ್ಚು ಗುರುಗಳು, ಅದನ್ನು ಮೀರಿ ಗುರುವಿನ ಮಾತನ್ನು ಧಿಕ್ಕರಿಸಿ ತಪ್ಪು ಮಾಡಿದರೆ ಅವರಿಗೆ ಅದರ ಅರಿವು ಕಾಲೇಜು ಜೀವನದಲ್ಲಿ ಆಗುವುದಿಲ್ಲ. ಅವರ ಮುಂದಿನ ಸುಗಮ ಜೀವನ ನಡೆಸಬೇಕಾದ ಸಮಯದಲ್ಲಿ ಪಶ್ಚಾತ್ತಾಪದ ಭಾವನೆ ಮೂಡುತ್ತದೆ. ಆಗ ಪರಿತಪಿಸಿದರೆ ಫಲವಿಲ್ಲ. ಈಗಲೇ ಗುರುವನ್ನು ವಂದನೀಯ ಭಾವದಲ್ಲಿ ನೋಡಬೇಕು. ತಮ್ಮ ಹೆತ್ತ ತಂದೆ–ತಾಯಿಗಳಿಗೆ ನಾವಷ್ಟೇ ಮಕ್ಕಳು ಆದರೆ ಗುರುಗಳಿಗೆ ಪ್ರತಿವರ್ಷವೂ ನೂರು ಹೊಸ ಮಕ್ಕಳ ಪಾಲನೆ ಪೋಷಣೆ ಮಾಡುವ ಪ್ರವೃತ್ತಿ ಇರುತ್ತದೆ. ಆದ್ದರಿಂದ ನಾವು ಗುರುಗಳಿಗೆ ದೇವರ ಸಮಾನದ ರೀತಿ ಹಾಗೂ ತಂದೆ–ತಾಯಿಯ ಸಮಾನದ ರೀತಿ ಗೌರವಿಸಬೇಕು, ವಂದನೀಯವಾಗಿರಬೇಕು. ಏಕೆಂದರೆ ಅವರು ನಾವು ಮುಂದೆ ಉತ್ತಮ ಜೀವನ ನಡೆಸಬೇಕೆಂಬ ಯೋಚನೆಯಿಂದಲೇ ನಮ್ಮ ಒಳಿತನ್ನು ಬಯಸುವವರು. ಗುರುವಿಲ್ಲದೆ ಗುರಿ ತಲುಪಲು ಸಾಧ್ಯವಿಲ್ಲ. ಮಕ್ಕಳ ಮನಸ್ಸು ಆವೆಮಣ್ಣಿನಂತೆ . ಅದನ್ನು ತಿದ್ದಿ ತೀಡುವ ಕೆಲಸ ಮಾದರಿ ಗುರುಗಳದು. ಹಠ ಮಾಡುವ ಮಗುವನ್ನು ಅನುನಯದಿಂದ ನಾಚಿಕೆಯಿಂದ ಮುದುಡುವ ಮಗುವನ್ನು ಗದರಿಕೆಯಿಂದ ಸರಿದಾರಿಗೆ ತರಬೇಕಾದ ಕರ್ತವ್ಯ ಪಾಲಕರಿಗೆ ಹಾಗೂ ಗುರುಗಳಿಗೆ ಸಮವಾಗಿ ಸೇರಿದ್ದು. ಗುರುವಿನ ಗುಲಾಮನಾಗುವ ತನಕ ದೊರೆಯದಣ್ಣ ಮುಕುತಿ ! ಆದರೆ ಗುಲಾಮನಾಗುವ ಕಲೆ ಸುಲಭ ಅಲ್ಲ. ಸತ್–ಚಿತ್–ಆನಂದ ಎಂಬ ಪರಿಭಾಷೆ ಭಾರತದಲ್ಲಿದೆ. ಸತ್ಯ, ಶುದ್ಧಚಿತ್ತ ಮತ್ತು ಆತ್ಮತೃಪ್ತಿ ಎಂಬ ಮೂರು ಸಂಗತಿಗಳವು. ಮೊದಲೆರಡರಿಂದಿ ಮೂರನೆಯದು ನಿಶ್ಚಿತ. ನಮ್ಮೊಡನೆ ಮೊದಲಿನವೆರಡು ಮನೆ ಮಾಡಿದ್ದರೆ ಮೂರನೆಯದು ತಾನಾಗಿಯೇ ಉಪಲಬ್ಧ. ಇವನ್ನು ಸಾಧಿಸಲು ನಮ್ಮ ಆತ್ಮಸ್ಥೈರ್ಯ ಹಾಗೂ ಗುರುವಿನ ಮಾರ್ಗದರ್ಶನ ಮುಖ್ಯ. ಸಿಹಿಯಿಲ್ಲದ ಜಾಮೂನು ವ್ಯರ್ಥ. ಬೆಳಕು–ನೆರಳುಗಳ ಹುಡುಕಾಟ ವ್ಯರ್ಥ.ಹಾಗೆಯೇ ಗುರುವಿಲ್ಲದ ವಿದ್ಯೆ , ಜೀವನ ವ್ಯರ್ಥ.

## ಮಾತೃಭಾಷಾ ಶಿಕ್ಷಣದ ಮಹತ್ವ

**ಅಕ್ಷಯ ಭಟ್ಟ**
ಅನುಕ್ರಮಾಂಕ – 828
ಶಿ.ಶಾ. ೧ನೇ ವರ್ಷ

ಮನುಷ್ಯ ಇತರರೊಂದಿಗೆ ವ್ಯವಹರಿಸಲು, ಭಾವಾಭಿವ್ಯಕ್ತಿಗೊಳಿಸಲು, ಸಂಪರ್ಕ ಸಾಧಿಸಲು ಬಳಸುವ ಸಂವಹನ ಮಾಧ್ಯಮವೇ ಭಾಷೆ. ಭಾಷೆ ಎಂಬುವುದು ಇಲ್ಲದಿದ್ದರೆ ಜಗತ್ತು ಕತ್ತಲೆಯಿಂದ ಕೂಡಿರುತ್ತಿತ್ತು ಎಂಬ ದಂಡಿಯ ವಾಕ್ಯವೇ ಹೇಳುವಂತೆ ಮನುಷ್ಯನಿಗೆ ಬದುಕಲು ನೀರು, ಗಾಳಿ, ಆಹಾರ, ವಸತಿಗಳೆಲ್ಲ ಎಷ್ಟು ಮುಖ್ಯವೋ ಭಾಷೆ ಕೂಡ ಅಷ್ಟೇ ಮುಖ್ಯ. ಪ್ರತಿಯೊಂದು ಭಾಷೆ ಕೂಡ ತನ್ನದೇ ಆದ ಸಂಸ್ಕೃತಿ, ಜ್ಞಾನ ಭಂಡಾರ, ವಿಚಾರ, ವಿಶಿಷ್ಟತೆಯನ್ನು ಹೊಂದಿರುತ್ತದೆ. ಅಂತಹ ಹಲವಾರು ಭಾಷೆಗಳನ್ನು ಹೊಂದಿದ ದೇಶ ನಮ್ಮದು. ವಿಶ್ವದಲ್ಲೇ ಅತಿ ಹೆಚ್ಚು ಭಾಷೆಗಳನ್ನು ಹೊಂದಿರುವ ದೇಶ ಎಂಬ ಹೆಗ್ಗಳಿಕೆ ನಮಗಿದೆ. ಎಷ್ಟೇ ಭಾಷೆ ತಿಳಿದಿದ್ದರೂ ಕೂಡ ವ್ಯಕ್ತಿಗೆ ಆತನ

ಮಾತೃಭಾಷೆಯೇ ಮುಖ್ಯವಾಗಿರುತ್ತದೆ ಮತ್ತು ಅದೇ ಸುಲಭವೆನಿಸುತ್ತದೆ.

ಮಾತೃಭಾಷೆ ಎನ್ನುವ ಶಬ್ದವೇ ಅಂತಿಹುದು, ಅದರ ಶ್ರವಣ ಮಾತ್ರದಿಂದಲೇ ಒಂದು ತರಹದ ರೋಮಾಂಚನ, ಸಡಗರ ಮನೆಮಾಡುತ್ತದೆ. ಜನನೀ ಜನ್ಮಭೂಮಿಶ್ಚ ಸ್ವರ್ಗಾದಪಿ ಗರೀಯಸೀ ಎಂಬ ವಾಕ್ಯದಂತೆ ತಾಯಿ ಮತ್ತು ತಾಯ್ನಾಡು ಸ್ವರ್ಗಕ್ಕಿಂತ ಮಿಗಿಲಾದ ಮೇಲೆ ತಾಯಿ ಮತ್ತು ತಾಯ್ನಾಡಿನಲ್ಲಿ ಉಪಯೋಗಿಸುವ ಭಾಷೆ ಕೂಡ ಶ್ರೇಷ್ಠವೆ.

ತಾಯಿಯ ಮೂಲಕ ಪಡೆದ ಭಾಷೆ ಇದಾಗಿರುವುದರಿಂದ ಭಾಷೆಯ ಮೇಲಿನ ಹಿಡಿತ ಹಾಗೂ ಜ್ಞಾನವೂ ಅಧಿಕವಾಗಿರುತ್ತದೆ. ಇತರ ಭಾಷೆಯನ್ನು ಕಲಿಸಬೇಕಾದಂತೆ ಇದನ್ನು ಕಲಿಸುವ ಅಗತ್ಯವಿರುವುದಿಲ್ಲ. ತಾಯಿಯ ಹಾಲಿನ ಜೊತೆಗೆ ಭಾಷೆಯೂ ದೇಹವನ್ನು ಸೇರಿರುತ್ತದೆ. ಯಾವುದೇ ಭಾಷೆಗೆ ತರ್ಜುಮೆ ಮಾಡಬೇಕಾದರೂ ಕೂಡ ಮೊದಲು ಮಾತೃಭಾಷೆಯಲ್ಲಿಯೇ ಅದರ ಭಾವವನ್ನು ಅರ್ಥವನ್ನು ಸಾಮಾನ್ಯವಾಗಿ ತಿಳಿದುಕೊಳ್ಳುತ್ತೇವೆ. ಗಾಂಧೀಜಿಯವರು ಮಾತೃಭಾಷೆ ತಾಯಿಯ ಹಾಲಿನಂತೆ ಎಂದಿದ್ದಾರೆ. ಹುಟ್ಟಿದಾಗಿನಿಂದ ಕೇಳುತ್ತ, ಭಾವಾಭಿವ್ಯಕ್ತಿಗೊಳಿಸುತ್ತ ಮೈಗೂಡಿಸಿಕೊಂಡಿರುವ ಭಾಷೆ ಇದು, ಹೀಗಾಗಿ ಮಾತೃಭಾಷಾ ಶಿಕ್ಷಣ ಅತ್ಯಗತ್ಯವೆನಿಸುತ್ತದೆ. ಆತನ ಸುತ್ತಮುತ್ತಲಿನ ಜನರೊಂದಿಗೆ ವ್ಯವಹರಿಸಲು ಕೂಡ ಮಾತೃಭಾಷೆ ಸಹಕಾರಿಯೆನಿಸುತ್ತದೆ. ರಾಷ್ಟ್ರದಲ್ಲಿನ ಯೋಜನೆಗಳು ಅಥವಾ ಸೂಚನೆಗಳು ಜನರನ್ನು ಇತರ ಭಾಷೆಗಳಿಗಿಂತಲೂ ಮಾತೃಭಾಷೆಯಲ್ಲಿ ತಲುಪುವುದೇ ಉಚಿತವಾದದ್ದು. ಇತರ ಭಾಷೆಗಳಿಗಿಂತಲೂ ಜನರ ಹೃದಯವನ್ನು ತಲುಪುವುದು ಮಾತೃಭಾಷೆಯೇ. ಆದ್ದರಿಂದ ಆರ್ಥಿಕ ಕ್ಷೇತ್ರಕ್ಕೆ ಸಂಬಂಧಿಸಿದ ಸೂಚನೆಗಳು ಕೂಡ ಆಂಗ್ಲಾದಿ ಭಾಷೆಗಳಿಗಿಂತ ಮಾತೃಭಾಷೆಯಲ್ಲಿಯೇ ಜನರನ್ನು ತಲುಪುವುದರಿಂದ ಈ ಶಬ್ದದ ಅರ್ಥವೇನು? ಎಂಬಿತ್ಯಾದಿ ಪ್ರಶ್ನೆಗಳಿಗೆ ಅವಕಾಶವಿರುವುದಿಲ್ಲ. ಕ್ರೀಡಾ ಕ್ಷೇತ್ರದಲ್ಲಿ ಕೂಡ ಆಟಗಾರರು ತಮ್ಮ ತಂತ್ರಗಳನ್ನು ರೂಪಿಸಲು ತಮ್ಮ ಮಾತೃಭಾಷೆಯನ್ನೇ ಬಳಸುತ್ತಾರೆ. ವ್ಯಕ್ತಿ ಸಮಾಜಕ್ಕೆ ಹತ್ತಿರವಾಗಲು ಇತರ ಭಾಷೆಗಳಿಗಿಂತ ಮಾತೃಭಾಷೆಯೇ ಸೂಕ್ತ ಎಂಬುದು ತಿಳಿದ ವಿಷಯವೇ. ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿನ ವಾಕ್ಯವೊಂದು ಇದನ್ನು ಸ್ಫುಟೀಕರಿಸುತ್ತದೆ. ``This universe can very well be expressed in words and syllables which are not those of one's motherthongue''.

ಮೊದಲು ತಾಯ ಹಾಲು ಕುಡಿದು,ಲಲ್ಲೆಯಿಂದ ತೊದಲು ನುಡಿದ ಮಾತದಾವುದು? ಎಂಬ ಬಿ.ಎಂ. ಶ್ರೀ. ಯವರ ಕವಿವಾಣಿಯಂತೆ ಮಾತೃಭಾಷೆ ತನ್ನದೇ ಸ್ಥಾನ, ಗೌರವ, ಪ್ರೀತಿಯನ್ನು ಹೊಂದಿದೆ. ಮಾತೃಭಾಷೆಯಿಂದ ದೇಶದ ಸರ್ವತೋಮುಖ ಅಭಿವೃದ್ಧಿ ಕೂಡ ಸಾಧ್ಯ ಎನ್ನುವುದಕ್ಕೆ ಜಪಾನ್, ಜರ್ಮನಿಯಂತಹ ಪುಟ್ಟ ರಾಷ್ಟ್ರಗಳು ಬಲಿಷ್ಠವಾಗಿ ಬೆಳೆದಿರುವುದೇ ಸಾಕ್ಷಿ. ಆದರೆ ವಿಪರೀತವೆಂಬಂತೆ ರಾಜ್ಯದ ರಾಜಧಾನಿಗಳಲ್ಲಿಯೇ ಅಲ್ಲಿನ ಮಾತೃಭಾಷೆ ಕ್ಷೀಣಿಸುತ್ತಿದೆ ಎಂಬುದು ವಿಪರ್ಯಾಸ. ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ತಮ್ಮ ಮಾತೃಭಾಷೆ ಯಾವುದು ಎಂಬ ಜ್ಞಾನವೇ ಕ್ಷೀಣಿಸುತ್ತಿರುವ ಈ ಸಂದರ್ಭದಲ್ಲಿ ಭಾಷೆಯ ಹಾಗೂ ಅದರಲ್ಲಿನ ಜ್ಞಾನ ಮತ್ತು ವಿಷಯದ ಪ್ರಸಾರಕ್ಕಾಗಿ ಮಾತೃಭಾಷಾ ಶಿಕ್ಷಣ ಅತ್ಯಗತ್ಯ. ಅಂತಹ ಒಂದು ಶ್ರೇಷ್ಠ ಭಾಷಾ ಪರಂಪರೆಯನ್ನು ಉಳಿಸಿ ಬೆಳೆಸುವುದು ನಮ್ಮೆಲ್ಲರ ಕರ್ತವ್ಯವಾಗಿದೆ.

# मनोविज्ञानम्

**अजीत सिंह** अनुक्रमाङ्कः – 829
शिक्षाशास्त्रिप्रथमवर्षः

मनोविज्ञानम् नाम किम् ?

साम्प्रतिके युगे वैज्ञानिकेषु विषयेषु मनोविज्ञानमपि प्रतिदिनं विकासमधिगच्छति। वस्तुतः "मनसः विज्ञानम् मनोविज्ञानमिति" परम् एतत् साम्प्रतिके युगे एव स्वीक्रियते। प्राचीनकाले तु एतत् शास्त्रं दर्शनशास्त्रस्यैकः विभागः स्वीकृतम् आसीत्। वेदे पुराणशास्त्रे अपि सम्यक् रूपेण मनोविज्ञान विषये वर्णनम् आसीत्।

**मनोविज्ञानम्**

मनोविज्ञानशास्त्रं नातीव प्राचीनं शास्त्रं वर्तते। मनोविज्ञानम् आङ्गलभाषायां Psychology इति उच्यते। एषः शब्दः यूनानि शब्देन निसृतः। Psycho+logos इति शब्दद्वयं भवति। तत्र Psycho शब्दस्य अर्थ अस्ति "आत्मा", Logos इति शब्दस्य अर्थः अध्ययनमिति। अतः Psychology इति शब्दस्य अर्थः भवति "आत्मनः अध्ययनम्" शिक्षायाः क्षेत्रे मनोविज्ञानस्य प्रयोगः मनोविज्ञानमिति।

**आत्मविज्ञानम्** – (The science of soll)

मनोविज्ञानशास्त्रमादौ दर्शनशास्त्रेण सम्बद्धमासीत्। यूनानदेशीयः विद्वान् दार्शनिक "अरिस्टाटल" मनोविचारं शारीरिकक्रियेति स्वीकरोति स्म। अत एव (साइकोलाऑजी) Psychology इति पदस्य व्युत्पत्ति आत्मानमाधिकृत्य प्रवृत्तं शास्त्रमिति, मनोविज्ञानम्। आत्मविज्ञानमित्यर्थे प्रसिद्धं जातम्।

**मनःशास्त्रम्** – (The science of Mind)

मनो नाम किम्? नेदं पदार्थः, किं पुनः पदार्थः नैव मनः इति। परिहासोक्तितरेषापि मनोतुलनमेव सूचयति। वस्त्वधिकृत्य विशदं शास्त्रं भवितुम् एतत् नार्हति। वस्तुतः मनः क्रियारूपेणापि स्वीकृतं वर्तते।

**चैतन्यशास्त्रम्** – (The science of onsciousness)

मनोविज्ञानं चैतन्य विचारक शास्त्रमिति लक्षणं स्पेनदेशीयाः केचन् प्रमुखाः दार्शनिकाः कुर्वन्ति स्म। एतेषां मतमासीत् मनोविज्ञाने मानवानां प्राणिनां वा चैतन्य क्रियाणामध्ययनं विधीयते। अतः एव चेतनायाः विज्ञानञ्चैतन्यं शास्त्रं वा भवति।

**व्यवहार विज्ञानम्** – (The science of Behaviour)

प्राणिनां व्यवहाराध्ययनाय प्रवृत्तं शास्त्रं नाम मनोविज्ञानमिति सर्वैः स्वीक्रियते। अभिव्यक्तिः क्रियासु भवति। एताषां सर्वाषां क्रियाणां समुच्चयो व्यवहारपदेन व्यवह्रियते।

**मनोविज्ञानस्य परिभाषाः**

- मनोविज्ञानस्य लोकमान्यपरिभाषायाः विषये विद्वत्सु मतैक्यं नास्ति, परं मनोवैज्ञानिकानां काश्चन परिभाषा अतीव प्रसिद्धाः वर्तन्ते। मानवव्यवहारस्य विज्ञानं मनोविज्ञानम्।
  – कोलेरिन महोदयः
- मानवानुभावानां व्यवहारस्य च यथार्थविज्ञानं (धनात्मकविज्ञानम्) मनोविज्ञानमिति।
  – थलस महोदयः
- जीवपरिवेशयोः मध्ये परस्परसम्बन्धविश्लेषकं विज्ञानं मनोविज्ञानमिति।
  – वारेन महोदयः
- मानव व्यवहारस्य तथा मानव सम्बन्धानां विज्ञानं मनोविज्ञानमिति।
  – क्रो महोदयः

**मनोविज्ञानस्य स्वरूपम्** – (Nature of Psychology)

अद्यतनयुगस्य विकसितसकलज्ञाने विज्ञाने च मानवव्यवहारस्य दर्शनं भवति। मानवव्यवहारः कारणप्रतिकरणेन क्रियाप्रतिक्रियया सामाजिक भौतिकपरिस्थिति प्रभावितो भवति। मानवव्यवहारोपरि यादृशः प्रभावः आयाति सः तादृशानि एव कार्याणि करोति। उदाहरणम् – कस्मिन्नपि उद्योगे बहवः श्रमिकाः कार्यं कुर्वन्ति।

उद्योगस्य क्षेत्रे येन केन प्रकारेण मानवव्यवहारस्य क्रियां प्रति क्रियाणां परिणामं वयं पश्यामः तद्वदेव जीवनस्य प्रत्यकेस्मिन् क्षेत्रे मानवमनोविज्ञानस्य भूमिका महत्वपूर्णा विद्यते।

# शिक्षायाः महत्वम्

**समीर रंजन प्रधान** अनुक्रमाङ्कः – 830
शिक्षाशास्त्रिप्रथमवर्षः

का नाम शिक्षा? इति तु वयं सर्वे जानीमः। शिक्ष विद्योपादाने धातोः स्त्रीत्वविवक्षायां अजाद्यतष्टाप् इत्यनेन टाप् प्रत्यये कृते शिक्षा इति रूपं सिद्धयति। शिक्षायाः अपरं नाम विद्या, ज्ञानम् इति। शिक्षाद्वारा मानवस्य सर्वाङ्गीणविकासः भवति। अर्थात् शारीरिकः, मानसिकः, बौद्धिकः, आध्यात्मिकः इति।

शिक्षा मानवस्य प्रमुखम् अङ्गं वर्तते। शिक्षां विना मानवः पशुवत् भवति। शिक्षायाः उद्देश्यं वर्तते अन्धकारात् प्रकाशं प्रति। "तमसो मा ज्योतिर्गमय" इत्यर्थः। मानव जन्मतः मृत्युपर्यन्तं शिक्षाग्रहणं कर्तुं शक्नोति। शिक्षायाः माध्यमेन मानवे मानवता तिष्ठति। शिक्षा केवलं पुस्तकेषु न अन्तर्भवति। एवं भवति चेत् शिक्षायाः कोषः (भण्डारः) सीमितः भविष्यति। शिक्षायाः अन्त्यं कदापि न भवति। सम्प्रति अध्यापकः भिन्नेषु भिन्नेषु विषयेषु छात्रान् पाठयति तेन तेषां मनसि जिज्ञासा उत्पद्यते। अहं कः ? आकाशं कथं वर्तते। प्रथ्वी कथं भवति ? शब्दः कथं उत्पद्यते इति। एतादृशाः अनेके प्रश्नाः भवन्तिः यदा वयं अग्रे अनुसरामः तदानीम् अस्माकं ज्ञानमपि विस्तृतं भवति।

शिक्षा सर्वश्रेष्ठं धनं वर्तते। तस्य चौर्यं कर्तुं न शक्यते। तस्य आहरणं क्रियते। दानेन शिक्षायाः अभिवृद्धिः भवति न हानिः अतः उच्यते "विद्या धनं सर्वधनप्रधानम्" इति। एवं च विद्या इव बन्धुः कोऽपि नास्ति संसारे। सा विद्या सर्वदा सद्मार्गं प्रदर्शयति।

**न च विद्या समो बन्धुः न च व्याधि समो रिपुः।**
**स चापत्यसमः स्नेहो न च देवात् परं बलः।।**
**पुनश्च अनभ्यासे विद्या विषं भवति।**
**अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।**
**विषं गोष्ठी दरिद्रस्य वृक्षस्य च तरुः विषम्।।**

शिक्षायाः सदुपयोगः कर्तव्यः। अल्पविद्या भयङ्करी वर्तते। शिक्षा दानं महत् दानं वर्तते। यस्मिन् देशे शिक्षिताः अधिकाः भवति सः देशः समृद्धिः वर्तते। यथा अमेरिका, जापान, चीना इत्यादयः। किन्तु यस्मिन् देशे अथवा राज्ये शिक्षायाः विकासः नास्ति सः देशः उन्नतिं साधयितुं न शक्नोति। अस्माकं देशे पश्यन्तु केरलं तथा बिवहारराज्ये कीयदन्तरं वर्तते तद् ज्ञातुं शक्नुमः। शिक्षा द्वारा सम्पूर्ण मानवस्य विकासः निर्माणं भवति।

"मानवान्तर्निहितपूर्णतायाः अभिव्यक्तिरेव शिक्षा" इति स्वामि विवेकानन्दमहोदयेन उक्तम्। अतः शिक्षायाः प्रचारः तथा प्रसारः प्रत्येकं नागरिकस्य प्रमुखं कर्तव्यं वर्तते।

# बौद्धानां काले शिक्षणम्

**बालचन्द्रभट्टः** अनुक्रमाङ्कः – 831
शिक्षाशास्त्रिप्रथमवर्षः

आसहस्रवर्षेभ्यः गङ्गाप्रवाहवत् प्रवहन्ती भारतीयपरम्परा नित्यनूतना अनितरसाधरणा राराजते। परम्परातरङ्गिणीयं बहुभिः प्रणालीभिः विस्तृता सत्यपि रत्नाकरसमानमद्वितीयं लक्ष्यं प्रापयति जनान् इति महान् विशेषः। तासु परम्परासु भारतीयशैक्षिकपरम्परापि अन्यतमा। शैलसदृशासौ शैक्षिकपरम्परा कालानुगुणं बहुभिः घट्टैः दुर्गमापि दिदृक्षूणाम् अनुपमानुभवसम्पत्प्रदायिनीत्यत्र नास्ति संशयलेशोऽपि। तानेव घट्टान् एवं विभक्तुं शक्नुमः। यथा –

- वेदकाले शिक्षणपद्धतिः
- बौध्दानां काले शिक्षणपद्धतिः
- यवनानां काले शिक्षणपद्धतिः
- आङ्ग्लेयनां काले शिक्षणपद्धतिः
- स्वातन्त्र्योत्तरकाले शिक्षणपद्धतिः

तत्र बौद्धानां काले शिक्षणपध्दतिरपि अन्यतमा। गौतमबुध्दस्य जननात् परं तस्य प्रभावेण तच्छिष्याणां च प्रभावेण भारतीयशिक्षणपध्दतौ, तत्रापि बौध्दानां प्राबल्यं यत्र, तादृशेषु स्थलेषु यः परिष्कारः व्यत्यासः जातः, सैव "बौध्दकालीनशिक्षणपध्दतिः" इति कथयामः।

गौतमबुद्धः न केवलं तत्त्वज्ञानी, किन्तु श्रेष्ठः शिक्षणतत्त्वज्ञोऽपि आसीत्। सनातनधर्मस्य अङ्गवत् भासमानो बौध्दधर्मः सनाततधर्मेण बहुषु अंशेषु साम्यतां भजते। तस्मात् शिक्षणपध्दतावपि साम्यं द्रष्टुं शक्नुमः। किन्तु एकः प्रधानो व्यत्यासो यत् बौध्दशिक्षणस्य वेदाः नाधाराः आसन्निति। अत्र सर्ववर्णीयाः अपि विद्यार्जनार्थम् अर्हाः आसन्। बुध्दः अष्टाङ्गमार्गान् बोधयामस। तनि च अष्टाङ्गानि एवं सन्ति –

- उत्तमो विचारः' उत्तमो जीवनोपायमार्गः
- उत्तमा वाक्' उत्तमः प्रयत्नः
- उत्तमेच्छा' उत्तमं मनः
- उत्तमं चारित्र्यम्' उत्तमैकग्रता

इति। एतेषां तत्त्वानामाधारेण बौध्दशिक्षणं रूपितमासीत्।

बौध्दानां काले शिक्षणोद्देश्यानि

- पवित्रशिक्षणस्याभिवृध्दिः।
- दयानुकम्पाभिः युक्तस्य विदुषो नर्माणम्।
- सर्वाङ्गीणव्यक्तित्वस्य विकासः।
- भौतिकसम्पदपेक्षया ज्ञानस्य महत्वम्।
- बौद्धतत्त्वनां प्रसारः बोधनं च।

**बौद्धानां शिक्षणक्रमः**

बौद्धानां शिक्षणावसरे केचन नियमाः आसन्। बौध्दशिक्षणप्रवेशात् प्राक् "पब्बजः" इति नामिकैका दीक्षा दीयते स्म। अनेन सम्स्कारेण विद्यार्थी स्वस्य अष्टमे वयसि बौध्दविहारे प्रवेशं प्राप्नोति स्म। तत्रागमनानन्तरं सः "श्रवणः" इति नाम्ना कथ्यते स्म। पीतवस्त्रैरलङ्कृतः श्रवणः "बुद्धं शरणं गच्छामि धर्मं शरणं गच्छामि, सङ्घं शरणं गच्छामि" इति प्रमाणत्रयं स्वीकरोति स्म। तथा च 'दुष्कर्माणि न करिष्यामि' इति प्रतिज्ञापि तेन कर्तव्यमासीत्। विद्यालये चण्डालानाम् अपराधिनाम् व्याधियुक्तानां सेवकानाञ्च अवकाशः नासीत्। प्रायः १०–१२ वर्षाध्ययनानन्तरं श्रवणः पूर्णतया शिक्षां प्रप्नोति स्म। तदा "उपसम्पदः" इति समारम्भः भवति स्म। अनेन समारम्भेण श्रवणाः सर्वे भिक्षुपदवीं प्रप्नुवन्ति स्म।

बौद्धशिक्षणपद्धतौ मौखिकपध्दतिः, अनुगमनपद्धतिः, प्रायोगिकपद्धतिः, प्रश्नोत्तरपद्धतिः, प्रवासपद्धतिः इत्यादयो विशिष्टाः प्रविधयः आसन्। अपि च स्त्रीणां शिक्षणार्थं प्रत्येकः बौद्धविहारः भवति स्म। प्राप्तोन्नतशिक्षणाः स्त्रियः शिक्षिकारूपेण कार्यं कुर्वन्ति स्म। तत्र शुभा–अनुपमा–सुमेधा इत्यादयः शिक्षिकाः प्रसिद्धाः आसन्।

**पाठ्यक्रमः**

बौद्धानां काले शैक्षणिकदृतान्त्रिकदृधार्मिकसम्बन्धिशिक्षणं प्रदीयते स्म। 'ह्यूयान् त्स्याङ्ग' नामकबौद्धभिक्षुणः वचसा ज्ञायते यत् विहारेषु भिक्षुभिः नागार्जुनस्य सुहृल्लेखः,चन्द्रस्य सुदानम्, अयुतशूरस्य जातकमाला, अश्वघोषस्य बुध्दचरितम् इत्यादयो ग्रन्थाः नलन्देषु पठ्यन्ते स्म। एतान् विहाय साहित्यं–कला–तत्त्वशास्त्रं–वाणिज्यं–युद्धकला–कृषिः–सीवनं–गणितम् इत्यदयोऽपि विषयाः तत्र शिक्ष्यन्ते स्म। तक्षशिलायां इन्द्रजाल–मन्त्र–यक्षिणी–गजविद्या–वैद्यकीयविषयाः पाठ्यन्ते स्म। अपि च बौद्धानां धर्मग्रन्थाः अपि विशेषेण पाठ्ये नियुक्ताः आसन्। त्रिपिटकम्, जतकग्रन्थाः च बुद्धस्य उपदेशसम्बन्धिविषयान् पूर्वजन्मसम्बन्धिविषयांश्च निरूपयन्ति। ते एव विषयाः विशेषतः पाठ्यन्ते स्म।

तदेवं बौद्धानां शिक्षणपद्धतिः वेदकालीनशिक्षणपद्धतिरिव बहुगुणयुता सत्यपि क्रमेण सर्वत्र न प्रसारं गता। केवलं बौद्धविहरेष्वेव तेषां शिक्षणानां समुपस्थितिः जाता इति तु खेदकरोऽपि वास्तविको विषयः।

## अध्यापकाभिभावकसमावेशः

**प्रदीप कुमार साहु** अनुक्रमाङ्कः – 833
शिक्षाशास्त्रिप्रथमवर्षः

विद्यालयस्य उन्नत्यर्थम् एवं छात्रजीवनसौकर्याय अध्यापक–अभिभावकसमावेशः आवश्यकः वर्तते। तेषां परस्परसम्मेलनेन विद्यालयकार्यक्रमादिनां परिचयः भवति। एवं स्वबालकस्य विषये अवगाहनं भवति । तेन ते विद्यालयकार्यक्रमानुसारं स्वव्यवहारं परिष्कर्तुं शक्नुवन्ति। एवं स्वबालकस्य विषये मार्गप्रदर्शकाः भवितुमर्हन्ति। न केवलं विद्यालये एव बालकस्य अध्ययनाध्यापनं किन्तु गृहे

अपि तस्य अध्ययनम् अध्यापनं च भवति। सामान्यतया विद्यालये अध्यापकाः प्रतिदिनं छात्रेभ्यः गृहकार्यं यच्छन्ति। गृहकार्यदानेन तेषां समयस्य उचितोपयोगः भवति। गृहे अपि छात्राः कथं लिखन्ति कथं पठन्ति इति ज्ञातुं शक्नुवन्ति। तदनुसारं छात्रस्य मार्गदर्शनं तथा प्रोत्साहनं भवति। एवं विद्यालयस्य कार्यक्रमादीनां परिचयेन समये समये सन्दर्भानुसारं विद्यालयं प्रति गच्छन्ति तत्र कार्यक्रमान् परिशील्य तदनुसारेण सूचनाः यच्छन्ति। तथा सम्यक् अध्ययनाय अध्यापनाय च व्यवस्था कर्तुं शक्यते। ज्ञानार्जनं भवति अनेन। एवं व्यवस्थाविषये अवगाहनं भवति, तदनुसारं व्यवस्थां सम्पादयितुं शक्नुवन्ति। एवं भौतिकतत्त्वानां विषये चिन्तनं भवति। यथा छात्रस्य सर्वाङ्गीणविकासः भवति तथा तासां क्रियाणाम् आयोजनमपेक्ष्यते। तासाम् आयोजनेन छात्राणां परस्परसम्पर्कः भवति। एवं परस्परज्ञानाभिवृद्धिः भवति। एतदर्थम् अध्यापकाभिभावकसमावेशः समये समये आवश्यकतानुसारेण अपेक्षितः वर्तते।

प्रधानाध्यापकस्य कर्तव्यम् उत्तरदायित्वं च वर्तते यत् विद्यालयस्य उन्नत्यर्थं तथा छात्राणां सर्वाङ्गीणविकासाय समये समये अवसरानुगुणम् अध्यापकाभिभावकसमावेशः विद्यालये परिकल्पनीयः भवति। इति अलं विस्तरेण।

# Women Education in India Today

**Malavikanath** Roll No - 834
S. S. I[st] Year

Women education has been hampered very much during British period in India. After independence though it has got a little speed but not satisfactory. In the remote rural area women believe even today they have been born to perform house hold job and give birth of babies. It is as if their sole duty to nurse be children and their father. A few women who venture crossing this social bar and go forward are sure to learn backward due to lack of security all around. Rabindranath Tagore has rightly told –

O God! Why don't you give women right to fight with (conquer) her own destiny?

Women from minority, S.T and backward section are be most hopeless and helpless. They can get any how be primary education are misfortunes being during the secondary education level. They totally extinct at the higher education stage. A horrible demon called 'marriage' gobble then all.

Under this situation my suggestion is that the Government should be rectify the marriage law and increase the minimum age of marriage from 18 to 30 for women and 21 to 35 for boys at least and Government allow with all the N.G.O. and the students from secondary to higher level should make aware of all the mass people of India about this crisis.

Besides, the women themselves are to stand erect against all their adverse situation.

Rabindranath blamed none but ‘Nirupama’ (a story R.N.Tagore’s) herself for her ironical end because women like Nirupama’s don’t know how to stand straight and protest against the injustices and tyranny caused in their own family circle and be larger society.

Swami Vivekananda also felt the need of awakening of the women for the greater interest of the hole nation.

Vidyasagar, Raja Rammohan Roy, Derozio, Rokeya Begum did a lot for the stead of women education in Bengal.

So we the women of India should think that what can Kalpana Chawla do! what can P.V. Sindhu too! why can we not do that all ?

## आधुनिकी शिक्षापद्धतिः गुणदोषविमर्शश्च

**कविता जि. भट्टः** अनुक्रमाङ्कः : – 835
शिक्षाशास्त्रिप्रथमवर्षः

मानवस्य अन्तर्निहितपूर्णतायाः अभिव्यक्तिरेव शिक्षा। एषा मानवविकासस्य परमं साधनम्। अधुना यत् संकीर्णज्ञानं विद्यालयात् प्राप्यते तत् ज्ञानमेव "शिक्षा" इति कथ्यते। अर्थात् आधुनिक–शिक्षायाः प्राङ्गणे नैतिकविचाराणां तु स्थानमेव नास्ति। आधुनिकीशिक्षाविषये words worth वदति –

Whether is had the visionary gleam,
Where it is now the glory and the dream " इति।

अद्य ज्ञानार्जने छात्रवर्गे सोत्साहः न दरीदृश्यते, क्रीयाशीलता न प्रतीयते। यतो हि आधुनिकीशिक्षा एव दोषपूर्णा विद्यते। उद्देश्यविहीना शिक्षा निराशायाः गहनतिमिरे पातयति। अतः आधुनिकशिक्षापद्धतेः केचन विशेषाः विशेषत उल्लेखमर्हन्ति। ते सन्ति –

**आधुनिकशिक्षापद्धतिः**

वर्तमानशिक्षापद्धतौ बालकस्य सर्वाङ्गीणविकासाय नैतिकशिक्षायाः व्यवस्थापि करणीया। शास्त्रीयज्ञानेन सह व्यावहरिकशिक्षार्थं वादविवादगोष्ठी–चर्चा–कार्यशाला इत्यादीनामायोजनमावश्यकम्। शिक्षायाः प्रभावः राष्ट्रजीवनेऽपि भवति। सर्वेषां धर्माणां शिक्षापि अनिवार्या, येन एकतायाः भावना प्रबला भवेत्। सम्पूर्णज्ञानाय विज्ञानम्, गणितम्, गणकयन्त्रम् (Computer) इतिहासः, भूगोलम्, राजनीतिशास्त्रम्, सङ्गीतादि विषयाः अपि सम्यक्तया ज्ञातव्याः भवन्ति।

**यान्त्रिकी शिक्षा**

अधुना यान्त्रिकशिक्षायाः महती आवश्यकता विद्यते। समाजोपयोगिकार्यमधिकृत्य तस्याः विषये पूर्णप्रयोगात्मकं, व्यावसायिकं च ज्ञानं प्रदेयम्। व्यावसायिकदृष्ट्या यन्त्रणां कार्यकलापबोधनेन उद्योगक्षेत्रे औद्योगिकप्रतिष्ठानेषु च ज्ञाननैपुण्यमावश्यकं वर्तते। प्रायोगिकज्ञानमावश्यकम् स्यात्।

**सङ्गणकशिक्षा**

मानवेन इदानीं यत् कार्यं क्रियते, तदधुना गणकयन्त्रेण क्रियते। सङ्गणकेन गणनाकार्यं

स्वल्पेनैव प्रयत्नेन साध्यते। इदं तु घ्तुविज्ञानकार्ये, अन्तरिक्षप्रौद्योगिककार्ये, उपग्रहप्रक्षेपणे, प्रक्षेपास्त्रनिर्माणे, तस्य प्रक्षेपणे परमाणुस्फोटादि कार्ये च उपयुज्यते। अस्य आविष्कारेण क्रान्तिः विहिता। सर्वेऽपि यान्त्रिकक्रियाकलापाः सङ्गणकेनैव साध्यन्ते। अत एव अस्य शिक्षा सर्वेषु शिक्षणसंस्थानेषु प्रवर्तते।

**प्राविधिकी शिक्षा**

साम्प्रतं सर्वत्र यन्त्राणां प्रवर्तनेन प्राविधिकशिक्षा अपि महत्वं भजते। अत एव वर्तमानशिक्षापद्धतौ अस्याः शिक्षायाः विशेषतः व्यवस्था विधीयते। प्राविधिकशिक्षां प्राप्तजनाः स्वजीवनस्य उपार्जने उद्योगस्थापने च तत्पराः सन्ति।

**चिकित्साविज्ञानम्**

वर्तमानकाले छात्राणां चिकित्साक्षेत्रेष्वपि बहु रुचिः दृश्यते। अतः एव इदं वैशिष्ट्यं लभते अधुना। रोगाणां रोगिणां च संख्या प्रतिदिनं वर्धते। दक्षचिकित्सकानां वृत्तिसमस्या नास्त्येव।

**सर्वविषयावगाहि ज्ञानम्**

वर्तमानशिक्षायां सर्वविषयाणां सामान्यं ज्ञानं छात्रेभ्यः आवश्यकम्। सर्वतोमुखविकासाय इदं ज्ञानं उपयुज्यते।

**बालिकाशिक्षाप्रोत्साहनम्**

साम्प्रतं स्त्री–शिक्षा प्रतिदिनं वर्धते एव। प्रतिवर्षं सहस्रशः नार्यः ज्ञान–विज्ञान–कला–संकाये उत्कृष्टोपाधिभिर्विभूष्यन्ते। अतः बालकानां शिक्षावत् बालिकानामपि ज्ञानवर्धने बलं आधीयते।

**आधुनिकशिक्षापद्धतेः केचन दोषाः**

**क.पाश्चात्य–सभ्यतायाः प्रभावः** – आधुनिकशिक्षापदतिः पाश्चात्यसभ्यतायाः प्रभावेण ग्रस्ता वर्तते। शिक्षायां नैतिकसांस्कृतिकशिक्षायाः अभावोऽवलोक्यते। तेन अनुशासनस्य अभावोऽपि दरीदृश्यते। छात्रेषु भोगवादे प्रवृत्तिः, श्रम–वैमुख्यम्, गुरुशिष्य–सम्बन्धाभावः, ज्ञानार्जनभावनायाः अभाव अपि सन्दृश्यते।

**ख. उपाधिधारिणां समक्षे जीविकोपार्जनसमस्या** – आधुनिकशिक्षा जीविकोपार्जनाय अनुपयुक्ता। यन्त्रात् सूचिका इव विश्वविद्यालयात् स्नातकाः, परास्नातकाः, शोधोपाधिधारिणः च निर्मीयन्ते। प्रतिवर्षं पञ्चदशलक्षं स्नातका जीविकोपार्जनाय इतस्ततः भ्रमन्तः दरीदृश्यन्ते। अतः अस्याः शिक्षायाः जीवने किमपि महत्त्वं न विद्यते।

**ग. सुविधाऽभिलाषः** – आधिनिकशिक्षापद्धतौ शिक्षिताः युवकाः सुविधां सौकर्यं च वाञ्छन्ति। ते कठिनं श्रमं कर्तुं नाभिलषन्ति। अत एव ते कृषिकार्ये, अन्येषु च श्रमसाध्येषु न प्रवर्तन्ते। एष सुविधाऽभिलाषः तेषां मनोबलमपहरति।

**अपेक्षिताः परिष्काराः**

१. नैतिकशिक्षायाः अनिवार्यता।

२. सर्वत्र प्रवेशपरीक्षा आवश्यकम्।

३. श्रममहत्त्वस्य ज्ञानम्।

४. आर्थिकशिक्षायाः आवश्यकता।

५. व्यावसायिकं प्रशिक्षणम्।
६. शिक्षा अल्पव्ययकरी स्यात्।
७. सुयोग्यप्रशिक्षिताध्यापकानां नियोजनम्।
८. सुदृढगुरुशिष्यसम्बन्धः।

# Elements of Psychology

**Meghashree N** Roll No - 836
S. S. Ist Year

Educational psychology is a phase of "education". It is a science that supplements the process of education. It is a branch, a segment of education. It describes the behaviour of the education and seeks to explain it in terms of his inner urges, motives, drives and the environmental influences to which he is subject.

It is a study of child's mental life in its various aspects with reference to its application to the education of the child. Educational psychology provides the teachers and educators with a fund of knowledge that may help them in giving to the pupils the best kind of education, the education that causes an all round development of pupil's personality.

Educational psychology studies the problems of education in terms of psychology. In other words, it is a psychological approach to education. But it does not mean that educational psychology is identical with education, part cannot be identical with the whole. Educational psychology, though a phase of education, is quite different from it in certain aspects education has a wider field, while functions of education psychology are limited. It is said that educational psychology has revolutionised the process of education. It is true, new education is a complete departure from the old. In the scheme of old education the child had no place, discipline was very rigid and repressive, curriculam was fixed and formal and the whole of education was drifting away from the life of the child.

New education is not mere acquisition of knowledge and information. It is modification of the child's behaviour and an all round development of the child's personality. New education is for the child and apart from child it has no purpose. Thus, in the picture of new education is a gift of educational psychology.

Educational psychology has revealed that all possibility of education lies in the potentialities of the child and his nature. Rousseau said, "study the child as we do not understand him". To him, child was a book which had to be studied by every teacher. In this way, as a result of the insight given by educational psychology, a new child- study-movement has started in the field of education. Introduction of the science to education has brought about a revolutionary change in the field of education.

In other words they say, education has been psychologised. This change has shifted

the emphasis from matter to the child. All that is to be taught to the child should be determined by the nature, needs and capacities of the child himself. In the same way, introduction of psychology to education has also changed the conception of discipline. Discipline in the new education should be positive, not negative.

Famous definitions: .

1. According to J.M Stephon:

"Educational psychology is a systematic study of educational growth."

2. According to Crow and Crow:

"Educational psychology describes and explains the learning experiences of an individual from birth through old age."

3. According to Skinner:

"Educational psychology covers the entire range of behaviour and personality as related to education."

## भाषायाः विकासक्रमः

**वेङ्कटेशः जि** अनुक्रमाङ्कः – 837

शिक्षाशास्त्रिप्रथमवर्षः

संस्कृतजगतः एकतमा अतिप्राचीना समृद्धा शास्त्रीया च भाषा वर्तते संस्कृतम् । संस्कृतं भारतस्य जगतः सुरवाणी, अमरवाणी, सुरभारती, भारती, दैवीवाक्, देवभाषा, देववाणी, गीर्वाणी, गीर्वाणवाणी इत्यादिभिः नामभिः प्रसिद्धा वर्तते। अस्यां भाषायां भाषायाः महत्त्वम् आधिक्येन दृश्यते। संस्कृतवाङ्मयं विश्ववाङ्मये अद्वितीयं स्थानम् अलङ्करोति। संस्कृनतस्य प्राचीनतमग्रन्थाः वेदाः सन्ति। वेददर्शनादिभिः अनन्तवाङ्मयरूपेण विलसन्ती अस्ति एषा। नाटक–काव्य–इतिहास–पुराण–शास्त्रमोक्षात्मकाः चतुर्विधपुरुषार्थहेतुभूताः विषयाः अस्यां भाषायां विद्यन्ते। भाषायाः व्युत्पत्यर्थं अक्षराणाम् उच्चारणशास्त्रमिति महर्षिणा पाणिनिना वर्णाभिव्यक्तिप्रदेशः उच्चारणस्थानं कथ्यते। शब्दप्रयोगसमये कायाग्निना प्रेरितः वायुः कण्ठादिस्थानेषु सञ्चरन् वर्णान् अभिव्यनक्ति। यथोक्तं पाणिनीयशिक्षायाम् –

**आत्मा बुध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।**
**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकोष्टौ च तालु च।।**

एवं वर्णानाम् उच्चारणस्थानानि अष्टौ सन्ति। १. मूर्धा। २. शिरः। ३. कण्ठः। ४. तालुः। ५. ओष्ठौ। ६. दन्ता। ७. नासिका। ८. जिह्वामूलमिति। एवं रीत्या संस्कृतभाषायाः उच्चारणस्थानान्

अवलम्ब्य स्पष्टमुच्चरामः चेत् ज्ञायते संस्कृतभाषायाः वैशिष्ट्यम्।

अन्यभाषाणाम् इव संस्कृतस्य अपि भाषारूपेण सार्वत्रिकप्रयोगः भवेत्। एवञ्च विद्यमाना संस्कृतभाषा पूर्णरूपेण परिष्कृता निर्दुष्टा प्रवाहयुक्ता सारगर्भिता च स्यात् इति अस्माभिः आकाङ्क्ष्यते चेत् विश्वस्य सर्वेषु क्षेत्रेषु अपि संस्कृतभाषा प्रवहेत् इति अपेक्षते चेत् तस्य पुरातनस्य कार्यस्य प्रारम्भः कुतः भवेत् इति प्रश्नः उदेति। संस्कृतभाषायाः प्रासङ्गिकता, उपयोगिता, वाचिकता वर्तते न वा इत्येषः विषयः जनानां मनस्सु भवति चेत् संस्कृतम् अध्ययनात् प्राक् एव उत्पद्यते।

तथा च एतं विषयं विचिन्त्य जनाः अध्ययने अध्यापने च प्रवृत्ताः न भवन्ति एव। तस्मात् कारणात् संस्कृतभाषायाः ज्ञानं न भवति। कस्याश्चिद् भाषायाः ज्ञानं विना तया भाषया लिखितस्य विषयस्य चर्चाकरणं, तस्मिन् विषये अनुसन्धानाय वार्ताकरणं वा किं कदापि सम्भवेत् ? देशस्य अनेकेषु विश्वविद्यालयेषु सम्प्रति संस्कृतस्य अध्ययनं जायमानं तु वर्तते परन्तु तादृशी स्थितिः नैव दृश्यते यस्याः आवश्यकता अनुभूयते विश्वविद्यालयेषु संस्कृतमहाविद्यालयेषु जनाः संस्कृतम् अधीयानाः तु वर्तन्ते। परन्तु लेखने भाषणे च तेषां प्रायशः प्रत्येकस्मिन्नपि वाक्ये दोषाः दृश्यन्ते, ये च निर्दुष्टतया संस्कृतेन लेखने, पठने, भाषणे च समर्थाः सन्ति तादृशाः जनाः अङ्गुलिगणनीयाः सन्ति द्य तथा हि संस्कृतज्ञानां भारतमातुः च अपेक्षा वर्तते यत् अनेके जनाः सार्वत्रिकरूपेण संस्कृतस्य प्रयोगे दक्षाः स्युः। तत्रैव संस्कृताय कलङ्करूपेण प्रभावं जनयन्ती अध्ययनशैली दृश्यते। या सम्प्रति संस्कृतानुवादरूपेण राजते, छात्रैः संस्कृतं पठ्यते परन्तु कदापि तैः संस्कृतभाषा नैव श्रूयते।

भाषायाः तु चत्वारि कौशलानि भवन्ति, यदि तेषां कौशलानां माध्यमेन संस्कृतस्य अध्ययनं भवति तर्हि शीघ्रतया एव छात्राणां संस्कृताधिगमः भवति। तद्यथा श्रवणं, भाषणं, पठनं, लेखनं च इति एतानि सोपानानि वर्तन्ते। यदि छात्राणां श्रवणाभ्यासः न भविष्यति तर्हि तेषां भाषाभ्यासः कथम्?

पठनलेखनयोः तु भिन्ना कथा। अद्यत्वे संस्कृतस्य या अध्ययनशैली वर्तते सा नितान्तम् अवैज्ञानिकी वर्तते। चतुर्दशविश्वविद्यालयेषु सत्सु अपि संस्कृतक्षेत्रे नूतनं किमपि नैव दृश्यमानम् अस्ति इत्येतस्य कारणम् अनुवादपद्धतिः अस्ति। परन्तु उदाहरणत्वेन शिबिराणां प्रयोगेण द्रष्टुं शक्यते यत् दशसु दिनेषु अश्रुतपूर्वसंस्कृताः अपि संस्कृतेन सम्भाषणे दक्षाः भवन्ति। अधुना देशे विदेशे अपठितसंस्कृतजनाः अपि दोषान् विना वदन्तः भवन्ति। परन्तु तेषां भाषणे प्रान्तीयदोषाः, उच्चारणगतदोषाः, रूपगतदोषाः, प्रत्ययगतदोषाः, प्रयोगगतदोषाः इत्यादयः बहुविधदोषाः दृश्यन्ते। तेषां दोषाणां निवारणाय निराकरणाय च अपेक्षिता वर्तते 'भाषाव्युत्पत्तिः' इति।

# ಜಗದಗಲದ ಸಂಸ್ಕೃತ

**ರಘುವೀರ ಶೆಟ್ಟಿ**
ಶಿ.ಶಾ. ೧ನೇ ವರ್ಷ
ಅನುಕ್ರಮಾಂಕ – 838

ಭಾರತ ಸಂಜಾತ ಭಾಷೆಗಳಲ್ಲೆಲ್ಲ ಅತ್ಯಂತ ಪ್ರಮುಖವಾದ ಸಂಸ್ಕೃತ ಇಂದು ಭಾರತಕ್ಕೆ ಮಾತ್ರ ಸೀಮಿತವಾಗಿಲ್ಲ ಎಂಬುದು ಗಮನಾರ್ಹವಾದ ಸಂಗತಿ. ಅದು ತನ್ನ ಸತ್ವ ಸಾಮರ್ಥ್ಯಗಳಿಂದ ಜಗದಗಲ ವ್ಯಾಪಿಸಿದೆ. ತನ್ನ ತವರುಮನೆಯಾದ ಭಾರತವು ಗುಲಾಮಗಿರಿಯಲ್ಲಿದ್ದಾಗಲೂ ಸಂಸ್ಕೃತವು ಆಳರಸರ ದೇಶಗಳಾದ ಇಂಗ್ಲೆಂಡ್, ಫ್ರಾನ್ಸ್, ಮುಂತಾದ ರಾಷ್ಟ್ರಗಳನ್ನೆಲ್ಲ ವ್ಯಾಪಿಸಿತು. ೧೮೮೩ ರಲ್ಲಿ ಇಂಗ್ಲೆಂಡ್ ನ ಆಕ್ಸ್ ಫರ್ಡನಲ್ಲಿ "Indian Institute in England" ಎಂಬ ಭಾರತೀಯ ಸಂಸ್ಥೆ ಆರಂಭಗೊಂಡಿತು. ಅದರ ಉದ್ಘಾಟನೆ ಮಾಡಿದವರು ಇಂಗ್ಲೆಂಡ್ ನ ರಾಜಕುಮಾರ ಪ್ರಿನ್ಸ್ ಆಫ್ ವೇಲ್ಸ್. ಆ ಸಂಸ್ಥೆಯ ಉದ್ಘಾಟನಾಫಲಕದ ಮೇಲೆ –

ಈಶಾನುಕಂಪಯಾ ನಿತ್ಯಂ ಆರ್ಯವಿದ್ಯಾ ಮಹೀಯತಾಂ ।
ಆರ್ಯವರ್ತಾಂಗ್ಲಭೂಮ್ಯೋಶ್ಚ ಮಿಥೋ ಮೈತ್ರೀ ವಿವರ್ಧತಾಮ್ ॥

(ದೈವಾನುಗ್ರಹದಿಂದ ಎಂದೆಂದಿಗೂ ಭಾರತೀಯ ವಿದ್ಯೆ ಗೌರವ ಪಡೆಯಲಿ; ಭಾರತ ಆಂಗ್ಲ ದೇಶಗಳ ನಡುವಿನ ಮೈತ್ರಿ ಇನ್ನಷ್ಟು ಹೆಚ್ಚಲಿ) ಎಂದು ಕೆತ್ತಿಸಿರುವುದನ್ನು ಕಂಡಾಗ ಅಂದಿನ ವಿದೇಶಿ ಆಳರಸರು ತಮ್ಮ ಗುಲಾಮ ದೇಶದ ಭಾಷೆಯೊಂದಕ್ಕೆ ಎಷ್ಟೊಂದು ಮಾನ್ಯತೆ ನೀಡಿ ಪ್ರೋತ್ಸಾಹಿಸುತ್ತಿದ್ದರೆಂದು ತಿಳಿಯುತ್ತದೆ. ಇಂತಹ ಉದಾಹರಣೆ ಪ್ರಾಯಶಃ ಜಗತ್ತಿನ ಇತಿಹಾಸದಲ್ಲೇ ವಿರಳ.

ಪ್ರಪ್ರಥಮವಾಗಿ ಅಣುಸ್ಫೋಟ ಮಾಡಿದ ಜರ್ಮನ್ ವಿಜ್ಞಾನಿ ಡಾ॥ ಒಪ್ಪನ್ ಹೇಮರ್ ಸಂಸ್ಕೃತವನ್ನು ಚೆನ್ನಾಗಿ ಬಲ್ಲವರು. ಮೊದಲಬರಿಗೆ ಅಣುಬಾಂಬನ್ನು ಸ್ಫೋಟಗೊಳಿಸುವಾಗ ಭಗವದ್ಗೀತೆಯ ಅರ್ಜುನನಂತೆ ವಿಷಾದಗೊಂಡು, ಕೊನೆಗೆ ಮಯ್ಯೈವೇತೇ ನಿಹತಾಃ ಪೂರ್ವಮೇವ ನಿಮಿತ್ತಮಾತ್ರಂ ಭವ ಸವ್ಯಸಾಚಿನ್ ಎಂಬ ಗೀತೋಕ್ತಿಯನ್ನು ಸ್ಮರಿಸಿ,ಸ್ಫೋಟಗೊಳಿಸಿದರಂತೆ. ಆಂಗ್ಲ ಮಹಾಕವಿ.ಟಿ.ಎಸ್. ಎಲಿಯೆಟ್ ತನ್ನ ನಲವತ್ತನೇ ವಯಸ್ಸಿನ ನಂತರ ಸಂಸ್ಕೃತ ಕಲಿತು, ಅದರ ಸಂದೇಶವನ್ನು waste land, ಮೊದಲಾದ ತನ್ನ ಕಾವ್ಯಗಳಲ್ಲಿ ಸಾರಿದ್ದಾನೆ.

ಫಿಲಿಡೆಲ್ಫಿಯಾದ ವಿಶ್ವಸಂಸ್ಕೃತ ಸಮ್ಮೇಳನದಲ್ಲಿ ಪೆನ್ಸಲ್ವೇನಿಯಾ ವಿಶ್ವವಿದ್ಯಾಲಯದಲಯದ ದಕ್ಷಿಣ ಏಷ್ಯಾ ಅಧ್ಯಯನ ವಿಭಾಗದ ಮುಖ್ಯಸ್ಥ ಪ್ರೊ.ಲ್ಯುಡೋಲಾಚರ್ ಹೇಳಿದಂತೆ ಅಮೇರಿಕನ್ ಓರಿಯಂಟಲ್ ಸೊಸೈಟಿ ಯ ಸಾವಿರಕ್ಕೂ ಮಿಕ್ಕಿದ ಸದಸ್ಯರಲ್ಲಿ ನೂರಾರು ಮಂದಿ ಸಂಸ್ಕೃತ ವಿದ್ವಾಂಸರಿದ್ದಾರೆ. ಇವರೆಲ್ಲ ಸಂಸ್ಕೃತ ಮತ್ತು ಪ್ರಾಚೀನ ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯ ಬಗ್ಗೆ ಆಗಾಗ ಸಭೆ ಸೇರಿ ಚರ್ಚಿಸುತ್ತಾರೆ. ಓರಿಯಂಟಲ್ ಸೊಸೈಟಿಯು ಪ್ರಕಟಿಸುವ ನಿಯತಕಾಲಿಕೆಯಲ್ಲಿ ಬಹಳಷ್ಟು ಪುಟಗಳು ಸಂಸ್ಕೃತಕ್ಕೆ ಮುಡಿಪಾಗಿರುತ್ತವೆ. ಜಗತ್ತಿನ ಯಾವುದೋ ಮೂಲೆಯಲ್ಲಿರುವ ಶೃಂಗೇರಿಯಂತಹ ಊರಿಗೆ ಸಂಸ್ಕೃತ ವಿದ್ವಾಂಸರನ್ನು ಹುಡುಕಿಕೊಂಡು ಬರುತ್ತಿರುವ ರಾಬರ್ಟ ಫಿಲಿಪ್ ಗೋಲ್ಡಮ್ಯಾನ್, ಎಡ್ವಿನ್ ಜೋರೋ, ಸ್ಯಾಲಿ J.M.ಸದರ್ ಲ್ಯಾಂಡ್ ಮುಂತಾದ ವಿದೇಶೀ ಸಂಸ್ಕೃತ ವಿದ್ವಾಂಸರ ಸಂಸ್ಕೃತಾಸಕ್ತಿ ಅಸಾಧಾರಣವಾದುದು.

ಈ ಎಲ್ಲಾ ವಿದೇಶಿಯರು ಸಂಸ್ಕೃತ ದೇವಭಾಷೆ ಎಂಬ ಭಯ–ಭಕ್ತಿಯಿಂದ ಈ ಭಾಷೆಯನ್ನು ಕಲಿತವರಲ್ಲ. ಯಾವುದೇ ವಿಧದ ಒತ್ತಡ, ಆಸೆ–ಆಮಿಷಗಳೂ ಅವರಿಗಿಲ್ಲಾ. ಸಂಸ್ಕೃತಭಾಷೆಯ ವೈಜ್ಞಾನಿಕತೆ –ಉಪಯುಕ್ತತೆಗಳು ಅವರನ್ನು ಸೆಳೆದವು; ಅದನ್ನು ತಾವಾಗಿ ಸ್ವಾಗತಿಸಿದರು. ಅದರಲ್ಲಿ ತಮ್ಮನ್ನು ತೊಡಗಿಸಿಕೊಂಡರು. ಸಂಸ್ಕೃತದ ಸ್ಫೂರ್ತಿಯಿಂದ ವೈಜ್ಞಾನಿಕ ಪ್ರಗತಿಯನ್ನೂ ಸಾಧಿಸಿದರು. ಸುಪ್ರಸಿದ್ದ ವಿಜ್ಞಾನಿ ಡಾ. ಐನ್ ಸ್ಟೀನ್ ರವರು ವೈಜ್ಞಾನಿಕ ಅನ್ವೇಷಣೆ ಮತ್ತು ನನ್ನ ಸಿದ್ದಾಂತಗಳ ರೂಪಣೆಗೆ ನನಗೆ ಭಗವದ್ಗೀತೆಯಿಂದ ಅಪಾರ ಸ್ಫೂರ್ತಿ ದೊರಕಿದೆ ಎಂದು ಮುಕ್ತ ಮನಸ್ಸಿನಿಂದ ಹೇಳಿದ ಮಾತು ಕೇವಲ ಅವರೊಬ್ಬರ ಉದ್ಗಾರವಲ್ಲಾ; ಎಲ್ಲ ವಿದೇಶೀ ವಿಜ್ಞಾನಿಗಳು ಮತ್ತು ವಿಚಾರವಂತರ ಪ್ರಾತಿನಿಧಿಕ ಉದ್ಗಾರ; ಸಂಸ್ಕೃತದ ಅನಿವಾರ್ಯತೆ ಕುರಿತು ನೀಡಿದ ಪ್ರಶಸ್ತಿ ಎಂಬುದಾಗಿ ಭಾವಿಸೋಣ.

# संस्कृतस्य महत्वम्

**मधुस्मिता त्रिपाठी** अनुक्रमाङ्कः – 839
शिक्षाशास्त्रिप्रथमवर्षः

"संस्कृतं विश्वगौरवम्"। एषा हि सुरभारतीति कथ्यते। संस्कृतम् इति शब्दस्य अर्थः परिष्कृतं शुद्धं सम्यक् प्रकारेण च रचितम्। भारतीयभाषाणां जननी संस्कृतम् भवति। सर्वा अपि भारतीयभाषाः संस्कृतभाषया घनिष्ठं सम्बन्धं भजन्ते। भारतीयदर्शनस्य, धर्मस्य, संस्कृतेः च भाषारूपेण संस्कृतस्य महत्त्वमनिर्वचनीयमस्ति। "विश्वस्य प्राचीनतमा भाषा भारतस्य अमूल्यनिधिश्च भवति"। बौद्धिक–भावात्मकाध्यात्मिककलात्मकनिष्पत्तेः स्त्रोतः निरन्तरधारा संस्कृतभाषा वर्तते। अस्याः महत्वमेवं विशदीकर्तुं प्रयते।

**ऐतिहासिकमहत्त्वम्**

संस्कृतभाषायाः साहित्ये प्राचीनेतिहासः सन्निहितो वर्तते। अन्येषां स्रोतसामाधारेण लिखितः इतिहासः काल्पनिकः स्यान्नाम परन्तु न संस्कृतसाहित्ये विद्यमानाः तथ्यानामाधारेण लिखित इति। यथा : – कौटिल्यस्य अर्थशास्त्रे, मनुस्मृतौ, याज्ञवल्क्यस्मृतौ च तत्कालीनसमाजस्य इतिहासः उपलभ्यते। पुराणेषु, उपनिषत्सु, महाकाव्येषु बौद्धानां त्रिपिटकसाहित्ये जैनानामार्षसाहित्ये च भारतस्य प्राचीनेतिहासः विद्यते।

**सांस्कृतिकमहत्त्वम्**

अस्माकं सभ्यता संस्कृतिश्च वेदेभ्यः स्मृतिभ्यः पुराणेभ्यश्च निःसृता भवति। तस्याः स्त्रोतः संस्कृतभाषा भवति। अस्माकं संस्कृतिः सभ्यता च संस्कृतग्रन्थेषु विद्यते। संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतिः अनूचाना वर्तते। षोडशसंस्काराः उच्चदार्शनिकविचाराः आध्यात्मिकज्ञानं नैतिकता च संस्कृतौ समाविष्टाः सन्ति। "भारतीयसभ्यता वैदिककाले जनिं लब्ध्वा प्रायः चतुस्सहस्रवर्षाणि यावत् संस्कृतद्वारैव स्वाभिव्यक्ता अभवत्" इति संस्कृतायोगेन लिखितम्।

**राष्ट्रियमहत्त्वम्**

भारतस्य एकता, अखण्डता च संस्कृतौ निहिता वर्तते। भारते अनेकेषु बाह्यदेशेषु च जनानां संस्कृतिः समाना वर्तते। कदाचित् जनाः साम्प्रदायिकतां प्रान्तीयतां भाषां च स्वीकृत्य, तेषु विषयेषु कलहं कुर्वन्ति। तेन ईर्ष्या, द्वेषः, घृणा इत्यादि दुर्भावनाः उत्पद्यन्ते। तादृशपरिस्थितौ संस्कृतभाषायाः राष्ट्रियं महत्त्वं सहायकं भवति। संस्कृतविघटनकारितत्त्वानां विस्मारणेन एकरूपतायाः स्मरणं कारयति। यथा –

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**
**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।।**

**अन्ताराष्ट्रियमहत्त्वम्**

संस्कृतभाषायाः न केवलं राष्ट्रियमहत्त्वं वर्तते अपितु अन्ताराष्ट्रियमहत्त्वमपि वर्तते। "उदारचितानान्तु वसुधैव कुटुम्बकम्" इत्येतमादर्शं भारतीयाः प्राचीनकालादेव प्रादर्शयन्।

**''समानमस्तु वो मनो यथा वः सुसहाति"**
**"देवस्य पश्य कार्यं न ममार न जीयति "**

"केवलाघो भवति केवलादी"
"सत्यमेव जयते नानृतम्"

एवम् उदात्तविचाराः संस्कृतभाषायामुपलभ्यमानाः अन्ताराष्ट्रियजीवनाय प्रेरयन्ति।

**साहित्यकं महत्त्वम्**

वैदिकसंस्कृतेः काव्यरचना अपि प्रधाना आसीत्। भारतीयभाषासु न केवलं संस्कृभाषानुगुणं व्याकरणम् अपितु संस्कृतसाहित्यस्य विचारधाराः ध्वन्यलङ्कारादयश्च अन्तर्भवन्ति। संस्कृत–साहित्यस्य उत्कृष्टरचनाः विश्वविख्याताः सन्ति। यथा – कालिदासस्य अभिज्ञानशाकुन्तलम्, रघुवंशम्, कुमारसम्भवम्,। भवभूतेः उत्तररामचरितम्। भारवेः किरातार्जुनीयम् इत्यादि। संस्कृतसाहित्यम् आधुनिकसाहित्यस्य प्रेरणास्त्रोतः भवति।

**कालात्मकं महत्त्वम्**

प्राचीने भारते संस्कृतस्य विज्ञानेन साकं कलानामपि उन्नतिः आसीत्। मूर्तिकलायाम्, चित्रकलायाञ्च भारतं विश्वविख्यातमासीत्। सिन्धुनागरिकतायाः अवशेषस्तु एतासां कलानामुन्नतेः प्रमाणानि विद्यन्ते। एतदतिरिक्ताः– नाट्यकला, अभिनयसामग्री, वेशभूषा, सङ्गीतम्, नृत्यम् इत्याद्याः चतुःषष्ठिकलाः संस्कृतग्रन्थेषु वर्णिताः।

**राजनैतिकमहत्त्वम्**

